Government of Karnataka

# शेवधिः

द्वितीयो भागः

द्वितीयपदवीपूर्व-संस्कृत-पाठ्यपुस्तकम्

***

# ಶೇವಧಿ

ಭಾಗ - ೨

ದ್ವಿತೀಯ ಪದವಿಪೂರ್ವ ಸಂಸ್ಕೃತ ಪಠ್ಯಪುಸ್ತಕ

*****

ಪದವಿಪೂರ್ವ ಶಿಕ್ಷಣ ಇಲಾಖೆ,
ಮಲ್ಲೇಶ್ವರ, ಬೆಂಗಳೂರು.

© *Department of Pre-University Education* 2014-2015.

***Revised Edition - 2023-2024***

**All Rights Are Reserved**

No part of this publication may be reproduced, stored in a retrieval system or transmitted, in any form or by any means, electronic, mechanical, photo copying, recording or otherwise without the prior permission of the publisher.

This book is sold subject to the condition that it shall not, by way of trade, be lent, resold, hired out or otherwise disposed of without the publisher's consent, in any form of binding or cover other than that in which it is published.

The correct price of this publication is the price printed on this page/cover page. Any revised price indicated by a rubber stamp or by a sticker or by any other means is incorrect and should be unacceptable.

*Printed on 70 GSM Maplitho paper*

*Printed at:*

**RAMYA ENTERPRISES**
Plot No. 103, 4th Phase, Industrial Area,
Sy. No. 43/44, Yarandahally village, Jigani Hobli,
Bommasandra, Bengaluru - 560 099.

# THE CONSTITUTION OF INDIA

## PREAMBLE

**WE, THE PEOPLE OF INDIA,** having solemnly resolved to constitute India into a [1]**[SOVEREIGN SOCIALIST SECULAR DEMOCRATIC REPUBLIC]** and to secure to all its citizens :

**JUSTICE,** social, economic and political;

**LIBERTY** of thought, expression, belief, faith and worship;

**EQUALITY** of status and of opportunity; and to promote among them all

**FRATERNITY** assuring the dignity of the individual and the [2][unity and integrity of the Nation];

**IN OUR CONSTITUENT ASSEMBLY** this twenty-sixth day of November, 1949 do **HEREBY ADOPT, ENACT AND GIVE TO OURSELVES THIS CONSTITUTION.**

---

1. Subs. by the Constitution (Forty-second Amendment) Act, 1976, Sec.2, for "Sovereign Democratic Republic" (w.e.f. 3.1.1977)
2. Subs. by the Constitution (Forty-second Amendment) Act, 1976, Sec.2, for "Unity of the Nation" (w.e.f. 3.1.1977)

# EDITORIAL COMMITTEE

## Chairperson

**Vidushi Dr. Y.S. GAYATHRI, M.A., B.Ed., Ph.D.**
Selection Grade Lecturer in Samskritha
Sree Balaji P.U. College for Women
Hanumanthanagar, Bengaluru – 560 019.

## Co-ordinator

**Vidwan Dr. B.S. PARVATHARAJU, M.A., Ph.D.**
Selection Grade Lecturer and HOD of Samskritha
Marimallappa's Pre-University College,
Seethavilasa Road, Mysore – 570 024.

**Sri BALACHANDRA, M.A., B.Ed.**
Selection Grade Lecturer in Samskritha
Govt. P.U. College,
Karwar – 581 301
North Canara Dist.

## Convenor

**Sri S.M. HEGDE, M.A., B.Ed.**
Senior Lecturer in Samskritha
BEL P.U. College, Jalahally,
Bengaluru – 560 013.

## Member

**Sri B.C. SHANTHARAJU, M.A. (San), M.A. (Kan)**
Senior Lecturer in Samskritha
Sri Kongadiyappa P.U. College,
Doddaballapura – 561 203
Bengaluru Rural District.

**Smt VASUDHA G. HEGDE, M.A.**
Senior Lecturer in Samskritha
Govt. P.U. College,
Vanivilas Institute, Fort
Bengaluru - 560 002.

**Dr. RAMAKRISHNA BHAT, M.A., Ph.D.**
Senior Lecturer in Samskritha
Vidyodaya P.U. College
Yadalli, Sirsi – 581 340.

**Dr. GIRISH DHRUVARAJ A KAMANCHI, M.A., Ph.D.**
Lecturer in Samskritha
B.L.D.E.'s S.S. P.U. College
Bijapur - 585 106.

**Sri B. SATYANARAYANA, M.A.**
Lecturer in Samskritha
Sri Satyasai Lokaseva P.U. College
Muddenahally – 562 101
Chikkaballapura Dist.

**Dr. GURURAJA RAO C.H., M.A., B.Ed., Ph.D.**
Lecturer in Samskritha
S.D.M. P.U. College
Krishnamurthypuram,
Mysore - 570 004.

# REVIEW COMMITTEE

**Dr. Y.B. PRABHAVATHI, M.A., Ph.D.**
Selection Grade Lecturer and HOD of Samskritha
N.M.K.R.V. PU College for women
Jayanagar, Bengaluru – 560 011.

**Dr. C. SHIVA KUMARASWAMY, M.A., M.Phil, Ph.D.**
Professor and HOD of Samskritha
Basaveshwara First Grade College,
Rajajinagar, Bengaluru - 560 010.

**Vidwan GANGADHARA V. BHAT,**
Asst. Prof. in Naveena Nyaya,
Maharaja Samskritha College,
Mysore - 570 004.

सत्यमेव जयते

# भारतसंविधानम्

## उद्देशः

वयं भारतीयाः भारतं सम्पूर्णं प्रभुत्व-सम्पन्नं, समाजवादि, मतनिरपेक्षं, प्रजातन्त्रात्मकं गणराज्यं कर्तुं तस्य प्रजाभ्यः -

सामाजिकम्, आर्थिकं राजनैतिकं च न्याय्यम्

विचार-अभिव्यक्ति-विश्वास-धर्म-उपासनासु स्वतन्त्रताम्

प्रतिष्ठा-अवसरयोः समानतां प्राप्तुं

एतेषु सर्वेषु व्यक्तेः गरिमानं राष्ट्रस्य एकताम्-अखण्डतां च सुनिश्चितं कर्तुं तासु

सम्बन्धं वर्धयितुं च दृढसङ्कल्पं कृत्वा नः सांविधानिकसभायाम् एतस्याम् अद्य २६ नवेम्बर् १९४९ तमे दिने संविधानमेतत् अङ्गीकृतम् अधिनियमितम् आत्मार्पितं च कृतम् ।

# प्रास्ताविकम्

'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा', 'संस्कृतिसंस्कृताश्रिता','संस्कृतं भारतस्य आत्मा' इत्यादिसंस्कृतप्रशस्तयः संस्कृतभाषायाः गरिमानं वर्धयन्ति । अस्माकं राष्ट्रस्य इतिहासः ज्ञातव्यश्चेत् संस्कृतम् अध्येतव्यम् । वेदकालादारभ्य अद्ययावत् या साहित्यधारा निरन्तरं प्रवहमाना वर्तते, तां ज्ञातुं संस्कृताध्ययनम् अत्यवश्यकम् । अस्यां भाषायां विद्यमाना वैज्ञानिकी सम्पत् साहित्यम् अभिवर्धयन्ती अस्ति ।

२०१३-१४ वर्षतःप्रथमपदवीपूर्वकक्ष्यायाः कृते नूतनं पाठ्यपुस्तकं पदवीपूर्वशिक्षणविभागेन प्रकाशितम्। २०१४-१५ वर्षतः द्वितीयपदवीपूर्वकक्ष्यायाः कृते विविधेषु विषयेषु पाठ्यांशानां परिष्करणं, परिवर्तनं च भवेत् इत्याशास्य पाठ्यपुस्तकं कथं भवेत् इति पदवीपूर्वशिक्षणविभागः मार्गम् असूचयत् । राष्ट्रिय पठ्यचर्या २००५ तथा NCERT मार्गसूची अनुसरणीया इति स्पष्टं निर्देशनं दत्तम् - 'नूतनः पाठ्यक्रमः भारमुक्तः, कण्ठपाठमुक्तः च भवेत्; पाठ्यांशानां अनुसन्धानं जीवने यथा भवेत् तथा पाठाः भवेयुः; देशप्रेम-देशभक्तानां चरितानि, परिसररक्षणं, जीवनावश्यकानि मौल्यानि, कन्नड-संस्कृतभाषयोः कृतभूरिपरिश्रमाणां व्यक्तीनां परिचयः विद्यार्थिनां जीवने मार्गदर्शकाः उपयोगिनश्च अंशा योजनीया :' इति । तामनुसृत्य, **शेवधिः II** पाठ्यपुस्तकं समित्या विरचितं वर्तते ।

अस्मिन् पाठ्यपुस्तके दश पाठाः सन्ति । उपर्युक्ताः अंशाः एतेषु पाठेषु उपनिबद्धाः । व्याकरणविभागः, अभ्यासपुस्तकं, परिशिष्टभागः, मार्गदर्शिनी प्रश्नपत्रिका, मार्गदर्शिनी उत्तरपत्रिका , नीलनक्षम् इत्यनेन क्रमेण पुस्तकं विन्यस्तम् । संस्कृताध्ययनस्य प्रयोजनमपि प्रत्येकतया प्रदत्तम् । भास्वती II (NCERT) पाठ्यपुस्तके भूमिका भागः हिन्दीभाषया रचिता वर्तते । पदवीपूर्वशिक्षणविभागस्य आदेशानुसारं पुस्तकेऽस्मिन् भूमिकाभागः कन्नडभाषया प्रदत्तः ।

समितिमिमां चित्त्वा एतद्दायित्वम् अदात् कर्णाटकपदवीपूर्वशिक्षणविभागः । तदर्थं तस्य निर्देशकेभ्यः सर्वेभ्यः अधिकारिभ्यः च कृतज्ञताः अर्पयति समितिः । पाठ्यपुस्तकरचनासन्दर्भे विविधाः शिक्षणसंस्थाः एतदर्थं विशेषतया महदानुकूल्यं कल्पितवत्यः । ताभ्यः सर्वाभ्यः संस्थाभ्यः, तासां शासनमण्डलीभ्यश्च हार्दं कार्तज्ञ्यमर्पयति समितिः । अस्मिन् वर्षे परिशीलनासमितिरपि सदस्यनिर्विशेषं कार्यं निरूढवती ।

पाठ्यपुस्तकस्य आप्रथमगोष्ठ्याः सर्वासु गोष्ठीषु क्रियाशीलतया भागम् ऊढ्वा, सकाले समुचितं मार्गदर्शनं दत्त्वा अस्मिन् कर्मणि साहाय्यं प्रदत्तवद्भ्यः सर्वेभ्यः सगौरवं कृतज्ञतास्समर्पयति समितिः ।

समितेः सर्वे सदस्याः अस्यां पाठ्यपुस्तकरचनायां सम्पूर्णं सहकारं प्रदत्तवन्तः । तेभ्यः सर्वेभ्यः भ्रातृभ्यः भगिनीभ्यश्च हृत्पूर्वककृतज्ञताः समर्पयामि । पाठ्यपुस्तकमिदं यावच्छक्ति निर्दुष्टम् आकर्षकञ्च कृतं विद्यते । पुस्तकस्यास्य निर्माणे कृतभूरिसाहाय्येभ्यः समितेः सदस्येभ्यः, पदवीपूर्वशिक्षणविभागस्य अधिकारिभ्यः, टङ्कनकार्यं कृतवत्यै कु।। हेमलता बि. भगिन्यै, आकर्षकं मुखपुटं विरचितवते मैसूरुनगरस्य सन्तोष् क्रियेषन्स् संस्थाधीशाय श्री. रविशङ्करमहोदयाय, मुद्रणकर्तृभ्यः, अपि च अस्मिन् कर्मणि प्रत्यक्षतया परोक्षतया च सहकारं दत्तवद्भ्यः सर्वेभ्योऽपि सर्वेषां परतया भूयो वन्दनानि ।

**डा. वै.एस्. गायत्री**
अध्यक्षा
द्वितीयपदवीपूर्वकक्ष्या
संस्कृतपाठ्यपुस्तक-रचनासमितिः
पदवीपूर्वशिक्षणविभागः बेङ्गलूरु

# किमर्थं संस्कृतम् अध्येयम् ?

- भारतदेशस्य अमूल्या सम्पत् संस्कृतम् । संस्कृतेन भारतस्य विशेषः विश्वस्मिन् प्रतिष्ठापितः। अतः प्रपञ्चे भारतविषये आदरः वर्तते । तस्य आदरस्य रक्षणाय, वर्धनाय च संस्कृताध्ययनं भारतीयानाम् अस्माकं सर्वेषाम् आद्यं कर्तव्यम् ।

- वेदकालादारभ्य अद्यपर्यन्तं संस्कृतप्रभावः भारतस्य सर्वेषु क्षेत्रेषु अविच्छिन्नतया दृश्यते । तदा तदा कालप्रवाहे बौद्धिकाध्ययनेन सांस्कृतिकाध्ययने बाधितमिव संस्कृताध्ययनं पराक्रमेण प्रबाधितम् । अथापि संस्कृतं हित्वा भारतं कल्पयितुं न शक्यते । एवं भारतीयतायाः प्रत्यभिज्ञायते संस्कृतम् ।

- भारतस्य इतिहासः संस्कृतेन यथार्थतया प्रकाशितः । अतः स्वदेशस्य इतिहासाधिगमाय संस्कृतं प्रभवति ।

- भाषासु सर्वासु समर्था इयं वाणी । सहस्रेभ्यः वर्षेभ्यः अविरूपा भावनिवेदने यथावत् कुर्वन्ती विराजते । अतः भावानुगुणतया भाषितुं संस्कृतं साधनम् । तत्र तावत् संस्कृतभाषया सार्थकजीवननिर्वहणोपयोगिनः विषयाः समग्रतया निरूपिताः । अतः इतराभ्यः भाषाभ्यः स्वरूपतः प्रतिपाद्यविषयतश्च अतिरिच्यते । अतः संस्कृतम् अध्येयम् ।

- सर्वासामपि ज्ञानशाखानां न्यूनातिन्यूनं पीठिका अनया भाषया लभ्यते । संशोधनं कर्तुं संस्कृतभाषा उपकरोति । संशोधनं निरूपयितुं निरूपणातन्त्रम् अनुगृह्णाति इति कारणतः संस्कृतम् अभ्यसनीयम् ।

- ग्राहकाणाम्, उत्पादकानां, वितरकाणां च मिथः हितावहां वाणिज्यपद्धतिम् आविष्करोति अर्थशास्त्रं कौटिलीयम् । धर्माङ्गम् अर्थशास्त्रं विश्वक्षेमकरम् अवगन्तुं संस्कृतम् अध्येतव्यम्।

- समासेन विषयनिवेदनाय मार्गं कल्पयति । व्यासेन निरूपयितुं सरणिम् आवेदयति । अतः आमूलाग्रसंशोधनरुचीनां संस्कृतं मूलधनायते । अत एव सम्प्रत्यपि वैदेशिकाः संशोधनरताः संस्कृताभिमुखा दृश्यन्ते । यदि भारतीयाः वयं संस्कृतं न जानीमः तर्हि संस्कृतपिपठिषवः कम् अवलम्बयेयुः ?
- भारतस्य विविधतायाम् एकतास्थापकं संस्कृतमिति अध्येयं संस्कृतम् ।
- संस्कृतम् अन्वर्थकम् । अत एव अत्र परिशुद्धोच्चारणं, नियमानुगुणं पदवाक्यप्रयोगः, छन्दोनियमानुवर्तनम्, उदात्त - अनुदात्त - स्वरितस्वरानुसरणं च अस्मान् नियमयति । एतेन वचसः नियमपालनेन कायमनसोः नियमनमपि अनया भाषया प्रबोध्यते । तदेव त्रिकरणशुद्ध्युपायाय संस्कृतम् अध्येतव्यम् । येन रोगमुक्ताः, त्यागरक्ताः, परस्परं भावयन्तः विश्वहितैषिणो भूत्वा जीवितुं शक्नुमः । अतः न केवलं स्वदेहहिताय, स्वदेशहिताय वा किन्तु विश्वहिताय संस्कृतम् अवश्यम् अध्येतव्यम् ।

* * *

# भूमिका

**'मङ्गलम्'** ಸಾಮಾನ್ಯವಾಗಿ ಮಂಗಳದೊಂದಿಗೆ ಯಾವುದೇ ಕಾರ್ಯವನ್ನು ಆರಂಭಿಸುವುದು ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯ ಪ್ರತೀಕವಾಗಿದೆ. ತನ್ನಿಮಿತ್ತವಾಗಿ ಆಚಾರ್ಯತ್ರಯರ ಮೂರು ಪ್ರಾರ್ಥನಾ ಶ್ಲೋಕಗಳನ್ನು ಇಲ್ಲಿ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ.

**१. 'पुराणभारतम्'** ಎಂಬ ಪಾಠ್ಯಭಾಗವು ಪ್ರಸಿದ್ಧ ಪುರಾಣಗಳಿಂದ ಆಯ್ದುಕೊಂಡ ಶ್ಲೋಕಗಳಾಗಿವೆ. ಭಾರತೀಯ ಸಾಹಿತ್ಯದಲ್ಲಿ ಪುರಾಣಗಳು ಮಹತ್ತ್ವದ ಸ್ಥಾನವನ್ನು ಪಡೆದಿವೆ. ವೇದದ ಗೂಢಾರ್ಥವನ್ನು ಆಖ್ಯಾನ – ಉಪಾಖ್ಯಾನಗಳ ಮೂಲಕ ಸರಳಗೊಳಿಸಿ, ಪ್ರಕಾರಾಂತರದಿಂದ ವರ್ಣಿಸುತ್ತವೆ. ಧರ್ಮ, ದರ್ಶನ ಮತ್ತು ಲೋಕನೀತಿಗಳನ್ನು ತಿಳಿಸಿಕೊಡುವುದು, ಕ್ಷೇತ್ರ–ತೀರ್ಥಾದಿಗಳ ಮಹಿಮೆ, ಸೃಷ್ಟಿ- ಪ್ರಳಯಗಳ ವಿಚಾರ, ರಾಜ- ಋಷಿಗಳ ಚರಿತ್ರೆ ಇವುಗಳನ್ನು ನಿರೂಪಿಸುವುದು ಪುರಾಣಗಳ ಉದ್ದೇಶ. ಇಲ್ಲಿ ಬರುವ ದ್ವೀಪಗಳ, ಪರ್ವತಗಳ, ನದಿಗಳ, ತೀರ್ಥಕ್ಷೇತ್ರಗಳ, ನಗರಗಳ ವರ್ಣನೆಗಳಿಂದ ಭೌಗೋಳಿಕ ಜ್ಞಾನ ಪ್ರಾಪ್ತವಾಗುತ್ತದೆ. ಪುರಾಣಗಳು ಪ್ರಾಮಾಣಿಕವಾದ ಮತ್ತು ಆದರ್ಶವಾದ ಇತಿಹಾಸವಾಗಿದೆ. ಅಲ್ಲಿಯ ವರ್ಣನೆಗಳು ಕೇವಲ ಸಾಹಿತ್ಯಕ ವರ್ಣನೆಗೆ ಮಾತ್ರ ಸೀಮಿತವಾಗಿರದೆ, ಇಂದಿನ ಭಾರತದ ನೈಸರ್ಗಿಕ ಸಂಪನ್ಮೂಲಗಳೂ ಆಗಿರುವುದರಿಂದ ಅವುಗಳನ್ನು ಉಳಿಸಿ, ಬೆಳೆಸಿ, ಭರತಭೂಮಿಯ ಬಗ್ಗೆ ಗೌರವವನ್ನು ಮೂಡಿಸುವ ಉದ್ದೇಶದಿಂದ ಈ ಪಾಠ್ಯಭಾಗವನ್ನು ಸಂಗ್ರಹಿಸಲಾಗಿದೆ.

**२. 'परेषामपि रक्ष जीवितम्'** ಎಂಬ ಪಾಠ್ಯಭಾಗವನ್ನು ವರರುಚಿ ಎಂಬ ಕವಿಯಿಂದ ರಚಿತವಾದ 'ಸಿಂಹಾಸನದ್ವಾತ್ರಿಂಶಿಕಾ' ಎಂಬ ಕಥಾಸಂಕಲನದಿಂದ ಆರಿಸಿಕೊಳ್ಳಲಾಗಿದೆ. ಈ ಕಥೆಯಲ್ಲಿ ವಿಕ್ರಮಾದಿತ್ಯನಲ್ಲಿದ್ದ ಪರಹಿತಾಕಾಂಕ್ಷೆಯಿಂದ ಪ್ರಭಾವಿತನಾಗಿ ಜನ್ಮತಃ ಕ್ರೂರಿಯಾದ ರಾಕ್ಷಸನೂ ಪರಿವರ್ತಿತನಾಗುತ್ತಾನೆ. 'ಪರಹಿತಕ್ಕಾಗಿ ಬಾಳುವುದೇ ಶ್ರೇಷ್ಠಜೀವನ' ಎಂಬ ಸಂದೇಶವನ್ನು ಈ ಪಾಠ್ಯಭಾಗವು ಸಾರುತ್ತದೆ.

**३. 'निर्विमर्शा हि भीरवः'** ಎಂಬ ಪಾಠವನ್ನು ಸೋಮದೇವನ 'ಕಥಾಸರಿತ್ಸಾಗರಃ' ದ ತೃತೀಯ ಲಂಬಕದ ಪ್ರಥಮ ತರಂಗದಿಂದ ಆರಿಸಿಕೊಳ್ಳಲಾಗಿದೆ. ಇದು ಪ್ರಾಚೀನ ಪದ್ಯಕಾವ್ಯವನ್ನು ಪರಿಚಯಿಸುತ್ತದೆ. ಸಮಾಜದಲ್ಲಿ ವ್ಯಕ್ತಿಯ ಕೃತ್ರಿಮ ನಡತೆಯು ಅಪಮಾನವನ್ನು ಉಂಟು ಮಾಡುವುದು. ಯಾವುದೇ ಸಂದರ್ಭದಲ್ಲಿ ಸನ್ನಡತೆಯು ಶ್ರೇಯಸ್ಕರ. ಇದಕ್ಕೆ ದೈವವೂ ಪೂರಕವಾಗುತ್ತದೆಯೆಂಬ ನೀತಿಯನ್ನು ಸಾರುವಲ್ಲಿ ಈ ಪದ್ಯಭಾಗವು ಪ್ರಸ್ತುತವೆನಿಸುತ್ತದೆ.

**४. 'शून्या मेऽङ्गुलिः'** ಕಾಳಿದಾಸ ವಿರಚಿತ 'ಅಭಿಜ್ಞಾನ ಶಾಕುಂತಲ' ನಾಟಕದ ಐದನೆಯ ಅಂಕದಿಂದ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ. ಈ ಅಂಕವು ಅನೇಕ ಕಾರಣಗಳಿಂದಾಗಿ ಅತಿ ಮಹತ್ತ್ವವನ್ನು ಪಡೆದಿದೆ. ಮಹರ್ಷಿ ದುರ್ವಾಸರ ಶಾಪವು ದುಷ್ಯಂತನು ಶಕುಂತಲೆಯನ್ನು ಸಂಪೂರ್ಣವಾಗಿ ಮರೆಯುವಂತೆ ಮಾಡಿತು. ನಂತರ, ಕಣ್ವಾಶ್ರಮದಿಂದ ಋಷಿಕುಮಾರರ ಆಗಮನ, ದುಷ್ಯಂತನ ಭೇಟಿ, ಕಣ್ವರ ಸಂದೇಶ, ರಾಜನ ಧರ್ಮಪ್ರವೃತ್ತಿ ಹಾಗೂ ತೊಳಲಾಟ, ಶಕುಂತಲೆಯನ್ನು ಅವನು ತಿರಸ್ಕರಿಸುವುದು, ಮುಗ್ಧೆ ಶಕುಂತಲೆಯ ಸಹಜ ಕೋಪ ಇವೆಲ್ಲವೂ ಇಲ್ಲಿ ಮನೋಜ್ಞವಾಗಿ ಮೂಡಿ ಬಂದಿವೆ. ದುಷ್ಯಂತ–ಶಕುಂತಲೆಯರ ಜೀವನದಲ್ಲಿ ವಿಧಿಯ ಪ್ರಾಬಲ್ಯವನ್ನು ಕಾಣಬಹುದು.

೫. 'महाराणाप्रतापः' ಇತಿಹಾಸವನ್ನು ಅವಲೋಕಿಸಿದಾಗ ಭಾರತವು ಅನೇಕ ಶತಮಾನಗಳ ಕಾಲ ಪರಕೀಯರ ದಾಳಿಗೆ ತುತ್ತಾಗಿರುವುದು ಕಂಡು ಬರುತ್ತದೆ. ರಾಜರುಗಳಲ್ಲಿ ಇರುವ ಗುಂಪುಗಾರಿಕೆ, ಒಳಜಗಳಗಳ ದುರುಪಯೋಗದಿಂದ ನಮ್ಮನ್ನು ಪರರು ಆಳುವಂತಾಯಿತು. ಆದರೆ ಅನೇಕ ವೀರರು, ದೇಶಭಕ್ತರು ತಾವು ಎಂತಹ ಕಷ್ಟ ಅನುಭವಿಸಿದರೂ ಸಾಹಸ, ಶೌರ್ಯ, ಆತ್ಮಾಭಿಮಾನವನ್ನು ಬಿಡಲಿಲ್ಲ. ಶತ್ರುಗಳ ವಿರುದ್ಧ ಹೋರಾಡಿ, ಕ್ಷಾತ್ರತೇಜಸ್ಸನ್ನು ಬೆಳಗಿದ 'ಮಹಾರಾಣಾಪ್ರತಾಪಸಿಂಹ' ನಂತಹ ಆದರ್ಶ ದೇಶಭಕ್ತರನ್ನು ಪರಿಚಯಿಸುವ ಸಲುವಾಗಿ, ಹಾಗೂ ವಿದ್ಯಾರ್ಥಿಗಳಲ್ಲಿ ಆತ್ಮಾಭಿಮಾನ, ದೇಶಭಕ್ತಿಗಳನ್ನು ಜಾಗ್ರತಗೊಳಿಸುವ ಆಶಯದಿಂದ ಈ ಪಾಠವನ್ನು ಆಯ್ಕೆ ಮಾಡಿಕೊಳ್ಳಲಾಗಿದೆ.

೬. 'अनुरागोदयः' ಎಂಬ ಪಾಠವನ್ನು ಮಹಾಕವಿ ಬಾಣಭಟ್ಟನ 'ಕಾದಂಬರೀ' ಗದ್ಯಕಾವ್ಯದ ಮಹಾಶ್ವೇತಾವೃತ್ತಾಂತದಿಂದ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ. ಬಾಣಭಟ್ಟನ ಗದ್ಯರಸಪ್ರವಾಹವನ್ನು, ವರ್ಣನಾಚಾತುರ್ಯವನ್ನು, ಪದಸಂಪತ್ತನ್ನು ಪರಿಚಯಿಸುವ ಪಾಠ ಇದಾಗಿದೆ. ಮಹಾಶ್ವೇತಾ ಎಂಬ ಗಂಧರ್ವರಾಜಕುವರಿಯು, ತಾಪಸಕುಮಾರ ಪುಂಡರೀಕನಲ್ಲಿ ಅನುರಕ್ತಳಾಗುವ ಬಗೆ, ಪುಂಡರೀಕನೂ ಸಹ ತನ್ನಲ್ಲಿರುವ 'ಸಂಯಮ'ವನ್ನು ಮರೆತು ಅವಳಲ್ಲಿ ಅನುರಕ್ತನಾಗುವ ಪರಿ, ಮಿತ್ರನ ಮನೋವಿಕಾರವನ್ನು ತಿಳಿದ ಕಪಿಂಜಲನ ಹಿತೋಪದೇಶದ ಮಾತುಗಳ ವೈಖರಿ, ಪುಂಡರೀಕ–ಮಹಾಶ್ವೇತೆಯರ ಮಾತು–ಕೃತಿಗಳಲ್ಲಿ ಸೂಚಿತವಾಗುವ ಧ್ವನಿ – ಇವೆಲ್ಲವನ್ನೂ ಈ ಪಾಠವು ಪ್ರತಿಬಿಂಬಿಸುತ್ತದೆ.

೭. 'सा शान्तिः' ಎಂಬ ಶೀರ್ಷಿಕೆಯ ಕಥೆಯನ್ನು ಕೀರ್ತಿಶೇಷ ಡಾ|| ಬಿ.ಎಸ್.ರಾಮಕೃಷ್ಣರಾವ್‌ರವರ 'ಸಂಸ್ಕೃತಗದ್ಯಲೇಖಾವಲೀ' ಎಂಬ ಕೃತಿಯಿಂದ ಆಯ್ದುಕೊಳ್ಳಲಾಗಿದೆ. ಇಲ್ಲಿನ ಕಥಾನಾಯಕಿ 'ಶಾಂತಿ' ವಸ್ತ್ರಾಲಯವೊಂದರಲ್ಲಿ ಕಾರ್ಯ ನಿರ್ವಹಿಸುತ್ತಿದ್ದಳು. ತರುಣನೋರ್ವನು ಅವಳ ಸೌಂದರ್ಯಕ್ಕೆ ಮರುಳಾಗುತ್ತಾನೆ. ಅವನ ಮನಸ್ಸು ದೌರ್ಬಲ್ಯದಿಂದ ಚಂಚಲಗೊಳ್ಳುತ್ತದೆ. ಒಂದು ದಿನ ಶಾಂತಿಯೇ ಅವನ ಕಾರ್ಯಾಲಯಕ್ಕೆ ಆಗಮಿಸುತ್ತಾಳೆ. ಅಲ್ಲಿ ಅವಳ ಬದುಕಿನ ವಾಸ್ತವ ಸ್ಥಿತಿ, ಹಾಗೂ ಅವಳ ನಡೆ–ನುಡಿ, ಆ ತರುಣನ ಮನಸ್ಸನ್ನು ಪರಿವರ್ತಿಸುತ್ತದೆ. ಸಮಾಜದಲ್ಲಿ ಸ್ತ್ರೀಯರನ್ನು ಗೌರವದಿಂದ ಕಾಣಬೇಕು ಎಂಬ ಸಂದೇಶವನ್ನು ಈ ಕಥಾಭಾಗವು ತಿಳಿಸುತ್ತದೆ.

೮. 'विधिविलसितम्' ಎಂಬ ಈ ಪಾಠವನ್ನು ಡಾ|| ಕೆ.ಎಸ್. ನಾಗರಾಜನ್‌ರವರ 'ಗುರುಶಾಪಂ' ಎಂಬ ನಾಟಕದ ಮೊದಲನೆಯ ಅಂಕದಿಂದ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ. ಅಸಾಧಾರಣ ಗುರುಭಕ್ತಿಯನ್ನು ಹೊಂದಿರುವ ಕರ್ಣನು ಅಸ್ತ್ರವಿದ್ಯೆಯ ಪ್ರಾವೀಣ್ಯವನ್ನು ಸಂಪಾದಿಸಬೇಕೆಂಬ ಮಹದಾಸೆಯಿಂದ, ತಾನು ಬ್ರಾಹ್ಮಣಕುಮಾರ ಎಂದು ಹೇಳಿಕೊಂಡು ಪರಶುರಾಮರ ಬಳಿಗೆ ಬಂದು, ಶಿಷ್ಯತ್ವವನ್ನು ಸ್ವೀಕರಿಸಿ ಸೇವೆಯನ್ನು ಮಾಡುತ್ತಾನೆ. ಅವರ ಪ್ರೀತ್ಯಾದರಗಳಿಗೆ ಪಾತ್ರನಾಗಿ, ಭಾರ್ಗವಾಸ್ತ್ರವೇ ಮೊದಲಾದ ಅಸ್ತ್ರಗಳನ್ನು ಸಿದ್ಧಿಸಿಕೊಳ್ಳುತ್ತಾನೆ. ವಜ್ರಕೀಟ ಪ್ರಸಂಗದಲ್ಲಿ ಕೋಪಾವಿಷ್ಟರಾದ ಗುರುಗಳಿಂದ ಶಾಪಕ್ಕೆ ಗುರಿಯಾಗುತ್ತಾನೆ. 'ಅಸ್ತ್ರವಿದ್ಯೆಯಲ್ಲಿ ನೀನು ನನ್ನನ್ನೂ ಮೀರಿಸುವೆ' ಎಂದು ಆಶೀರ್ವದಿಸಿದ ಗುರುಗಳೇ ಕರ್ಣನಿಗೆ 'ನಿನ್ನ ಆಪತ್ಕಾಲದಲ್ಲಿ ಅಸ್ತ್ರಗಳು ಮರೆಯುವಂತಾಗಲಿ' ಎಂದು ಶಾಪ ನೀಡುವುದರಿಂದ, ಜೀವನದಲ್ಲಿ ವಿಧಿಯ ಪ್ರಭಾವವನ್ನು ಮೀರಲು ಯಾರಿಂದಲೂ ಸಾಧ್ಯವಿಲ್ಲ ಎಂಬ ಅಂಶವು ಈ ನಾಟಕದಲ್ಲಿ ಸೊಗಸಾಗಿ ನಿರೂಪಿತವಾಗಿದೆ.

೯. **'नीतिसारः'** ಎಂಬ ಪಾಠವನ್ನು ಸಂಸ್ಕೃತ ನೀತಿಗ್ರಂಥಗಳಿಂದ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ. ಕವಿಶ್ರೇಷ್ಠರು ತಮ್ಮ ಕೃತಿಗಳಲ್ಲಿ ಕಾವ್ಯ ಸೌಂದರ್ಯವರ್ಧನೆಗೋಸ್ಕರ ಮತ್ತು ಜೀವನದ ನೀತಿಯನ್ನು ಬೋಧಿಸುವುದಕ್ಕಾಗಿ ಅನೇಕ ನೀತಿಬೋಧಕ ಶ್ಲೋಕಗಳನ್ನು ರಚಿಸಿರುವರು. ಉತ್ತಮವಾದ ನೈತಿಕ, ಸಾಮಾಜಿಕ, ರಾಜಕೀಯ, ಧಾರ್ಮಿಕ, ಆಧ್ಯಾತ್ಮಿಕ ಬದುಕನ್ನು ನಿರೂಪಿಸಲು ಈ ನೀತಿ ಗ್ರಂಥಗಳು ದಾರಿದೀಪವಾಗಿವೆ. ಅವುಗಳನ್ನು ವಿದ್ಯಾರ್ಥಿಗಳು ತಮ್ಮ ದೈನಂದಿನ ಜೀವನದಲ್ಲಿ ಅಳವಡಿಸಿಕೊಳ್ಳುವುದರಿಂದ ಸದ್ಗುಣಗಳು ವೃದ್ಧಿಯಾಗುತ್ತವೆ.

೧೦. **'कृष्णशास्त्रीमहोदयः'** ಎಂಬ ಪಾಠದಲ್ಲಿ ಸಂಸ್ಕೃತಭಾಷೆಗೆ ವಿಶಿಷ್ಟ ಸೇವೆಯನ್ನು ಸಲ್ಲಿಸಿದ ಕನ್ನಡ ಸಾಹಿತ್ಯದ ಮಹನೀಯರನ್ನು ಪರಿಚಯಿಸಲಾಗಿದೆ. ಕನ್ನಡನಾಡಿನ ನೆಲ-ಜಲ-ಭಾಷೆಗಳ ಏಳಿಗೆಗಾಗಿ ಹಲವಾರು ಮಹನೀಯರು ತಮ್ಮ ಜೀವನವನ್ನೇ ಮುಡಿಪಾಗಿಟ್ಟಿದ್ದಾರೆ. ಅಂತಹವರಲ್ಲಿ ಪ್ರೊ. ಎ. ಆರ್. ಕೃಷ್ಣಶಾಸ್ತ್ರಿಗಳು ಅಗ್ರಗಣ್ಯರು. ಅವರ ವಿದ್ವತ್ತು, ಜೀವನದೃಷ್ಟಿ, ನಿಷ್ಪಕ್ಷಪಾತವಾದ ವಿಮರ್ಶೆ, ಶಿಷ್ಯವಾತ್ಸಲ್ಯ, ಜೀವನ ಕ್ರಮ, ಎಲ್ಲವೂ ಎಲ್ಲರ ಜೀವನದಲ್ಲೂ ಅಳವಡಿಸಿಕೊಳ್ಳಲೇ ಬೇಕಾದಂತಹ ಮೌಲ್ಯಗಳು. ಇವುಗಳನ್ನು ವಿದ್ಯಾರ್ಥಿಗಳು ತಮ್ಮ ಜೀವನದಲ್ಲಿ ಪರಿಪಾಲಿಸಿಕೊಂಡು ಬಂದರೆ, ಜೀವನವು ಹೆಚ್ಚು ಮೌಲ್ಯಯುತವಾಗುತ್ತದೆನ್ನುವ ಉದ್ದೇಶದಿಂದ ಶ್ರೀಯುತರ ವ್ಯಕ್ತಿಪರಿಚಯವನ್ನು ಮಾಡಲಾಗಿದೆ.

* * *

## उपन्यासकेभ्यः सूचनाः

१. शैक्षणिकवर्षे १२० बोधनावधयः निर्दिष्टाः । सप्ताहे ५ अवधयः । वर्षारम्भे सेतुपाठः कार्यः ।

२. 'मङ्गलम्' भागात् प्रश्नाः न भवन्ति ।

३. सर्वेषां श्लोकानाम् अन्वयः तत्तत् पाठस्य अन्ते प्रदत्तः । यत्र अर्थविशेषः वर्तते तत्र भावार्थोऽपि उल्लिखितः ।

४. अर्धवार्षिकपरीक्षायाः कृते प्रथमपाठादारभ्य षष्ठपाठपर्यन्तं प्रश्नाः प्रष्टव्याः।

५. भूमिका-योग्यताविस्तारपीठिकाभागेभ्यः प्रश्नाः परीक्षासु न प्रष्टव्याः, परं बोधनीयाः।

६. अस्मिन् पाठ्यपुस्तके व्याकरणांशाः संक्षेपतया प्रदत्ताः । विस्तृततया बोधनार्थम् उपलभ्यमानानि व्याकरणपुस्तकानि अनुसर्तुं प्रभवन्ति ।

७. 'अभ्यासः' इति भागे प्रदत्ताः प्रश्नाः एव सर्वासु परीक्षासु अनिवार्यतया प्रष्टव्याः ।

व्याकरणविषयकप्रश्नाः अभ्यासपुस्तकात् एव स्वीकर्तव्याः । तत्र अष्टविधप्रश्नाः सन्ति । सप्त एव प्रष्टव्याः । (व्याकरणदोषं परिहरत अथवा पदपरिचयं कुरुत, अनयोः एक एव प्रष्टव्यः।)

८. अनुवादविषयकप्रश्नाः, पत्रलेखनम् अपि अभ्यासपुस्तकात् एव भवेयुः ।

९. अर्थग्रहणार्थं ५ अङ्कानां कृते दीयमानः प्रश्नः पाठ्यपुस्तकात् मार्गदर्शिनी प्रश्नपत्रिकायाः वा न स्वीकर्तव्यः । पठ्येतरः परिच्छेद एव भवेत् ।

१०. छात्राणां सौलभ्यार्थं परिशिष्टभागे व्याकरणस्य केचन नियमाः दत्ताः ।

* * *

# विषयानुक्रमणिका


| | | |
|---|---|---|
| | **प्रास्ताविकम्** | **i** |
| | **भूमिका** | **v** |
| | मङ्गलम् | 1 |
| १. | पुराणभारतम् | 2 |
| २. | परेषामपि रक्ष जीवितम् | 11 |
| ३. | निर्विमर्शा हि भीरवः | 17 |
| ४. | शून्या मेऽङ्गुलिः | 24 |
| ५. | महाराणाप्रतापः | 42 |
| ६. | अनुरागोदयः | 49 |
| ७. | सा शान्तिः | 58 |
| ८. | विधिविलसितम् | 65 |
| ९. | नीतिसारः | 72 |
| १०. | कृष्णशास्त्रीमहोदयः | 79 |

# व्याकरणविभागः


| | | |
|---|---|---|
| १. | सन्धिः | 86 |
| २. | शब्दरूपाणि | 89 |
| ३. | क्रियापदानि | 95 |
| ४. | कृदन्ताः | 99 |
| ५. | समासाः | 101 |
| ६. | कारकाणि | 105 |
| ७. | प्रयोगाः | 106 |
| ८. | अलङ्काराः | 109 |
| | **अभ्यासपुस्तकम्** | 111 |
| ९. | भाषान्तरपाठाः | 133 |
| १०. | अर्थग्रहणम् | 137 |
| ११. | पत्रलेखनम् | 138 |
| | **परिशिष्टभागः** | 143 |
| १२. | कोष्ठकः | 164 |
| १३. | मार्गदर्शिनी प्रश्नपत्रिका - १ | 166 |
| **१४.** | **मार्गदर्शिनी उत्तरपत्रिका - १** | **172** |
| १५. | मार्गदर्शिनी प्रश्नपत्रिका - २ | 199 |
| १६. | मासिकपाठ्यविभागः (Class chart) | 207 |

# मङ्गलम्

**अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् ।**
**भूतदयां विस्तारय तारय संसारसागरतः ।।** (विष्णुषट्पदी-श्री आदिशङ्कराचार्याः)

ಜಗದೊಡೆಯನಾದ ವಿಷ್ಣುವೇ ! ನನ್ನ ಅವಿನಯವನ್ನು ದೂರ ಮಾಡು, ಮನಸ್ಸನ್ನು ಹದಗೊಳಿಸು. ಪ್ರಾಪಂಚಿಕ ಆಸೆಯೆಂಬ ಮರೀಚಿಕೆಯನ್ನು ನಾಶಗೊಳಿಸು. ಪ್ರಾಣಿದಯೆಯನ್ನು ವರ್ಧಿಸು. ಸಂಸಾರಸಾಗರದಿಂದ ನನ್ನನ್ನು ದಾಟಿಸು.

Oh! Vishnu, the Lord of the universe, help me to keep away from disobedience and control my mind. Detach me from the mirage of worldly desire. Increase my kindness towards all. Oh! Lord, enable me to cross the ocean of life.

**तवानुभूतिसम्भूतप्रीतिकारितदासताम् ।**
**देहि मे कृपया नाथ न जाने गतिमन्यथा ।।** (श्रीरङ्गगद्यम्-श्री रामानुजाचार्याः)

ಹೇ ಭಗವಂತನೆ, ನಿನ್ನ ಅನುಗ್ರಹದಿಂದ ಉಂಟಾದ, ಪ್ರೀತಿಯನ್ನುಂಟುಮಾಡುವ, ಸೇವಕಭಾವನೆಯನ್ನು ಕೃಪೆತೋರಿ ನನಗೆ ನೀಡು. ನೀನಲ್ಲದೆ ನನಗೆ ಬೇರೆ ಗತಿಯಿಲ್ಲ.

Oh ! Almighty ! May you bestow upon me with your special grace, the feeling of bondage. Nothing is there other than You.

**कुरु भुङ्क्ष्व च कर्म निजं नियतं हरिपादविनम्रधिया सततम् ।**
**हरिरेव परो हरिरेव गुरुः हरिरेव जगत्पितृमातृगतिः ।।** (द्वादशस्तोत्रम्-श्री मध्वाचार्याः)

ಹರಿಯೇ ಜಗತ್ತಿನ ತಾಯಿ, ತಂದೆ, ಗುರು ಮತ್ತು ದೈವವು. ಹರಿಯೇ ಸರ್ವಶ್ರೇಷ್ಠ. ಆದ್ದರಿಂದ ಭಕ್ತಿಯಿಂದ ನಿರಂತರವಾಗಿ ವಿಹಿತವಾದ ನಿನ್ನ ಕರ್ಮಗಳನ್ನು ಆಚರಿಸು ಮತ್ತು ನಿನ್ನ ಕರ್ಮಫಲವನ್ನು ಅನುಭವಿಸು.

Hari is the father, mother and the ultimate resort. He is the supreme. So with full devotion unto Hari,continue to do your duties and enjoy the fruits of the deeds accordingly.

* * *

# १. पुराणभारतम्

(विविधपुराणेभ्यः सङ्गृहीतः)

S3E8S9

## पीठिका

भारतीयसाहित्ये अष्टादशपुराणानि प्रसिद्धानि । तेषु पुराणेषु कर्म, ज्ञानं, भक्तिः, तत्त्वं च इत्यादयः बहवो विषयाः प्रस्तुताः । तथा पुराणभारतं विशेषतः वर्णितम् । प्रस्तुतपद्यभागः ब्रह्माण्ड- वराह- मार्कण्डेय- पद्म- नारदीय- विष्णुधर्मोत्तर- ब्रह्मपुराणेभ्यः सङ्गृहीतः । भारतवर्षस्य भौगोलिकचित्रणं यथापुराणं प्रदत्तम् ।

**उत्तरं यत्समुद्रस्य हिमवद्दक्षिणं च यत् ।**
**वर्षं तद्भारतं नाम यत्रेयं भारती प्रजा** ॥ १ ॥

**भरणाच्च प्रजानां वै मनुर्भरत उच्यते ।**
**निरुक्तवचनाच्चैवं वर्षं तद्भारतं स्मृतम्** ॥ २ ॥

**इतः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते ।**
**न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते** ॥ ३ ॥

**भारतस्यास्य वर्षस्य नवभेदान्निबोधत ।**
**समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम्** ॥ ४ ॥

**इन्द्रद्वीपः कशेरुमान् ताम्रवर्णो गभस्तिमान् ।**
**नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ वारुणः** ॥ ५ ॥

**अयं तु नवमस्तेषां द्वीपस्सागरसंवृतः ।**
**योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरात्** ॥ ६ ॥

**महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ।**
**विन्ध्यश्च पारियात्रश्च इत्येते कुलपर्वताः** ॥ ७ ॥

**गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापरा ।**
**यमुनाश्च शतद्रुश्च वितस्तेरावती कुहूः** ॥ ८ ॥

**विश्वस्य मातरस्सर्वाः सर्वाश्चैव महाफलाः ।**
**तथा नद्यः स्वप्रकाशाः शतशोऽथ सहस्रशः ॥ ९ ॥**

**तास्तु नद्यः सरस्वत्यः सर्वा गङ्गास्समुद्रगाः ।**
**विश्वस्य मातरस्सर्वाः जगत्पापहराः स्मृताः ॥ १० ॥**

**कापिले गोग्रहे सोमे तीर्थे चालाबु संज्ञिते ।**
**मृत्युञ्जये क्रोडतीर्थे वासुके सिद्धकेश्वरे ॥ ११ ॥**

**पाण्ड्याश्च केरलाश्चैव चोला कुल्यास्तथैव च ।**
**सेतुका मूषिकाश्चैव क्षपणा वनवासिकाः ॥ १२ ॥**

**ज्ञेयं तद्भारतं वर्षं सर्वकर्मफलप्रदम् ।**
**अत्र कर्माणि कुर्वन्ति त्रिविधानि तु नारद ॥ १३ ॥**

**तत्फलं भुज्यते चैव भोगभूमिष्वनुक्रमात् ।**
**भारते तु कृतं कर्म शुभं वाशुभमेव च ॥ १४ ॥**

**आफलक्षयणं विप्र भुज्यतेऽन्यत्र जन्तुभिः ।**
**अद्यापि देवा इच्छन्ति जन्म भारत भूतले ॥ १५ ॥**

**आयुः प्रमाणं लभते हि राजन् द्वीपेषु सर्वेषु नरो मयोक्तम् ।**
**कृत्वा शुभं कर्म तु भारतेऽस्मिन् द्वीपेषु सर्वेषु नराः प्रयान्ति ॥ १६ ॥**

**श्लोकान्वयः -**

1. समुद्रस्य यत् उत्तरं, यत् च हिमवद्दक्षिणं, तत् वर्षं भारतं नाम, यत्र इयं प्रजा भारती ।
2. मनुः वै प्रजानां भरणात् च भरत उच्यते । यत् वर्षम् एवं निरुक्तवचनात् भारतं स्मृतम् ।
3. स्वर्गः च मोक्षः च मध्यः (अन्तरिक्षः) च अन्तः (पाताललोकः) च इत गम्यते । भूमौ अन्यत्र मर्त्यानां कर्म न विधीयते खलु।
4. अस्य भारतवर्षस्य नवभेदान् निबोधत । ते समुद्रान्तरिताः तु परस्परम् अगम्याः ज्ञेयाः।
5. अथ तु इन्द्रद्वीपः, कशेरुमान्, ताम्रवर्णः, गभस्तिमान्, नागद्वीपः तथा सौम्यः, गान्धर्वः, वारुणः।

6. तेषां सागरसंवृतः अयं तु नवमः द्वीपः । अयं द्वीपः तु दक्षिणोत्तरात् योजनानां सहस्रम् ।

(ब्रह्माण्डपुराणम् -अध्यायः १६- श्लोकाः ५-१०)

सूतमुनिः ऋषीन् प्रति अवदत् ।

7. महेन्द्रः, मलयः, सह्यः, शुक्तिमान्, ऋक्षपर्वतः,विन्ध्यःच पारियात्रःच इति एते कुलपर्वताः ।

(वराहपुराणम् - अध्यायः ८५ - श्लोकः ३)

रुद्रः उवाच ।

8. गङ्गा, सरस्वती, सिन्धुः, चन्द्रभागा, च तथा यमुना च शतद्रुः च वितस्ता च इरावती अपरा कुहूः च । (मार्कण्डेयपुराणम् - अध्यायः ५४- श्लोकः १७)

मार्कण्डेयः क्रौष्टुकिं प्रति अवदत् ।

9. सर्वाः विश्वस्य मातरः, सर्वाः महाफलाः च एव । तथा अथ शतशः सहस्रशः सर्वाः नद्यः स्वप्रकाशाः । (पद्मपुराणम् - अध्यायः ६ - श्लोकः ३२)

सूतमुनिः ऋषीन् प्रति अवदत् ।

10. ताः सर्वाः नद्यः तु सरस्वत्यः गङ्गाः समुद्रगाः । सर्वाः जगत्पापहराः विश्वस्य मातरः स्मृताः।

(ब्रह्माण्डपुराणम् -अध्यायः १६- श्लोकः-३९)

सूतमुनिः ऋषीन् प्रति अवदत् ।

11. कापिलतीर्थः, गोग्रहः, सोमतीर्थः च अलाबुसंज्ञितः तीर्थः, मृत्युञ्जयः, क्रोडतीर्थः, वासुकः, सिद्धकेश्वरः । (ब्रह्मपुराणम् - अध्यायः ४२- श्लोकः-६)

ब्रह्मा ऋषीन् प्रति अवदत् ।

12. पाण्ड्याः, केरलाः, चोलाः, कुल्याः च तथा सेतुकाः, मूषिकाः, क्षपणाः, वनवासिकाः च एव ।

(ब्रह्माण्डपुराणम् -अध्यायः १६- श्लोकः-५६)

सूतमुनिः ऋषीन् प्रति अवदत् ।

13. हे नारद, तत् भारतं वर्षं सर्वकर्मफलप्रदं ज्ञेयम् । अत्र तु त्रिविधानि कर्माणि कुर्वन्ति ।

14. भारते तु शुभम् अशुभं वा कर्म कृतं, तत्फलं चैव अनुक्रमात् भोगभूमिषु भुज्यते एव ।

15. हे विप्र, जन्तुभि:आफलक्षयणम् अन्यत्र भुज्यते । देवाः अद्यापि भारतभूतले जन्म इच्छन्ति ।

(नारदीयपुराणम् -अध्यायः ३- श्लोका:-४४-४६)

शौनकः नारदं प्रति अवदत् ।

16. हे राजन्, नरः मयोक्तम् आयु:प्रमाणं सर्वेषु द्वीपेषु लभते । अस्मिन् भारते शुभं कर्म कृत्वा नराः सर्वेषु द्वीपेषु प्रयान्ति । (प्रकर्षेण यान्ति इत्युक्ते कष्टेन नौकादि यानैः गच्छन्ति।

(विष्णुधर्मोत्तरपुराणम् -अध्यायः ८- श्लोकः-१७)

मार्कण्डेयः वज्रमहाराजं प्रति अवदत् ।

## शब्दार्थः - टिप्पणी

**पुराणभारतम्** : पुराणेषु वर्णितं भारतम् ।

**भारतवर्षम्** :भरतसम्बन्धि वर्षम्- ಭಾರತ ವರ್ಷವು ಜಂಬೂ ದ್ವೀಪದೊಳಗಿನ ಒಂಭತ್ತು ಭಾಗಗಳಲ್ಲೊಂದು–one of nine parts of Jambu Dwipa

**भरणात्** : रक्षणकरणात्-ರಕ್ಷಣೆ ಮಾಡಿದ್ದರಿಂದ– By protecting

**निरुक्तवचनम्** :पदनिष्पत्तिः- ಪದವ್ಯುತ್ಪತ್ತಿ–etymology

**समुद्रान्तरिता** :समुद्रात् अन्तरिताः-ಸಮುದ್ರದಿಂದ ಪ್ರತ್ಯೇಕಿಸಲ್ಪಟ್ಟ–seperated by oceans

**इन्द्रद्वीपः** : इन्द्र इति द्वीपः ।

**सागरसंवृतः** : सागरैः संवृतः ।

**भारतवर्षस्य नवभेदाः** : शतश्रृङ्गः भरतचक्रवर्तिनः पुत्रः आसीत् । सः इन्द्रद्वीपः, कसेरु:, ताम्रद्वीपः, गभस्तिमान्, नागः, सौम्यः, गन्धर्वः, वरुणः च पुत्रान्, तथा कुमारी नाम पुत्रीम् अलभत । सः भरतखण्डं नवविभागं कृत्वा, स्वपुत्रेभ्यः तथा पुत्र्यै च दत्तवान् ।

**सप्तकुलपर्वताः** : अत्र प्रदक्षिणक्रमेण पर्यायद्वीपे भारते विद्यमानाः सप्तकुलपर्वताः उक्ताः ।

१. महेन्द्रः - उत्तरप्रदेशस्य डेहराडूनतः अग्रे प्रसृता पर्वतश्रेणी । ओरिस्सा प्रदेशे 'कालिञ्जर्' इति नाम्ना प्रसिद्धः । महानदीगोदावर्योः अन्तः विद्यमाना पर्वतश्रेणी ।

२. मलयः - सह्यपर्वतस्य दक्षिणभागस्य अग्रभागः मलयपर्वतः इति प्रसिद्धः । कर्णाटकराज्ये अस्ति । कृष्णानद्याः अधस्तात् प्रसृतः ।

३. सह्य : - कर्णाटके पश्चिमघट्टः इति प्रसिद्धः । नीलगिरिप्रदेशात् सह्याद्रि पृथग्भूय पश्चिमतटपर्यन्तं पूर्वाभिमुखं प्रसृतः ।

४. शुक्तिमान् - विन्ध्यपर्वतस्य उपपर्वतः। उज्जयिनी समीपे विन्ध्यात् पश्चिमे प्रसृता पर्वतश्रेणी ।

५. ऋक्षः - विन्ध्यात् पूर्वे अस्ति । सात्पुरमहादेवपर्वतश्रेणी इति श्रूयते ।

६. विन्ध्यः - मध्यप्रदेशे 'थार्' मण्डले स्थितस्य गोमनपुर शिखरात् शतं किलोमीटर्पर्यन्तं प्रसृतः पर्वतः अयम् । उत्तरभारतदक्षिणप्रस्थभूम्योः विभाजकरेखा अयम् इति प्रसिद्धः।

७. पारियात्रः - अरावली पर्वतश्रेणी इति प्रसिद्धः । विन्ध्यपर्वतस्य पश्चिमभागात् नर्मदानद्याः उगमपर्यन्तं प्रसृता एषा श्रेणी । गुजरात् राज्यतः प्रारभ्य देहलीदक्षिणभागपर्यन्तं प्रसृतः पर्वतः ।

**भारतवर्षस्य नद्यः**

१. गङ्गा - उत्तरप्रदेशस्य हिमालये गङ्गोत्री नाम भागे 'गोमुखं' प्रदेशः अस्याः उगमस्थानम्। उत्तरप्रदेशः, पश्चिमबङ्गालः, राजस्थानं, हिमाचलप्रदेशः, बिहारः, मध्यप्रदेशः, हरियाणः, देहली इत्यादि प्रदेशेषु प्रवहन्ती बङ्गालसागरं प्रविशति ।

२. सरस्वती - हिमालये जन्म प्राप्य, पञ्जाब्-राजस्थानद्वारा अरब्बीसमुद्रं प्रति प्रवहति ।

३. सिन्धुः - मानससरोवरे अस्याः उगमः । एषा काश्मीरं प्रविश्य, राजस्थानद्वारा पाकिस्थानं प्रविशति ।

४. चन्द्रभागा - हिमालयात् पञ्जाब्नगरे प्रवहति । चन्द्र-भाग नद्योः सङ्गमा एषा । इयं नदी काश्मीरे 'चिनाब्' इत्यपि प्रख्याता ।

५. यमुना - उत्तरकाश्यां 'यमुनोत्री' अस्याः उगमस्थानम् । हरियाण- उत्तरप्रदेशराज्ययोः मध्ये प्रवहति ।

६. शतद्रुः - पञ्जाब् मध्ये पञ्चनदीषु एकतमा । हिमाचलप्रदेशे अपि प्रवहति । इदानीं 'सट्लेज्' इति नाम्ना प्रसिद्धा ।

७. वितस्ता - पञ्जाब् मध्ये पञ्चनदीषु एकतमा । सम्प्रति 'झीलम्' इति नाम्ना प्रसिद्धा । (Jhelum)

८. इरावती - पञ्जाब् मध्ये पञ्चनदीषु एकतमा । हिमाचलप्रदेशे 'बङ्गातः' निर्गता एषा । हिमाचलप्रदेश-काश्मीर-पञ्जाब्द्वारा पाकिस्थानं प्रविशति । प्रकृते 'राबि' इति नाम्ना प्रसिद्धा ।

९. कुहू - प्लक्षद्वीपे सप्तनदीषु एका । 'काबुल्' नामान्तरम् ।

**सरस्वत्यः** : सरांसि सन्ति आसु इति-ಅನೇಕ ಉಪನದಿಗಳನ್ನು ಹೊಂದಿರುವ-a river having many tributaries

**तीर्थक्षेत्राणि** : वैतरणी इति नदी ओरिस्सा प्रदेशे कटक् प्रान्ते पूर्वकरावल्यां प्रवहति, तत्र समीपे कपिल, गोग्रह इत्यादि अष्टतीर्थक्षेत्राणि सन्ति ।

**कुल्यादयः** : विविधवृत्तिम् आदृत्य जीवन्तः जनाङ्गविशेषाः यथा कुल्या जलेन कृषिं कुर्वाणाः कुल्याः । एवमेव वृत्तिसूचकाः जनाङ्गाः ।

**त्रिविधानि कर्माणि** : नित्यानि, नैमित्तिकानि, काम्यानि ।

## अभ्यासः

### I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।

1. कः भरतः इति उच्यते ?
2. भारतवर्षे कति कुलपर्वताः सन्ति ?
3. विश्वस्य मातरः काः ?
4. अद्यापि देवाः कुत्र जन्म इच्छन्ति ?

### II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. भारतवर्षम् इति किमर्थं कथ्यते ?
2. भारतवर्षस्य प्रसिद्धपञ्चनदीनां नामानि लिखत ।
3. पञ्चद्वीपानां नामानि लिखत ।
4. पुराणभारते उल्लिखितानि तीर्थक्षेत्राणि कानि ?

### III मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।

1. उत्तरं यत् समुद्रस्य ......... दक्षिणं च यत् ।
2. इतः स्वर्गश्च ........ मध्यश्चान्तश्च गम्यते ।
3. द्वीपेषु सर्वेषु ..... प्रयान्ति ।

| नराः, हिमवत्, मोक्षश्च |
|---|

**IV पाठनाम उल्लिख्य अधोनिर्दिष्टसङ्ख्याकानां श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत ।**

**श्लोकसङ्ख्याः - ४,६,९,१३**

**V दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. पुराणेषु भारतं कथं वर्णितम् ?

## — योग्यताविस्तारः —

### भूपटः - १

**पुराणेषु वर्णितानाम् नदीपर्वतानाम् अवगमनार्थं, तदा अधुना च तेषां नाम ज्ञातुं च भूपटद्वयं प्रदत्तम् अत्र ।**



## भूपटः - २


निषधपर्वतः
कैलासः
वितस्ता
चन्द्रभागा
गान्धारः
शतद्रुः
सिन्धुः
सरस्वती
मानससरोवरः
यमुना
पारियात्रः
हिमालयः
गङ्गा
वेत्रवती
उज्जयिनी
तः
आ
नर्मदा
विन्ध्यपादः
व
महोदधिः
सातपुरपर्वतः
र्या
गोदावरी
कृष्णा
सह्यः
दक्षिणोदधिः
महोदधिः
कावेरी
पाण्ड्यः

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरेदिति ।।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ।।

निस्ताराय तु लोकानां स्वयं नारायणः प्रभुः ।
व्यासरूपेण कृतवान् पुराणानि महीतले ।।

**अनुशंसितग्रन्थाः**


1. ಭಾರತದ ನದಿಗಳು - ಟಿ. ಗಿರಿಜ - ನಿಹಾರಿಕಾ ಪ್ರಕಾಶನ-2007
2. ಯುಗಯಾತ್ರೀ ಭಾರತೀಯ ಸಂಸ್ಕೃತಿ-ಸಂಪುಟ-1, ಡಾ।। ಎಸ್. ರಾಧಾಕೃಷ್ಣನ್, ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾನಿಲಯ
3. ಪುರಾಣಭಾರತಕೋಶ-ಪಂಡಿತ ಐರೋಡಿ ಯಜ್ಞನಾರಾಯಣ ಉಡುಪ-ಸಪ್ನ ಬುಕ್ ಹೌಸ್-2012.
4. पुराणानि-ब्रह्माण्डपुराणम्, वराहपुराणम्, मार्कण्डेयपुराणम्, पद्मपुराणम्, ब्रह्मपुराणम्, नारदीयपुराणम्, विष्णुधर्मोत्तर पुराणम्-जयचामराजेन्द्रग्रन्थमाला ।


* * *

# २. परेषामपि रक्ष जीवितम्

(सिंहासनद्वात्रिंशिका-वररुचिः)

X8H5E3

## पीठिका

'सिंहासनद्वात्रिंशिका' नामककथासङ्ग्रहे द्वात्रिंशत् कथाः सन्ति । अस्य ग्रन्थस्य कर्ता वररुचिर्नामा कश्चित् कविरिति श्रूयते । 'परेषामपि रक्ष जीवितम्' इति शिरोनामाङ्किते अस्मिन् पाठ्यभागे विक्रमादित्यस्य परदुःखस्पन्दनगुणः हृदयङ्गमरीत्या निरूपितो वर्तते । एषा कथा 'परोपकाराय शरीरलाभः' इति नीतिं बोधयति । "कस्यापि जन्तोः हिंसा न कार्या" इति सन्देशः अत्र सुस्पष्टः वर्तते ।

**अथ भोजे समाचङ्क्रम्यमाणे सिंहासने पुत्थलिका अन्या कथयति-भो राजन् ! श्रूयताम्। विक्रमे राज्यं शासति भूमण्डले, पिशुनः तस्करः पापकर्मनिरतश्च नासीत् । अन्यच्च, यस्य राज्ञः सदा राज्यभारचिन्ता बलवद्वैरिविजयचिन्ता च अस्ति स रात्रौ निद्रामपि नाधिगच्छति। उक्तञ्च- 'चिन्तातुराणां न सुखं न निद्रा' इति ।**

**अयं विक्रमादित्यो राजा तथाविधो न भवति । सर्वान् अर्थिभूभुजः स्वपादपद्माश्रितान् विधाय आज्ञाप्रदानेन राज्यं करोति ।**

**एकदा स राज्यभारं मन्त्रिषु निधाय स्वयं योगिवेषेण देशान्तरं निर्गतः । यत्रात्मनश्चित्तस्य सुखं भवति तत्र कतिचिद्दिनानि तिष्ठति, यत्राश्चर्यं पश्यति तत्रापि कालं नयति । एवं पर्यटन् एकस्मिन् दिवसे यावत् सः महारण्यमध्यं प्राविशत्, तावत् सूर्योऽस्तंगतः । अतः राजा वृक्षमूलमेकमाश्रित्य रात्रौ स्थितः। तस्य वृक्षस्योपरि वृद्धः चिरञ्जीवीनामा कश्चित् पक्षिराज आसीत् । तस्य पुत्राः पौत्राश्च देशान्तरं गत्वा, स्वोदरं पूरयित्वा, सायंकाले प्रत्येकम् एकैकं फलमादाय वृद्धाय तस्मै चिरञ्जीविने प्रतिदिनं प्रयच्छन्ति स्म ।**

**ततो रात्रौ चिरञ्जीवी सुखेनोपविष्टः तान् पक्षिणः अपृच्छत् । राजाऽपि वृक्षमूले स्थितस्तद्वचः शृणोति । 'भोः पुत्राः ! युष्माभिर्नानादेशान् पर्यटद्भिः किं विचित्रं दृष्टम् ?' तत्र एकेन पक्षिणा भणितम्- 'मया किमप्याश्चर्यं न दृष्टम्, परमद्य मम चेतसि महद्दुःखं भवति' । चिरञ्जीविनोक्तम्- 'तत् कथय किं निमित्तं दुःखस्य ?' तेनोक्तम्- 'केवलं कथनेन किं भवति ?' वृद्धेनोक्तम्- 'भोःपुत्र! यो दुःखी सः सुहृदि दुःखं निवेद्य सुखी भवति' इति ।**

तस्य वाक्यं श्रुत्वा स दुःखकारणं कथयति-''भोः तात ! श्रूयताम्-अस्ति उत्तरदेशे शैवलघोषो नाम पर्वतः। तत्पर्वतसमीपे पलाशनगरमस्ति । तस्मिन्, पर्वते स्थितः कश्चित् राक्षसः प्रतिदिनं नगरमागत्य सम्मुखायान्तं यं कञ्चनमानुषं, स्त्रियं, बालकादिकं वा पर्वते नीत्वा भक्षयति। एकदा स नगरवासिभिः जनैः उक्तः-'भो बकासुर ! त्वं यथेच्छं सम्मुखपतितं यं कमेवं मा भक्षय, वयं तुभ्यं प्रतिदिनमाहरार्थमेकं मानवं दास्यामः' इति । तद्वचः तेनाङ्गीकृतम्।

तदनन्तरं तत्रत्याः जनाः प्रतिदिनम् अनुक्रमं गृहक्रमेण एकैकं मानवं तस्मै प्रयच्छन्ति । एवं महान् कालो गतः । अद्य पूर्वजन्मनि सञ्जातसौहार्दस्य मम मित्रस्य कस्यचित् ब्राह्मणस्य पर्यायः समायातः । तस्य एक एव पुत्रः । पुत्रं ददाति चेत् सन्ततिच्छेदो भविष्यति, आत्मानं प्रयच्छति चेत् भार्या विधवा भविष्यति, वैधव्यं पुनर्महद्दुःखम् । पुत्रीं दास्यति चेत् आश्रमभ्रंशो भवति । तेषां परेषां दुःखेन अहं महद्दुःखी'' इति ।

तस्य वचनं श्रुत्वा तत्रत्यैः पक्षिभिर्भणितम्-अहो अयमेव सुहृत् यः सुहृदो दुःखेन स्वयं दुःखी भवति । एतदेव मित्रत्वम् । उक्तश्च-'सुखिते सुखी सुहृदि, यः दुःखिनि दुःखी च स बन्धुर्भवति' इति पक्षिणो वचः श्रुत्वा, विहङ्गरवार्थविज्ञः राजा तत्र नगरे वध्यशिलासमीपं गतः। तत्र ब्राह्मणं निरीक्ष्य, अभयं दत्वा, स्वगृहं सम्प्रेष्य च तत्समीपस्थे सरोवरे स्नात्वा वध्यशिलायाम् उपाविशत्।

तस्मिन् समये राक्षसः समागत्य प्रहसितवदनं पुरुषं दृष्ट्वा विस्मितः तं पृच्छति-'भो महासत्त्व ! अत्र शिलायां प्रतिदिनं यः उपविशति, स मदागमनात् पूर्वमेव म्रियते । त्वं पुनः महाधैर्यसम्पन्नः प्रहसितवदनो दृश्यसे । यस्य मरणकालः समायातः, तस्येन्द्रियाणि ग्लानिं प्राप्नुवन्ति। त्वं पुनः अधिकां कान्तिं प्राप्य प्रहससि । तर्हि कथय को भवान् ?' इति ।

राजा भणति 'मया परार्थमेतत् शरीरं दीयते स्वेच्छया, अतो न मे कापि ग्लानिः । भवतु, किमनेन विचारेण तव ? त्वमात्मनः समीहितं कुरु' इति । तदा राक्षसः मनसा चिन्तयति 'अहो! साधुरयं यः आत्मनः सुखभोगेच्छां विहाय परदुःखेन दुःखी भूत्वा अत्र एति ।

उक्तश्च- त्यक्त्वात्मसुखदुःखेच्छां सर्वसत्त्वसुखैषिणः ।
भवन्ति परदुःखेन साधवोऽत्यन्तदुःखिनः ।। १।। इति ।

एवं विचार्य स राजानमब्रवीत्-'भो महापुरुष ! त्वं सर्वस्यार्तिहरो गुरुः, यतः त्वं विश्वस्य आर्तिं परिहरसि । परार्थं शरीरं प्रयच्छतस्तवैव एतच्छरीरं श्लाघ्यम् ।

कुतः- पशवोऽपि हि जीवन्ति केवलं स्वोदरम्भराः ।
तस्यैव जीवितं श्लाघ्यं यः परार्थे हि जीवति ।। २ ।।

भवादृशां परोपकारिणामेतच्चित्रं न भवति । भोः! महासत्त्व ! अनेनैव परोपकारेण त्वं सर्वाः सम्पदः प्राप्नोषि । त्वयि अहं तुष्टोऽस्मि, वरं वृणीष्व' इति। राज्ञोक्तम्- 'भो राक्षस ! त्वं यदि मयि प्रसन्नोऽसि, तर्हि अद्यप्रभृति मनुष्यभक्षणं परित्यज । अन्यमपि मया अभिधीयमानम् उपदेशं शृणु । यथा -

भवज्जीवितमात्मनः प्रियं तथा परेषामपि जीवितं प्रियम् ।
निरीक्ष्यते जीवितमात्मनो यथा तथा परेषामपि रक्ष जीवितम्' ।। ३ ।। इति ।

राज्ञा प्रबोधितः राक्षसः तदा प्रभृति जीवमारणं तत्याज । राजा च स्वनगरीं प्रत्यगात्। इमां कथां कथयित्वा पुत्थलिका भोजराजं प्रति अब्रवीत्- 'त्वयि एवं परोपकारदयादयः गुणाः विद्यन्ते चेत्, तर्हि अस्मिन् सिंहासने समुपविश' इति । राजा मौनम् अवाप ।

**श्लोकान्वयः -**

१. आत्मनः सुखदुःखेच्छां त्यक्त्वा सर्वसत्त्वसुखैषिणः साधवः परदुःखेन अत्यन्तदुःखिनः भवन्ति ।

२. पशवः अपि केवलं स्वोदरम्भराः हि जीवन्ति । यः परार्थे हि जीवति तस्यैव जीवितं श्लाघ्यम् ।

३. यथा भवतः जीवितम् आत्मनः प्रियं तथा परेषामपि जीवितं (तेषां) प्रियम् । यथा आत्मनः जीवितं निरीक्ष्यते (त्वया) तथा परेषामपि जीवितं रक्ष ।

## शब्दार्थः - टिप्पणी

**समाचङ्क्रम्यमाणे**: यदा आरोढुम् उद्युक्तः तदा- (ಸಿಂಹಾಸವನ್ನು) ಏರುವಾಗ - While ascending

**विक्रमे राज्यं कुर्वति भूमण्डले** :सति सप्तमीप्रयोगः

**पिशुनः** : दुर्जनः -ದುಷ್ಟ-wicked

**तस्करः** : स्तेनः-ಕಳ್ಳ-thief

**अर्थिभूभुजः** : सामन्तराजाः-ಸಾಮಂತರಾಜರು- tributary kings

**देशान्तरम्** : अन्यः देशः-ಬೇರೆಡೆಗೆ - elsewhere(अव्ययीभावसमासः)

**यथेच्छम्** : इच्छाम् अनतिक्रम्य (अव्ययीभावसमासः)

**प्रतिदिनम्** : दिने दिने (अव्ययीभावसमासः)

**सञ्जातसौहार्दस्य** : सञ्जातः सौहार्दः यस्य तस्य

**सन्ततिच्छेदः** : सन्ततेः छेदः-ಸಂತತಿಯ ನಾಶ- destruction of the race

**महद्दुःखम्** : महत् च तत् दुःखम् च

**आश्रमभ्रंशः** : आश्रमात् भ्रंशः-ಗೃಹಸ್ಥಾಶ್ರಮ ಕರ್ತವ್ಯ ಲೋಪ -failure as a householder

**विहङ्गरवार्थविज्ञ** :विहङ्गानां रवः(शब्दः) विहङ्गरवः - तस्य अर्थं विजानाति इति- ಪಕ್ಷಿಗಳ ಕೂಗಿನ ಅಂತರಾರ್ಥದ ಅರಿವುಳ್ಳ - one who could understand the meaning of the chirping of birds

**वध्यशिला** : वध्याय शिला वध्यशिला - ವಧಿಸಲ್ಪಡುವವನಿಗಾಗಿ ಇರುವ ಶಿಲೆ – sacrificial boulder

**सुखदुःखेच्छाम्** : सुखं च दुःखं च सुखदुःखे तयोः इच्छाम्

**सर्वसत्त्वसुखैषिणः** : सर्वेषां सत्त्वानां सुखं ये इच्छन्ति ते-ಎಲ್ಲ ಜೀವಿಗಳ ಸುಖವನ್ನು ಬಯಸುವವರು-those who aspire for the comfort of all beings

**आर्तिहरः** : आर्तिं हरति इति :- ಕಷ್ಟವನ್ನು ನಿವಾರಿಸುವವನು-one who removes the pain

**उदरम्भराः** : उदराणि भरन्ति इति-ತಮ್ಮ ಹೊಟ್ಟೆಗಳನ್ನು ಹೊರೆದು ಕೊಳ್ಳುವವರು-those who fill their own bellies

**परानुग्रहः** : परस्मै अनुग्रहः -ಪರಹಿತವನ್ನೇ ಬಯಸುವವರು - wishing for the welfare of others

**स्वदेहशैत्याय** : स्वस्य देहस्य शैत्याय, सुखाय इत्यर्थः-ತಮ್ಮ ದೇಹವನ್ನು ಸುಖವಾಗಿಡಲು-to keep oneself comfortable

**मृत्युभयात्** : मृत्योः भयात्

**जीवमारणम्** : जीवानां मारणम्-ಜೀವಿಗಳ ಕೊಲ್ಲುವಿಕೆ-killing

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. विक्रमादित्यकथां का कथयति ?
2. विक्रमादित्यः कथं देशान्तरं निर्गतः ?
3. राजा किमाश्रित्य रात्रौ स्थितः?

4. वृद्धपक्षिराजस्य नाम किम् ?

5. परदु:खेन के अत्यन्तदु:खिन: भवन्ति ?

## II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. नगरवासिभि: जनै: राक्षस: किम् उक्त:?

2. विस्मित: राक्षस: विक्रमादित्यं किं पृच्छति ?

3. विक्रमादित्य: राक्षसं किम् उपदिशति ?

## III मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।

1. ............. ददाति चेत् सन्ततिच्छेदो भविष्यति ।

2. त्वम् आत्मन: ............. कुरु ।

3. यस्य मरणकाल: समायात: तस्येन्द्रियाणि ............. प्राप्नुवन्ति ।

| ग्लानिं, पुत्रं, समीहितम् |
|---|

## IV पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।

1. यो दु:खी स: सुहृदि दु:खं निवेद्य सुखी भवति ।

2. यं कमेवं मा भक्षय ।

3. मया परार्थमेतत् शरीरं दीयते स्वेच्छया ।

4. त्वं विश्वस्य आर्तिं परिहरसि ।

5. अद्यप्रभृति मनुष्यभक्षणं परित्यज ।

## V दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. विक्रमादित्यस्य परोपकारगुणं वर्णयत ।

2. विक्रमादित्यस्य प्रभावेण राक्षस: कथं परिवर्तित:?

## VI रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।

1. चिन्तातुराणां न सुखं न निद्रा ।

2. परदु:खेन साधवोऽत्यन्तदु:खिनो भवन्ति ।

3. पुत्थलिका भोजराजं प्रति अब्रवीत् ।

## — योग्यताविस्तारः —

### १. कर्तृ विचार:

द्वात्रिंशत्पुत्थलिकाविरचित नानाकथाकथनम् ।
वररुचिना पुनरेतान् निर्मितम् आनन्ददायकं विदुषाम् ।।

### २. कृतिपरिचय:

विक्रमादित्यमहाराजस्य सिंहासनं देवेन्द्रदत्तमिति प्रतीतिरस्ति । विक्रमस्य मरणानन्तरं भोजराज: तं प्राप्तवान् । यदा स: तम् आरोढुं गच्छति, तदा सिंहासनस्य सोपानपङ्क्तिषु स्थिता: द्वात्रिंशत् सालभञ्जिका: विक्रमादित्यस्य गुणविशेषान् कथारूपेण वर्णयन्ति । पश्चात् "त्वयि एवं परोपकारदयादय: गुणा: विद्यन्ते चेत्, तर्हि अस्मिन् सिंहासने समुपविश" इति भोजराजं वदन्ति । एवं द्वात्रिंशत् कथा: ताभि: पुत्थलिकाभि: निरूपिता: इति 'सिहासनद्वात्रिंशिका' नाम कथासङ्कलने उल्लिखितं वर्तते ।

विक्रमादित्य: क्रि.पू. १०२ संवत्सरे चक्रवर्तिरासीदिति श्रूयते । उज्जयिनी तस्य राजधानिरासीदिति ज्ञायते । सिंहासनद्वात्रिंशिकायां विद्यमानासु कथासु विक्रमादित्यस्य औदार्यं, साहसं, धैर्यं, जन्मवृत्तान्तं, सिंहासनारोहणं, प्रजापालनतत्परतां, रणरङ्गे तस्य वीरोचितं मरणम् च मनोज्ञया शैल्या निरूपितं वर्तते । अत्र विक्रमादित्य: राजनैतिक आदर्शाणां प्रतिमूर्तिरिव चित्रितो वर्तते । तस्य शासनकालं शान्तिसमृद्धियुक्तं सुवर्णयुगम् इति वर्णितमस्ति ।

### अनुशंसितग्रन्थाः


1. Simhasana Dvatrimsika ,Sub title: Thirty Two Tales, Author: A.N.D. Haksar, Paperback [edition 1998], Penguin Books India Pvt. Ltd., ISBN:9780140447484

2. Vikrama's Adventures or Thirtytwo tales of the throne by Franklin Edgerton, Hard Cover [Edition 1993]

3. http://www.penguinbooksindia.com/en/content/simhasana-dvatrimsika


* * *

# ३. निर्विमर्शा हि भीरवः

(कथासरित्सागरः - सोमदेवः)

K5C7H1

## पीठिका

काव्यभागोऽयं सोमदेवविरचितात् कथासरित्सागरनामकग्रन्थात् स्वीकृतः । कथासाहित्ये पद्यरूपा अपूर्वा कृतिरियम् । भारतीयसंस्कृतिप्रतिपादकान् अंशान् सरलया शैल्या प्रतिपादयन्ती नीतिं च उपदिशन्ती इयं कथासरित् सहृदयहृत्सागरं प्रविशतीति नास्ति संशीतिः । अत्यन्तरोचकतया, रमणीयतया च उपनिबद्धा कथा छात्रेषु पठनासक्तिं जनयन्ती, सुनीतिं, कुनीतेरपायं च बोधयन्ती कथासाहित्यकृतेः गरिमानं वर्धयति ।

(**पूर्वकथा** - एकदा वत्सराजः वासवदत्तया सह विवाहानन्तरं राजकार्यं विस्मरति । राज्यस्य केचन भूप्रदेशाः परवशंगताः । तदा तस्य महामन्त्री, स्वामिनिष्ठः यौगन्धरायणः चिन्ताकुलः सेनापतिना सह समालोचयच्च । ततः यौगन्धरायणः 'महासेन' इति कस्यचन राज्ञः कथां श्रावयति । सः तत्पत्नीव्यामोहात् बहिरागत्य राज्यभारं कथं कृतवान् इति विवृणोति । तथैव वत्सराजविषयेऽपि करणीयः इति । अतः 'वासवदत्ता दग्धा' इति मिथ्याप्रवादं प्रसार्य, प्रद्योतसुतया सह विवाहं च कारयितुं युक्तिं कथयति । तदा सेनापतिः रुमण्वान् 'यदि युक्तेरनुष्ठाने विफलो भवेम, तर्हि उपहासतां, राज्ञः अनादरं च गच्छेम' इति आशङ्क्य इमां कथां कथयति ।)

**अस्ति माकन्दिका नाम नगरी जाह्नवीतटे ।**
**तस्यां मौनव्रतः कश्चिदासीत् प्रव्राजकः पुरा ॥ १ ॥**

**प्रविष्टो जातु भिक्षार्थमेकस्य वणिजो गृहे ।**
**स ददर्श शुभां कन्यां भिक्षामादाय निर्गताम् ॥ २ ॥**

**दृष्ट्वा चाद्भुतां रूपां तां स कामवशगः शठः ।**
**हा हा कष्टमिति स्माह वणिजस्तस्य शृण्वतः ॥ ३ ॥**

**किमद्यैवमकस्मात् त्वं मौनं त्यक्त्वोक्तवानिति ।**
**तच्छ्रुत्वा वणिजं तं च परिव्राडेवमब्रवीत् ॥ ४ ॥**

**दुर्लक्षणेयं कन्या ते विवाहोऽस्या यदा भवेत् ।**
**तदा ससुतदारस्य क्षयः स्यात्तव निश्चितम् ॥ ५ ॥**

तदेतां वीक्ष्य दुःखं मे जातं भक्तो हि मे भवान् ।
तेनैवमुक्तवानस्मि त्यक्त्वा मौनं भवत्कृते ॥ ६ ॥

तदेषा कन्यका नक्तं मञ्जूषायां निवेशिता ।
उपरि न्यस्तदीपायां गङ्गायां क्षिप्यतां त्वया ॥ ७ ॥

तथेति प्रतिपद्यैतद् गत्वा सोऽथ वणिग्भयात् ।
नक्तं चक्रे तथा सर्वं निर्विमर्शा हि भीरवः ॥ ८ ॥

प्रव्राजकोऽपि तत्कालमुवाचानुचरान्निजान् ।
गङ्गां गच्छत तत्रान्तर्वहन्तीं यां च पश्यथ ॥ ९ ॥

पृष्ठस्थदीपां मञ्जूषां गुप्तमानयतेह ताम् ।
उद्घाटनीया न च सा श्रुतेऽप्यन्तर्ध्वनाविति ॥ १० ॥

तथेति चागता यावद्गङ्गां न प्राप्नुवन्ति ते ।
राजपुत्रः किमप्येकस्तावत्तस्यामवातरत् ॥ ११ ॥

सोऽत्र वणिजा क्षिप्तां मञ्जूषां वीक्ष्य दीपतः ।
भृत्यैरानाय्य सहसा कौतुकादुदघाटयत् ॥ १२ ॥

ददर्शान्तः कन्यां तां हृदयोन्मादकारिणीम् ।
उपयेमे च गान्धर्वविधिना तां च तत्क्षणम् ॥ १३ ॥

मञ्जूषां तां च गङ्गायां तथैवोर्ध्वस्थदीपिकाम् ।
कृत्वा तत्याज निक्षिप्य घोरं वानरमन्तरे ॥ १४ ॥

गतेऽथ तस्मिन् सम्प्राप्तकन्यारत्ने नृपात्मजे ।
आययुस्तस्य चिन्वन्तः शिष्याः प्रव्राजकस्य ते ॥ १५ ॥

ददृशुस्तां च मञ्जूषां गृहीत्वा तस्य चान्तिकम् ।
निन्युः प्रव्राजकस्यैनां सोऽथ हृष्टो जगाद तान् ॥ १६ ॥

**एकोऽहं साधये मन्त्रमादायैतामिहोपरि ।**
**अधस्तूर्ष्णीं च युष्माभिः शयितव्यमिमां निशाम् ।। १७ ।।**

**इत्युक्त्वा तां स मञ्जूषामारोप्य मठिकोपरि ।**
**स परिव्राड् विवृतवान् वणिक्कन्याभिलाषुकः ।। १८ ।।**

**ततश्च तस्या निर्गत्य वानरो भीषणाकृतिः ।**
**तमभ्यधावत् स्वकृतो मूर्तिमानिव दुर्नयः ।। १९ ।।**

**स तस्य दशनैर्नासां नखैः कर्णौ च तत्क्षणम् ।**
**चिच्छेद पापस्य कपिर्निग्रहज्ञ इव क्रुधा ।। २० ।।**

**प्रातर्बुद्ध्वा च तत्सर्वं जहास सकलो जनः ।**
**ननन्द स वणिक् सा च तत्सुता प्राप्तसत्पतिः ।। २१ ।।**

**श्लोकान्वयः -**

१. जाह्नवीतटे माकन्दिका नाम नगरी अस्ति । पुरा तस्यां मौनव्रतः कश्चिद् प्रव्राजकः आसीत्।

२. भिक्षार्थम् एकस्य वणिजः गृहे जातु प्रविष्टः। स भिक्षामादाय निर्गतां शुभां कन्यां ददर्श ।

३. अद्भुतां रूपां तां दृष्ट्वा कामवशगः शठः सः शृण्वतः च तस्य वणिजः हा हा कष्टमिति आह स्म ।

४. अद्य एवं त्वं मौनं त्यक्त्वा किमिति अकस्मात् उक्तवान् ? तच्छ्रुत्वा च तं वणिजं परिव्राड् एवमब्रवीत्।

५. ते इयं कन्या दुर्लक्षणा । यदा अस्याः विवाहो भवेत् तदा ससुतदारस्य तव क्षयः निश्चितं स्यात्।

६. एतां वीक्ष्य मे तत् दुःखं जातम् । भवान् मे भक्तो हि । तेन भवत्कृते मौनं त्यक्त्वा एवम् उक्तवान् अस्मि ।

७. एषा कन्यका नक्तम् उपरि न्यस्तदीपायां मञ्जूषायां निवेशिता तत् त्वया गङ्गायां क्षिप्यताम् ।

८. अथ सो वणिक् भयात् तथा इति प्रतिपद्य गत्वा एतद् सर्वं नक्तं तथा चक्रे । भीरवः हि निर्विमर्शाः ।

९-१०. प्रव्राजकोऽपि तत् कालं निजान् अनुचरान् उवाच । गङ्गां गच्छत । तत्र अन्तर्वहन्तीं पृष्ठस्थदीपां यां च मञ्जूषां पश्यथ ताम् इह गुप्तम् आनयत । अन्तः ध्वनौ श्रुते अपि सा च न उद्घाटनीया इति।

११. तथेति गङ्गाम् आगताः ते च किमपि यावत् न प्राप्नुवन्ति, तावत् एकः राजपुत्रः तस्याम् अवातरत् ।

१२. सः वणिजा क्षिप्तां मञ्जूषां दीपतः अत्र वीक्ष्य, भृत्यैः सहसा आनाय्य, कौतुकात् उदघाटयत्।

१३. हृदयोन्मादकारिणीं तां कन्या अन्तः ददर्श । तत्क्षणं तां च गान्धर्वविधिना च उपयेमे ।

१४. तथैव ऊर्ध्वस्थदीपिकां तां मञ्जूषां कृत्वा, अन्तरे घोरं वानरं निक्षिप्य च गङ्गायां तत्याज ।

१५. अथ सम्प्राप्तकन्यारत्ने नृपात्मजे तस्मिन् गते तस्य प्रव्राजकस्य ते शिष्याः चिन्वन्तः आययुः ।

१६. तां मञ्जूषां ददृशुः। एनां च गृहीत्वा तस्य प्रव्राजकस्य अन्तिकं निन्युः । अथ च हृष्टः सः तान् जगाद।

१७. अहम् एकः एताम् उपरि आदाय इमां निशा मन्त्रं साधये । युष्माभिः च तूष्णीम् इह अधः शयितव्यम् ।

१८. इत्युक्त्वा वणिक्कन्याभिलाषुकःसः परिव्राड् मञ्जूषां मठिकोपरि आरोप्य तां विवृतवान् ।

१९. ततश्च भीषणाकृतिः वानरः तस्याः निर्गत्य स्वकृतो मूर्तिमानिव दुर्नयः तमभ्यधावत् । **(उत्प्रेक्षालङ्कारः)**

२०. तत् क्षणं सः कपिः निग्रहज्ञः इव क्रुधा तस्य पापस्य नासां दशनैः, कर्णौ नखैः च चिच्छेद। **(उपमालङ्कारः)**

२१. सकलः जनः तत्सर्वं च प्रातः बुद्ध्वा जहास । स वणिक् च तत्सुता सा प्राप्तसत्पतिः ननन्द।

## शब्दार्थः - टिप्पणी

**जाह्नवीतटे** : गङ्गातीरे, जाह्नव्याः तटे ।

**प्रव्राजकः** : सन्यासी-ಸಂನ್ಯಾಸಿ-monk

**जातु** : कदाचित्-ಒಮ್ಮೆ-once (अव्ययम्)

**वणिक्** : सार्थवाहः-ವ್ಯಾಪಾರಿ-merchant

**कामवशगः** : कामस्य वशं गतः-ಕಾಮ ಪರವಶನಾದ-lustful

**शठः** : वञ्चकः-ಮೋಸಗಾರ-a cheat

**नक्तम्** : रात्रिः-ಇರುಳು-night (अव्ययम्)

**मञ्जूषा** : पेटिका-ಪೆಟ್ಟಿಗೆ-box

**न्यस्तः** : स्थापितः-ಇಡಲ್ಪಟ್ಟ-being kept

**भीरवः** : भयालवः-ಭಯಸ್ವಭಾವದವರು-timid

**अवातरत्** : अवागच्छत्-ಇಳಿದನು-got down

**भृत्यैरानाय्य** : सेवकैः आनाय्य-ಸೇವಕರಿಂದ ತರಿಸಿ-having made the servants bring

**हृदयोन्मादकारिणी** : चित्तचाञ्चल्यकारिणी-ಚಿತ್ತಚಾಂಚಲ್ಯವನ್ನುಂಟು ಮಾಡುವ-fickleness of mind

**उपयेमे** : ऊढवान्-ವಿವಾಹವಾದನು-got married

**गङ्गायां-तत्याज** : गङ्गायां प्लावयामास- ಗಂಗಾ ನದಿಯಲ್ಲಿ ತೇಲಿಬಿಟ್ಟನು-set it sail in the Ganges

**अन्तिकम्** : समीपं-ಹತ್ತಿರ-near (अव्ययम्)

**कन्यारत्नम्** : कन्या एव रत्नम्-ಶ್ರೇಷ್ಠ ಕನ್ಯೆ-gem of a girl

**ददृशुः** : अवलोकयामासुः-ನೋಡಿದರು- saw

**चिन्वन्तः** : चयनं कुर्वन्तः-ಅರಸುವವರು- one who searches

**मठिकोपरि** : मठस्य अट्टे-ಮಾಳಿಗೆಯ ಮೇಲೆ-on the attic of mutt

**विवृतवान्** : उद्घाटितवान्-ತೆರೆದನು-opened

**भीषणाकृतिः** : भयङ्कराकृतिः-ಘೋರಾಕಾರ-fierceful form-भीषणा आकृतिः यस्य सः

**अभ्यधावत्** : अन्वधावत्-ಅಟ್ಟಿಸಿಕೊಂಡು ಬಂದಿತು-chased

**दुर्नयः मूर्तिमानिव**: दुर्नीतिः विग्रहवानिव-ದುರ್ನೀತಿಯೇ ಮೂರ್ತಿವೆತ್ತು ಬಂದಂತಿದ್ದ -as the embodiment of evil

**दशनैर्नासाम्**: दन्तैः नासिकाम्-ಹಲ್ಲುಗಳಿಂದ ಮೂಗನ್ನು-nose by teeth

**नखैः कर्णौ** : करजैः श्रोत्रे-ಉಗುರುಗಳಿಂದ ಕಿವಿಗಳೆರಡನ್ನು-ears by nails

**चिच्छेद** : अच्छिनत्-ಕತ್ತರಿಸಿತು-cut (लिट्)

**निग्रहज्ञः** : दण्डाधिकारी-ಶಿಕ್ಷೆ ಜಾರಿ ಗೊಳಿಸುವವನು - executioner

**बुद्ध्वा** : ज्ञात्वा-ತಿಳಿದು-having known

**ननन्द** : तुतोष-ಸಂತೋಷಗೊಂಡನು-became happy

**जहास** : हासं चकार-ನಕ್ಕರು-laughed

**प्राप्तसत्पतिः**: लब्धसाधुपतिः-ಒಳ್ಳೆಯ ಪತಿಯನ್ನು ಪಡೆದ-having got a good husband

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. माकन्दिका नाम नगरी कुत्र अस्ति ?
2. प्रव्राजकः वणिजः गृहं किमर्थम् अगच्छत् ?
3. के निर्विमर्शाः ?
4. राजपुत्रः मञ्जूषायाः अन्तः कं निक्षिपति ?
5. परिव्राजकस्य अवस्थां दृष्ट्वा कः जहास ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. कन्याविषये परिव्राट् वणिजः सकाशे किं वदति ?
2. प्रव्राजकः निजान् अनुचरान् किम् उवाच ?
3. राजपुत्रः मञ्जूषां प्राप्य किं करोति ?

**III मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. उपरि न्यस्तदीपायां............ क्षिप्यतां त्वया ।
2. भृत्यैरानाय्य सहसा..........उदघाटयत् ।
3. तमभ्यधावत् स्वकृतो मूर्तिमानिव..........।

| दुर्नयः, गङ्गायाम्, कौतुकात् |
|---|

**IV पाठनाम उल्लिख्य अधोनिर्दिष्टसङ्ख्याकानां श्लोकानाम् अनुवादं कन्नड-आङ्ग्लभाषया वा कुरुत । श्लोकसङ्ख्याः - २, ६, ८, ११, १४, २१**

**V दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. प्रव्राजकः ।
2. 'निर्विमर्शा हि भीरवः' इति शीर्षिकां समर्थयत ।

## VI रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।

1. प्रव्राजकः कामवशगः शठः च आसीत् ।
2. कन्या मञ्जूषायां प्रवेशिता ।
3. अनुचराः प्रव्राजकस्य वचनम् अपालयन् ।
4. परिव्राट् मौनं त्यक्त्वा उक्तवान् ।

## VII संयोजयत ।

| क | ख |
|---|---|
| जाह्नवी | मञ्जूषा |
| परिव्राड् | उपयेमे |
| ऊर्ध्वस्थदीपिका | कामवशगः |
| गान्धर्वविधिना | गङ्गा |

### — योग्यताविस्तारः —

कथासरित्सागरः गुणाढ्यस्य बृहत्कथाधारेण सोमदेवेन विरचितः अस्ति । ग्रन्थेऽस्मिन् कथाः लम्बकेषु उपनिबद्धाः । अस्मिन् कथापीठं, कथामुखं, लावाणकः इत्यादयः अष्टादश लम्बकाः वर्तन्ते । कथासरित्सागरे तृतीयलावाणकलम्बकस्य प्रथमे तरङ्गे (३० तम श्लोकादारभ्य ५३ तम श्लोकं यावत्) अयं भागः वर्तते । सि.हेच्. थानि इति पाश्चात्य विद्वान् १९२३ तमे वत्सरे अस्याः कृतेः आङ्ग्ल-अनुवादं कृतवान् । अनेन तु कृतेरस्य महिमा ज्ञायते ।

- दोषैकदृक् पुरोभागीनिकृतस्त्वनृजुः **शठः** । ♦ अयुक्तः प्राकृतः स्तब्धः **शठो** नैकृतिकोऽलसः ।
- प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् । व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः।
- लम्बकक्रमः-नरवाहनदत्तजन्म, चतुर्दारिका, सूर्यप्रभः, मदनमञ्जुका, वेला, शशाङ्कवती, विषमशीलः, मदिरावती, पद्मावती, पञ्चलम्बकः, रत्नप्रभः, अलङ्कारवती, शक्ति यशोलम्बकः, महाभिषेकः, सुरतमञ्जरी ।

**अनुशंसितग्रन्थः**

1. कथासरित्सागरः - कन्नडपद्यानुवादः - डा. हेच्.वि. नागराजराव् । (क.अ.सा.अकादमि)

* * *

# ४. शून्या मेऽङ्गुलिः

(अभिज्ञानशाकुन्तलम्-कालिदासः)

B6B9N8

## पीठिका

'शून्या मेऽङ्गुलिः' इति नाटकभागोऽयं महाकविकालिदासप्रणीता सर्वोत्कृष्टा कृतिरिति परिगणितस्य अभिज्ञानशाकुन्तलमिति नाटकस्य पञ्चमाङ्कात् सङ्गृहीतः । कविकुलगुरुरिति प्रसिद्धोऽयं कालिदासः अनितरसाधारणप्रतिभया संस्कृतसाहित्यक्षेत्रे अद्वितीयः असदृशश्च ।

कालिदासस्य सर्वासु कृतिषु असाधारणकल्पनाप्रतिभया विजृम्भन्ते सरस-सरल-सुन्दरमनोहारीणि वाक्यानि, सरसपदावलीयुताः सुन्दरश्लोकाः । अस्य वैदर्भी काव्यशैली असामान्या । तत्र माधुर्यादि गुणाः अयत्नसिद्धाः विराजन्ते । उपमालङ्कारप्रयोगेऽयम् अन्यादृशः, 'उपमा कालिदासस्य' इत्युक्तिरेव अत्र प्रमाणम् ।

(**पूर्वकथा -** हस्तिनावत्याः राजा दुष्यन्तः मृगयार्थम् अरण्यं गत्वा अनन्तरं कण्वाश्रमं प्रविशति। शकुन्तला-दुष्यन्तौ परस्परम् अनुरक्तौ भवतः । तयोः अनुरागः गान्धर्वविवाहे पर्यवस्यति। राजा दुष्यन्तः अभिज्ञानरूपं स्वम् अङ्गुलीयकं शकुन्तलायै दत्वा हस्तिनापुरं निवर्तते । आपन्नसत्वा शकुन्तला राज्ञः स्मरणे निमग्ना । अतिथिसत्कारात् विमुखां शकुन्तलां दुर्वासमहर्षिः 'अनन्यमानसा यं विचिन्तयन्ती सः प्रबोधितोऽपि त्वां न स्मरिष्यति' इति शपति । प्रियंवदया प्रार्थितः सः मुनिः 'किन्तु अभिज्ञानाभरणदर्शनेन शापः निवर्तिष्यति' इत्युक्त्वा निर्गच्छति । सोमतीर्थतः प्रतिनिवृत्तः कण्वमहर्षिः दुष्यन्त-शकुन्तलयोः परिणयं ज्ञात्वा, ताम् अभिनन्द्य पतिगृहं प्रेषयितुं निश्चिनोति । शकुन्तलां पुरस्कृत्य शार्ङ्गरवः शारद्वतः गौतमी च ततः निर्गत्य दुष्यन्तस्य आस्थानम् आगच्छन्ति ।)

### - पात्रपरिचयः -

**कञ्चुकी** - राजभवनस्य अधिकारी ।

**दुष्यन्तः** - हस्तिनावत्याः राजा, नायकः ।

**वैतालिकः** - स्तुतिपाठकः ।

**शकुन्तला** - कण्वमहर्षेः पोष्यपुत्री, नायिका ।

**गौतमी** - कण्वाश्रमस्था वृद्धा तापसी

**शार्ङ्गरवः-शारद्वतः** - कण्वशिष्यौ ।

**सोमरातः** - दुष्यन्तस्य कुलपुरोहितः ।

**प्रतीहारी** - द्वारपालिका ।

- - -

(ततः प्रविशति कञ्चुकी)

**कञ्चुकी** : **इदानीमेव धर्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम्। अथवाविश्रमयोऽयं लोकतन्त्राधिकारः । कुतः -**

**भानुः सकृद्युक्ततुरङ्ग एव रात्रिं दिवं गन्धवहः प्रयाति ।**
**शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपि धर्म एषः ।। १ ।।**

**यावन्नियोगमनुतिष्ठामि ।** (परिक्रम्यावलोक्य च) **एषः देवः** (उपगम्य) **जयतु जयतु देवः। एते खलु हिमगिरेरुपत्यकारण्यवासिनः काश्यपसन्देशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः। श्रुत्वा देवः प्रमाणम् ।**

**राजा** : (सादरम्) **किं काश्यपसन्देशहारिणः ?**

**कञ्चुकी** : **अथ किम् ?**

**राजा** : **तेन हि मद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः । अमूनाश्रमवासिन श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति । अहमप्यत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि ।**

**कञ्चुकी** : **यदाज्ञापयति देवः ।** (इति निष्क्रान्तः)

(नेपथ्ये)

**वैतालिकः** : **विजयतां देवः ।**

**स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः**
**प्रतिदिनमथवा ते वृत्तिरेवं विधैव ।**
**अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं**
**शमयति परितापं छायया संश्रितानाम् ।। २ ।।**

राजा : **एते क्लान्तमनसः पुनर्नवीकृताः स्मः ।**

(इति परिक्रामति)

प्रतीहारी : **अभिनवसंमार्जनसश्रीकः सन्निहितहोमधेनुरग्निशरणालिन्दः । आरोहतु देवः ।**

राजा : (आरुह्य परिजनांसावलम्बी तिष्ठति) **वेत्रवति, किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः ?**

प्रतीहारी : **सुचरितनन्दिन ऋषयः देवं सभाजयितुमागताः इति तर्कयामि ।**

(ततः प्रविशन्ति गौतमी सहिताः शकुन्तलां पुरस्कृत्य मुनयः । पुरश्चैषां कञ्चुकी पुरोहितश्च)

कञ्चुकी : **इत इतो भवन्तः ।**

शार्ङ्गरवः : **शारद्वत,**

**महाभागः कामं नरपतिरभिन्नस्थितिरहो**
**न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते ।**
**तथापीदं शश्वत्परिचितविविक्तेन मनसा**
**जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ।। ३ ।।**

शारद्वतः : **जाने भवान्पुरप्रवेशादित्थंभूतः संवृत्तः ।**

शकुन्तला : (निमित्तं सूचयित्वा) **अहो, किं मे वामेतरन्नयनं विस्फुरति ?**

गोतमी : **जाते प्रतिहतममङ्गलम् । सुखानि ते भर्तृकुलदेवता वितरन्तु ।** (इति परिक्रामति)

पुरोहितः : (राजानं निर्दिश्य) **भो भोस्तपस्विनः, असावत्रभवान्वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति । पश्यतैनम् ।**

शार्ङ्गरव : **भो महाब्राह्मण, काममेतदभिनन्दनीयम् । कुतः -**

**भवन्ति नम्रास्तरवः फलागमैः**
**नवाम्बुभिर्दूरविलम्बिनो घनाः ।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः**
**स्वभाव एवैष परोपकारिणाम् ।। ४ ।।**

प्रतीहारी : देव, प्रसन्नमुखवर्णा दृश्यन्ते । जानामि विश्रब्धकार्याः ऋषयः ।

राजा : (शकुन्तलां दृष्ट्वा) अथात्रभवती -

कास्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ।। ५ ।।

प्रतीहारी : देव, दर्शनीया पुनरस्या आकृतिर्लक्ष्यते ।

राजा : भवतु, अनिर्वर्णनीयं परकलत्रम् ।

शकुन्तला : (हस्तमुरसि कृत्वा, आत्मगतम्) हृदय, किमेवं वेपसे ? आर्यपुत्रस्य भावमवधार्य धीरं तावद् भव ।

पुरोहितः : (पुरो गत्वा) एते विधिवदर्चितास्तपस्विनः । कश्चिदेषां उपाध्यायसन्देशः । तं देवः श्रोतुमर्हति ।

राजा : अवहितोऽस्मि । अपि निर्विघ्नतपसो मुनयः ?

ऋषयः : कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति ।। ६ ।।

राजा : अर्थवान् खलु मे राजशब्दः । अथ भगवांल्लोकानुग्रहाय कुशली काश्यपः ।

ऋषयः : स्वाधीनकुशलाः सिद्धिमन्तः । स भवन्तमनामयप्रश्नपूर्वकमिदमाह ।

राजा : किमाज्ञापयति भगवान् ?

शार्ङ्गरवः : यन्मिथः समयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातम्। कुतः-

त्वमर्हतां प्राग्रसरः स्मृतोऽसि यच्छकुन्तला मूर्तिमती च सत्क्रिया ।
समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः ।। ७ ।।

तदिदानीमापन्नसत्त्वा प्रतिगृह्यतां सहधर्मचरणायेति ।

शकुन्तला : (आत्मगतम्) किं नु खलु आर्यपुत्रो भणति ।

राजा : किमिदमुपन्यस्तम् ।

शकुन्तला : (आत्मगतम्) पावकः खलु वचनोपन्यासः ।

शार्ङ्गरवः : कथमिदं नाम । भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः ।

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते प्रियाप्रिया वा प्रमदा स्वबन्धुभिः ।। ८ ।।

राजा : किं चात्रभवती मया परिणीतपूर्वा ?

शकुन्तला : (सविषादम्, आत्मगतम्) हृदय, साम्प्रतं त आशङ्का ।

राजा : कुतोऽयमसत्कल्पनाप्रश्नः ।

गौतमी : जाते, मुहूर्तं मा लज्जस्व । अपनेष्यामि तावत्तेऽवगुण्ठनम् । ततस्त्वां भर्ताभिज्ञास्यति।

राजा : (शकुन्तलां निर्वर्ण्य, आत्मगतम्)

इदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेति व्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नैव शक्नोमि हातुम् ।। ९ ।।

(इति विचारयन् स्थितः)

शार्ङ्गरवः : भो राजन्, किमिति जोषमास्यते ।

राजा : भोस्तपोधनाः, चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि । तत्कथमिमामभिव्यक्तसत्त्वलक्षणां प्रत्यात्मानं क्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये ।

शकुन्तला : (अपवार्य) आर्यस्य परिणय एव सन्देहः । कुत इदानीं दूराधिरोहिण्याशा ।

शारद्वतः : शकुन्तले, वक्तव्यमुक्तमस्माभिः । सोऽयमत्रभवानेवमाह । दीयतामस्मै प्रत्ययप्रतिवचनम्।

शकुन्तला : (अपवार्य) इममवस्थान्तरं गते तादृशेऽनुरागे किं वा स्मारितेन । आत्मा इदानीं शोचनीय इति व्यवसितमेतत् । (प्रकाशम्) आर्यपुत्र... (इत्यर्धोक्ते) संशयित इदानीं नैष समुदाचारः। पौरव, न युक्तं नाम ते तथा पुराश्रमपदे स्वभावोत्थानहृदयमिमं जनं समयपूर्वं प्रतार्येदृशैरक्षरैः प्रत्याख्यातुम् ।

राजा : (कर्णौ पिधाय) शान्तं पापम् ।

शकुन्तला : भवतु ! यदि परमार्थतः परपरिग्रहशङ्किना त्वयैवं वक्तुं प्रवृत्तं तदभिज्ञानेनानेन तवाशङ्कामपनेष्यामि ।

राजा : उदारः कल्पः ।

शकुन्तला : (मुद्रास्थानं परामृश्य) हा धिक्! अङ्गुलीयकशून्या मेऽङ्गुलिः ।

(इति सविषादं गौतमीमवेक्षते)

गौतमी : नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टमङ्गुलीयकम् ।

राजा : (सस्मितम्) इदं तत्प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते ।

शकुन्तला : अत्र तावद्विधिनादर्शितं प्रभुत्वम् । अपरं ते कथयिष्यामि ।

राजा : श्रोतव्यमिदानीं संवृत्तम् ।

शकुन्तला : नन्वेकस्मिन्दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतमुदकं तव हस्ते संनिहितमासीत्।

राजा : श्रृणुमस्तावत् ।

शकुन्तला : तत्क्षणे स मे पुत्रकृतको दीर्घापाङ्गो नाम मृगपोतक उपस्थितः । त्वयायं तावत्प्रथमं पिबतु इति अनुकम्पिना उपच्छन्दित उदकेन । न पुनस्तेऽपरिचयाद्धस्ताभ्याशमुपगतः। पश्चात् तस्मिन्नेव मया गृहीते सलिलेऽनेन कृतः प्रणयः । तदा त्वमित्थं प्रहसितोऽसि। सर्वः सगन्धेषु विश्वसिति । द्वावपि अत्र आरण्यकौ इति ।

राजा : एवमादिभिः आत्मकार्यनिर्वर्तनीनाम् अमृतमयवाङ्मधुभिः आकृष्यन्ते विषयिणः ।

गौतमी : महाभाग, नार्हस्येवं मन्त्रयितुम् । तपोवनसंवर्धितः अनभिज्ञोऽयं जनः कैतवस्य ।

राजा : तापसवृद्धे,

स्त्रीणामशिक्षितपटुत्वममानुषीषु
संदृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात्स्वमपत्यजात-
-मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ॥ १० ॥

**शकुन्तला :** (सरोषम्) **अनार्य, आत्मनो हृदयानुमानेन पश्यसि । क इदानीमन्यो धर्मकञ्चुकप्रवेशिनः तृणच्छन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते ।**

**राजा :** **भद्रे, प्रथितं दुष्यन्तस्य चरितम् । तथापीदं न लक्षये ।**

**शकुन्तला :** **सुष्ठु तावदत्र स्वच्छन्दचारिणी कृतास्मि, या अहं अस्य पुरुवंशप्रत्ययेन मुखमधोः हृदयस्थितविषस्य हस्तमुपगता ।** (इति पटान्तेन मुखमावृत्य रोदिति)

**शार्ङ्गरवः :** **इत्थमात्मकृतं प्रतिहतं चापलं दहति ।**

**अतः परीक्ष्य कर्तव्यं विशेषात्सङ्गतं रहः ।**
**अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ।। ११ ।।**

**राजा :** **अयि भोः, किम् अत्रभवतीप्रत्ययादेवम् अस्मान्संयुतदोषाक्षरैः क्षिणुत ?**

**शार्ङ्गरव :** (सासूयम्) **श्रुतं भवद्भिरधरोत्तरम् ।**

**राजा :** **भोः सत्यवादिन्, अभ्युपगतं तावदस्माभिरेवम् । किं पुनरिमामतिसन्धाय लभ्यते ।**

**शार्ङ्गरवः :** **विनिपातः ।**

**राजा :** **विनिपातः पौरवैः प्रार्थ्यत इति न श्रद्धेयम् ।**

**शारद्वतः :** **शार्ङ्गरव, किमुत्तरेण । अनुष्ठितो गुरोः सन्देशः । प्रतिनिवर्तामहे वयम् ।**(राजानं प्रति)

**तदेषा भवतःकान्ता त्यज वैनां गृहाण वा ।**
**उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ।। १२ ।।**

**गौतमि, गच्छाग्रतः ।** (इति प्रस्थिताः)

**शकुन्तला :** **कथमनेन कितवेन विप्रलब्धास्मि । यूयमपि मां परित्यजथ ।** (इत्यनुप्रतिष्ठते)

**गौतमी :** (स्थित्वा) **वत्स शार्ङ्गरव, अनुगच्छति इयं खलु नः करुणपरिदेविनी शकुन्तला । प्रत्यादेशपरुषे भर्तरि किं वा मे पुत्रिका करोतु ।**

**शार्ङ्गरवः :** **(**सरोषं निवृत्य**) किं पुरोभागे, स्वातन्त्र्यमवलम्बसे ?** (शकुन्तला भीता वेपते)

शकुन्तले,

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पितुरुत्कुलया त्वया ।
अथ तु वेत्सि शुचिव्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम् ॥ १३ ॥

तिष्ठ, साधयामो वयम् ।

राजा : भोस्तपस्विन्, किमत्रभवतीं विप्रलभसे । भवन्तमेव गुरुलाघवं पृच्छामि ।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः ॥ १४ ॥

पुरोहितः : (विचार्य) यदि तावदेवं क्रियताम् ।

राजा : अनुशास्तु मां भवान् ।

पुरोहितः : अत्रभवती तावदाप्रसवात् अस्मद्गृहे तिष्ठतु । कुत इदमुच्यत इति चेत्, त्वं साधुभिरुद्दिष्टः। प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति । स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति, अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि । विपर्यये तु पितुरस्याः समीपनयनमवस्थितमेव।

राजा : यथा गुरुभ्यो रोचते ।

पुरोहितः : वत्से, अनुगच्छ माम् ।

शकुन्तला : भगवति वसुधे, देहि मे विवरम् । (इति रुदती प्रस्थिता । निष्क्रान्ता सह पुरोधसा तपस्विभिश्च ।)

(नेपथ्ये) आश्चर्यमाश्चर्यम् ।

राजा : (आकर्ण्य) किं नु खलु स्यात् ।

पुरोहितः : (प्रविश्य, सविस्मयम्) देव अद्भुतं खलु संवृत्तम् !

राजा : किमिव ?

पुरोहितः : देव, परावृत्तेषु काश्यपशिष्येषु,

सा निन्दन्ती स्वानि भाग्यानि बाला बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता ।

राजा : **किं च ।**

पुरोहितः : **स्त्रीसंस्थानं चाप्सरस्तीर्थमारात् उत्क्षिप्यैनां ज्योतिरेकं जगाम ।। १५ ।।**

(सर्वे विस्मयं रूपयन्ति)

राजा : **भगवन्, प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्ट एव । किं वृथा तर्केणान्विष्यते । विश्राम्यतु भवान् ।**

पुरोहितः : (विलोक्य) **विजयस्व** । (इति निष्क्रान्तः)

राजा : **वेत्रवति, पर्याकुलोऽस्मि । शयनभूमिमार्गमादेशय ।**

प्रतीहारी : **इत इतो देवः** । (इति प्रस्थिता)

राजा : **कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।**

**बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम् ।। १६ ।।**

(इति निष्क्रान्ताः सर्वे)

**।। इति पञ्चमोऽङ्कः ।।**

**श्लोकान्वयः -**

१. भानुः सकृद्युक्ततुरङ्ग एव, गन्धवहः रात्रिं दिवं प्रवाति, शेषः सदा एव आहितभूमिभारः, षष्ठांशवृत्तेः अपि एष धर्मः ।

२. स्वसुखनिरभिलाषः लोकहेतोः प्रतिदिनं खिद्यसे अथवा ते वृत्तिः एवं विधा एव, पादपः हि मूर्ध्ना तीव्रम् उष्णम् अनुभवति, संश्रितानां छायया परितापं शमयति ।

३. महाभागः असौ नरपतिः अभिन्नस्थितिः, वर्णानाम् अपकृष्टोऽपि कश्चित् अपथं न भजते (इति) कामं, तथापि शश्वत् परिचितविविक्तेन मनसा इदं जनाकीर्णं हुतवहपरीतं गृहम् इव मन्ये । **(उपमालङ्कारः)**

४. तरवः फलागमैः नम्राः भवन्ति, घनाः नवाम्बुभिः दूरविलम्बिनः (भवन्ति), सत्पुरुषाः समृद्धिभिः अनुद्धताः (भवन्ति), परोपकारिणाम् एषः स्वभाव एव । **(अर्थान्तरन्यासालङ्कारः)**

५. पाण्डुपत्त्राणां (मध्ये) किसलयम् इव तपोधनानां मध्ये अवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या का स्वित् ? **(उपमालङ्कारः)**

६. त्वयि रक्षितरि सतां धर्मक्रियाविघ्नः कुतः, घर्मांशौ तपति तमः कथम् आविर्भविष्यति ?

७. यत् त्वम् अर्हतां प्राग्रसरः स्मृतः असि, शकुन्तला च मूर्तिमती च सत्क्रिया, तुल्यगुणं वधूवरं समानयन् प्रजापतिः चिरस्य वाच्यं न गतः । **(उत्प्रेक्षालङ्कारः)**

८. ज्ञातिकुलैकसंश्रयां भर्तृमतीं सतीम् अपि जनः अन्यथा विशङ्कते; अतः स्वबन्धुभिः प्रमदा प्रिया अप्रिया वा परिणेतुः समीपे इष्यते ।

९. एवम् उपनतम् इदम् अक्लिष्टकान्तिरूपम्, प्रथमपरिगृहीतं स्यात् न वा इति व्यवस्यन्, भ्रमरः इव विभाते अन्तस्तुषारं कुन्दं (सपदि)भोक्तुं नैव शक्नोमि हातुं (च) नैव (शक्नोमि) । **(उपमालङ्कारः)**

१०. स्त्रीणाम् अशिक्षितपटुत्वम् अमानुषीषु सन्दृश्यते, याः प्रतिबोधवत्यः (तासु) किमुत; परभृताः स्वम् अपत्यजातम् अन्तरिक्षगमनात् प्राक् अन्यैः द्विजैः पोषयन्ति खलु । **(अर्थान्तरन्यासालङ्कारः)**

११. अतः सङ्गतं विशेषात् रहः परीक्ष्य कर्तव्यम्, अज्ञातहृदयेषु सौहृदम् एवं वैरीभवति । **(अर्थान्तरन्यासालङ्कारः)**

१२. तत् एषा भवतः कान्ता, एनां त्यज वा गृहाण वा, हि दारेषु प्रभुता सर्वतोमुखी उपपन्ना । **(अर्थान्तरन्यासालङ्कारः)**

१३. यदि क्षितिपः यथा वदति तथा त्वम् असि (तर्हि) उत्कुलया त्वया पितुः किम्, अथ तु आत्मनो व्रतं शुचि वेत्सि, (तर्हि) पतिकुले तव दास्यमपि क्षमम् ।

१४. अहं मूढः स्याम्,एषा वा मिथ्या वदेत् इति संशये दारत्यागी भवामि, आहो परस्त्रीस्पर्शपांसुलः।

१५. सा बाला स्वानि भाग्यानि निन्दन्ती बाहूत्क्षेपं क्रन्दितुं प्रवृत्ता च, स्त्रीसंस्थानम् एकं ज्योतिः आरात् एनाम् उत्क्षिप्य अप्सरस्तीर्थं जगाम च ।

१६. प्रत्यादिष्टां मुनेः तनयां परिग्रहं न स्मरामि इति कामम्, तु बलवत् दूयमानं हृदयं मां प्रत्याययति इव । **(उत्प्रेक्षालङ्कारः)**

## शब्दार्थः - टिप्पणी

**उपरोधकारि** : विघ्नकरमित्यर्थः-ತೊಂದರೆ ಕೊಡುವ-causing disturbance

**लोकतन्त्राधिकारः** : भुवनस्य धारणे अधिकारः-ಲೋಕಕಾರ್ಯವನ್ನು ನಿರ್ವಹಿಸುವ ಹೊಣೆ-the office of governance

**गन्धवहः** : मारुतः-ಗಾಳಿ-the wind

गन्धं वहतीति गन्धवहः

**षष्ठांशवृत्तिः** : प्रजाभिः उपार्जितस्य द्रव्यस्य षष्ठांशः तेन वृत्तिः(जीविका)-ಆದರಲ್ಲಿ ಒಂದು ಪಾಲಿನಿಂದ ಜೀವಿಕೆ (ರಾಜರಿಗೆ)-sustenance from one sixth (1/6) of the produce-षष्ठश्चासौ-अंशश्च षष्ठांशः, तेन वृत्तिः यस्य, तस्य षष्ठांशवृत्तेः

**नियोगः** : आदेशः-ಆದೇಶ-order

**उपत्यकारण्यवासिनः** : पर्वतासन्नभूमौ अरण्ये निवासकर्तारः-ತಪ್ಪಲು ಪ್ರದೇಶದ ಅರಣ್ಯದಲ್ಲಿ ವಾಸಿಸುವ-those whose abode is in the forest, at the foot of the mountain.

उपत्यका च तत् अरण्यं च उपत्यकारण्यम्, तस्मिन् वसन्तीति **उपत्यकाद्रेरासन्नभूमिः-अमरः**

**स्वसुखनिरभिलाषः** : स्वस्य आनन्दानुभूतिः ततः निरभिलाषः-ತನ್ನ ಸುಖದ ಅಭಿಲಾಷೆಯನ್ನು ತೊರೆದವನು-Regardless of personal comforts स्वस्य सुखात् निर्गतः अभिलाषः यस्य सः

**तीव्रमुष्णम्** : तीक्ष्णम् उष्णतायुक्तं घर्म-ತೀವ್ರ ಬಿಸಿಲಿನ ತಾಪ-the scorching heat

**क्लान्तमनाः** : श्रान्तमनाः-ದಣಿದ ಮನಸ್ಸುಳ್ಳ-having a fatigued mind

क्लान्तं मनः यस्य सः क्लान्तमनाः तस्य क्लान्तमनसः

**अभिनवसंमार्जनसश्रीकः** : नूतनतया संमार्जितेन सुशोभितः-ಇದೀಗ ಗುಡಿಸಿದ್ದರಿಂದ ನಿರ್ಮಲವಾದ-being newly swept and cleaned

**अग्निशरणालिन्दः** : यज्ञशालायाः बहिर्द्वारप्रदेशः-ಅಗ್ನಿಶಾಲೆಯ ಪ್ರವೇಶದ್ವಾರ-the entrance of the yajnashala

**प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके-अमरः**

**सन्निहितहोमधेनुः** : समीपस्थितयागधेनुः-ಹೋಮದ ಆಕಳು ಹತ್ತಿರದಲ್ಲಿರುವ ಯಾಗವೇದಿಕೆ- (the sacrificial altar) which had the milching cow close by होमाय धेनुः होमधेनुः, सन्निहिता होमधेनुः यस्य सः

**सुचरितनन्दिनः** : सुचरितेन सन्तुष्टाः-ಒಳ್ಳೆಯ ನಡತೆಯಿಂದ ಸಂತುಷ್ಟರಾಗುವ-those who are pleased by the good conduct-सुचरितेन नन्दितुं शीलं येषां ते

**सभाजयितुम्** : सम्मानयितुम्-ಸಮ್ಮಾನಿಸಲು-to honour

**पुरस्कृत्य** : अग्रे कृत्वा-ಮುಂದೆ ಮಾಡಿಕೊಂಡು-having her in front **(नमः पुरसोर्गत्योः)**

**अभिन्नस्थितिः** : रक्षितमर्यादः-ಸದ್ವರ್ತನೆಯನ್ನು ಮೀರದ-swerves not from the path of righteousness-भिन्ना मर्यादा स्थितिः न भवति यस्य सः

**अपकृष्टः** : अतिकनिष्ठः-ಅತ್ಯಂತ ಕನಿಷ್ಠನು-the inferior

**शश्वत्परिचितविविक्तम्** : निरन्तरम् अभ्यस्तं विजनस्थानम्-ಯಾವಾಗಲೂ ನಿರ್ಜನಪ್ರದೇಶದಲ್ಲಿದ್ದು ಅಭ್ಯಾಸವಿರುವ-perpetually accustomed to solitude-शश्वत् परिचितं विविक्तं यस्य

**जनाकीर्णम्** : जनैः परिव्याप्तम्-ಜನರಿಂದ ತುಂಬಿದ-thronged with men

**हुतवहपरीतम्** : अग्निना आवृतम्-ಅಗ್ನಿಯಿಂದ ಪರಿವೃತವಾದ- surrounded by fire

**वामेतरन्नयनम्** : दक्षिणं नयनम्-ಬಲಗಣ್ಣು- right eye वामात् इतरत् वामेतरत्

**प्रतिहतममङ्गलम्** : अमङ्गलम् अपगच्छतु ಅಮಂಗಳವು ದೂರವಾಗಲಿ- may the evils be averted

**भूरि विलम्बिनः** : भूतलसमीपं समागताः ಬಹು ಕೆಳಗೆ-hang low

**अनुद्धताः समृद्धिभिः** :सम्पद्भिः विनीताः-ಸಮೃದ್ಧಿಯಿಂದ ನಿರಹಂಕಾರಿಗಳಾದ-not elated by riches - न उद्धताः अनुद्धताः

**विश्रब्धकार्याः** : विश्वासपूर्णकृत्याः-ವಿಶ್ವಾಸದ ಕಾರ್ಯಕ್ಕಾಗಿ-for a worthy cause-विश्रब्धं कार्यं येषां ते

**अवगुण्ठनवती** : सशिरोमुखप्रावरणं तद्वती-ಮುಖ ಪರದೆಯನ್ನು ಹಾಕಿಕೊಂಡ-shrouded in the veil-स्वित्-प्रश्ने वा संशयसूचके,

**स्वित्वितर्केऽव्यये-अमरः**

**नातिपरिस्फुटशरीरलावण्या** :नातिप्रकटं शरीरस्य सौन्दर्यम्-ಶರೀರದ ಸೌಂದರ್ಯವು ಸ್ಪಷ್ಟವಾಗಿ ಕಾಣದೆ ಇರುವ-the beauty of the body is not clearly visible

**अनिर्वर्णनीयम्** : अनवलोकनीयम्-ದಿಟ್ಟಿಸಿ ನೋಡಬಾರದ-not to gaze upon

**भावम् अवधार्य** : प्रेमभावं स्मृत्वा-ಪ್ರೇಮಭಾವವನ್ನು ನೆನೆದು-Remembering the love

**अर्थवान्** : अन्वर्थकः, सार्थकः-ಸಾರ್ಥಕ-significant

**घर्मांशुः** : उष्णकिरणः, सूर्यः-ಪ್ರಕಾಶಿತ ಸೂರ್ಯ-bright sun

**स्वाधीनकुशलाः** : स्वस्य अधीने कुशलाः-ತಮ್ಮ ಅಧೀನದಲ್ಲಿರುವ ಯೋಗಕ್ಷೇಮ-welfare under their own control-स्वाधीनं स्वाधीने वा कुशलं येषां ते-ಯೋಗಕ್ಷೇಮವನ್ನು ಸ್ವಾಧೀನಪಡಿಸಿಕೊಂಡವರು

**सिद्धिमन्तः** : अणिमादिसिद्धिसमन्विताः योगीश्वराः-ಸಿದ್ಧಪುರುಷರು-the sages with yogic powers

**अनामयप्रश्नपूर्वकम्** : कुशलप्रश्नपूर्वकम्-ಕುಶಲಪ್ರಶ್ನಪೂರ್ವಕವಾಗಿ-with inquiries about health-आमयस्य (रोगस्य) अभावः अनामयः

**मिथः समयः** : परस्परम् अनुमोद्य-ಪರಸ್ಪರ ಒಪ್ಪಿಗೆ-by mutual consent-(मिथः-अव्ययम्)

**उपायंस्त** : परिणीतवान्-ಮದುವೆ ಮಾಡಿ ಕೊಂಡಿರುವೆ- (you have) married

उप+यम् धातोः लुङ् प्र.पु.ए.व

**अर्हतां प्राग्रसरः** : योग्यानां मुख्यतमः-ಅರ್ಹರಾದವರಲ್ಲಿ ಶ್ರೇಷ್ಠ-foremost among the worthy

**आपन्नसत्त्वा** : गर्भिणी-प्राणिनं गर्भस्थं शिशुमित्यर्थः-ಗರ್ಭಿಣಿಯಾದ-pregnant

**ज्ञातिकुलैकसंश्रयाम्** : बन्धुकुलसमाश्रिताम्-ತವರು ಮನೆಯನ್ನೇ ಆಶ್ರಯಿಸಿದ-residing exclusively with her kinsmen

**रूपमक्लिष्टकान्तिः** : सहजकान्तियुक्तरूपम्-ನಿಷ್ಕಲ್ಮಶವಾದ ಕಾಂತಿ-of spotless beauty

**कुन्दमन्तस्तुषारम्** : हिमावृतकुन्दपुष्पम्-ಮಂಜು ತುಂಬಿದ ಮಲ್ಲಿಗೆ-jasmine full of dew-अन्तस्तुषारम्-अन्तः तुषारः यस्य तत्

**वाच्यम्** : निन्दाम्-ನಿಂದೆಯನ್ನು-censure

(वच् परिभाषणे निन्दायां ण्यत्)

**जोषम्** : मौनम्-ಮೌನವಾಗಿ-silent (अव्ययम्)

**क्षेत्रिणमाशङ्कमानः** : भर्ता इति सन्देहयुक्तम्-ತಾನೇ ಪತಿಯೇ ಎಂಬ ಸಂದೇಹದಿಂದ -suspecting his relation as her kshetrin (husband) क्षेत्रिणम्-क्षेत्रं अस्य अस्ति इति क्षेत्री, तम्, **क्षेत्र पत्नीशरीरयोः-अमरः**

**प्रत्ययप्रतिवचनम्** : विश्वासजनकम् उत्तरम्-ನಂಬಿಕೆಯನ್ನು ಹುಟ್ಟಿಸುವಂತಹ ಉತ್ತರ-convincing reply

**स्वभावोत्थानहृदयम्** : स्वभावतः मनसा निष्कपटम् उत्थानम्-परवञ्चना अनभिज्ञानम्-ನಿಷ್ಕಪಟವಾದ ಹೃದಯವುಳ್ಳ-undeceitful minded

**समयपूर्वं प्रतार्य** : सङ्केतपूर्वं वञ्चयित्वा-ಮಾತುಕೊಟ್ಟು ವಂಚಿಸಿ-making deceitful promise

**स्त्रैणम्** : स्त्रीणाम् इदम्, स्त्रीणां समूहः (नपुंसकलिङ्गः)

**प्रत्युत्पन्नमति** : प्रत्युत्पन्ना प्रतिभा-ಚುರುಕು ಬುದ್ಧಿಯುಳ್ಳ-ready witted

(इकारान्तः नपुंसकलिङ्गः)

**पुत्रकृतकः** : पुत्रवत् परिवर्धितः, कृतकश्चासौ पुत्रश्च-ಮಗನಂತೆ ಸಾಕಿದ-as an adopted child

**मृगपोतकः** : हरिणशावकः-ಜಿಂಕೆಮರಿ-the fawn

**सगन्धेषु** : स्वयूथेषु-ತಮ್ಮ ಗುಂಪಿನಲ್ಲಿ-in their own herd समानः गन्धः येषां ते, तेषु

**अनृतमयवाङ्मधुभिः** :असत्यमयवाङ्मधुभिः-ಸುಳ್ಳು ಸವಿಮಾತುಗಳಿಂದ-by honeyed false words

**तपोवनसंवर्धितोऽनभिज्ञो कैतवस्य** : तपो अरण्ये वृद्धिं गमितः अपरिचितकपटव्यवहारस्य-ತಪೋವನದಲ್ಲಿ ಬೆಳೆಯಿಸಿದ ಹಾಗೂ ಕಪಟವರಿಯದ-brought up in a penance grove being unaware of cunningness-अनभिज्ञः-न विद्यते अभिज्ञा यस्य सः

**अन्यैर्द्विजैः** : अपरैः पक्षिभिः-ಬೇರೆ ಪಕ್ಷಿಗಳಿಂದ-from other birds

**परभृताः** : कोकिलाः-ಹೆಣ್ಣು ಕೋಗಿಲೆಗಳು-female cuckoos

**धर्मकञ्चुकप्रवेशिनः** : धर्मवेषधृताः-ಸನ್ನಡತೆಯ ಉಡುಗೆ ತೊಟ್ಟಿರುವ-wearing the garb of virtue-धर्म एव कञ्चुकः तं, प्रविशति असौ इति-तस्य

**तृणच्छन्नकूपोपमस्य** : तृणावृतकूपसदृशस्य-ಹುಲ್ಲು ಮುಚ್ಚಿದ ಬಾವಿಯಂತಿರುವ-resembling a grass concealed well-तृणैः छन्नेन कूपेन उपमा यस्य तस्य

**पुरुवंशप्रत्ययेन** : पुरुवंशे विश्वासेन-ಪುರುವಂಶದ ಮೇಲಿನ ವಿಶ್ವಾಸದಿಂದ-with trust in the Puru's race

**अज्ञातहृदयेषु** : अविदितहृदयेषु-ಹೃದಯವು ತಿಳಿಯದವರಲ್ಲಿ-not knowing each other's heart. न ज्ञातं हृदयं येषाम्, तेषु

**अतिसन्धाय** : वञ्चयित्वा-ಮೋಸ ಮಾಡಿ-by deceiving

**विप्रलब्धा** : वञ्चिता-ವಂಚನೆಗೊಳಗಾದ-deceived

**प्रभुता उपपन्ना** :सर्वविधाधिकारयुक्ता-ಸರ್ವವಿಧವಾದ ಅಧಿಕಾರವುಳ್ಳ-having authority over all

**करुणपरिदेवनम्** : करुणार्हं विलपनम्-ಕರುಣೆ ಬರುವಂತೆ ಅಳುವುದು-lamenting piteously

**करुणार्हं परिदेवनं-अमरः**

**प्रत्यादेशपरुषे** : कठोरेण तिरस्कृते-ಕಠೋರವಾಗಿ ತಿರಸ್ಕರಿಸಲ್ಪಟ್ಟ-cruelly repudiated

**उत्कुलया** : उत्क्रान्तकुलमर्यादया-ಕುಲಗೆಟ್ಟವಳಿಂದ-transgressed

**शुचिव्रतम्** : पातिव्रत्यम्-ಪಾತಿವ್ರತ್ಯ-chastity व्रतम्-पातिव्रत्यम्

**पांसुलः** : व्यभिचारी-ವ್ಯಭಿಚಾರಿ-tainted by the touch of another man's wife

**पुरोधसा** : पुरोहितेन सह-ಪುರೋಹಿತರೊಂದಿಗೆ-with the preceptor

**परावृत्तिः** : प्रतिनिवर्तनम्-ಹಿಂತಿರುಗುವಿಕೆ-returning

**स्त्रीसंस्थानम्** : ललनायाः आकृतिः-ಸ್ತ್ರೀರೂಪ-the form of a woman

**आरात्** : समीपात् -ಸಮೀಪದಿಂದ -from a close distence (अव्ययम्)

**प्रत्याययतीव** : विश्वासमुत्पादयति इव-ನಂಬಿಕೆ ಹುಟ್ಟಿಸುವಂತಿದೆಯೋ ಎಂಬಂತೆ-as though convincing

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. पौरवः कः ?
2. मूर्तिमती सत्क्रिया का ?
3. गौतमी का ?
4. शारद्वतः कः ?
5. 'विधिना दर्शितं प्रभुत्वम्' इति का वदति ?
6. मृगपोतकस्य नाम किम् ?

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. शार्ङ्गरव-दुष्यन्तयोः संवादः ।
2. अङ्गुलीयकप्रसङ्गः ।
3. दीर्घापाङ्गप्रसङ्गः ।
4. दुष्यन्तस्य पात्रचित्रणं कुरुत ।

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. भवतु, अनिर्वर्णनीयं परकलत्रम् ।
2. सुखानि ते भर्तृकुलदेवताः वितरन्तु ।
3. अथ लोकानुग्रहाय कुशली काश्यपः ।
4. अनार्य, आत्मनो हृदयानुमानेन पश्यसि ।
5. अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ।
6. उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ।

**IV पाठनाम उल्लिख्य अधोनिर्दिष्टसङ्ख्याकानां श्लोकानाम् अनुवादं कन्नड - आङ्ग्लभाषया वा कुरुत ।** **श्लोकसङ्ख्याः - ५, ६, ११, १४, १६**

## V मञ्जूषातः सूक्तं पदं चित्वा रिक्तं स्थानं पूरयत ।

1. सुचरितनन्दिनः तपस्विनः देवं.............आगताः ।
2. सर्वः सगन्धेषु...........।
3. चिरस्य वाच्यं न गतः..............।
4. अङ्गुलीयकशून्या मे...........।

| अङ्गुलिः, सभाजयितुम्, प्रजापतिः, विश्वसिति |
|---|

## VI प्रश्ननिर्माणं कुरुत ।

1. कविकुलगुरुः कालिदासः ।
2. कालिदासस्य सप्त कृतयः ।
3. ऋषयः प्रसन्नमुखवर्णाः दृश्यन्ते ।
4. प्रमदा परिणेतुः समीपे इष्यते ।

## VII संयोजयत ।

| क | ख |
|---|---|
| शार्ङ्गरवः | ब्रह्मा |
| गन्धवहः | दुष्यन्तः |
| प्रजापतिः | वायुः |
| पौरवः | कण्वशिष्यः |

## — योग्यताविस्तारः —

कालिदासस्य देशकालादिविषये विदुषाम् ऐकमत्यं नास्ति । अस्मिन् विषये द्वे मतेऽत्र उल्लेखनीये । क्रि.पू.प्रथमं शतकम् इति केचन, पञ्चमं शतकम् इति अन्ये । क्रि.पू. १५० तमे वर्षे स्थितस्य पुष्यमित्रस्य पुत्रः एव अग्निमित्रः, स एव मालविकाग्निमित्रनाटकस्य नायकः नान्यः । अतः तस्य कालः क्रि.पू. प्रथमं शतकम् इति विदुषाम् एकः अभिप्रायः ।

उज्ञयिन्यां तत्परिसरप्रदेशे वा सः स्वजीवितस्य बहुकालं यापितवान्, अतः सः उज्ञयिनीयः इति बहवः विद्वांसः परिगणयन्ति ।

अस्य कृतयः सप्त इति परिगणिताः, रघुवंशम्, कुमारसम्भवम् इति द्वे महाकाव्ये, ऋतुसंहारम्, मेघदूतम् इति द्वे खण्डकाव्ये, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् इति त्रीणि नाटकानि ।

**कवि-काव्यप्रशंसा :-**

१. काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला ।
तत्रापि च चतुर्थोऽङ्कः पञ्चमोऽङ्कः तथोऽधिकः ।।

२. यदि स्वर्गसुखं भूयः आत्मनानेन वाञ्छसि ।
भूयो भूयः सुधास्वादु शाकुन्तलमिदं पठ ।।

३. वासन्तं कुसुमं फलं च युगपत् ग्रीष्मस्य सर्वं च यत्
यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम् ।
एकीभूयमभूतपूर्वमथवा स्वर्लोकभूलोकयोः
ऐश्वर्यं यदि वाञ्छसि प्रियसखे **शाकुन्तलं** सेव्यताम् ।।

Wouldst thou the young years' blossom
and the fruit of its decline,
And all by which the soul is charmed
enraptured, feasted, fed
Wouldst thou the earth and heaven
itself in one sole name combined
I name thee, O **Shakunthala** !
and all at once is said.

\- **Goethe**, German poet

**षष्ठांशवृत्तिः -**

पञ्चषट्-भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा ।। - मनुस्मृतिः

**अष्टसिद्धयः -**

अणिमा महिमा चैव गरिमा लघिमा तथा ।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ।। -अमरकोशः

## अनुशंसितग्रन्थाः


1. महाकविकालिदासप्रणीतम् अभिज्ञानशाकुन्तलम् - सं.डा. रमाशङ्करत्रिपाठी चौखम्भा ओरियन्टालिया वाराणसी-२००५
2. The Abhijnana Sakuntala of Kalidasa - Ed. A.B. Gajendragadkar The Popular Book Store, Surat
3. ಮಹಾಕವಿ ಕಾಳಿದಾಸ ವಿರಚಿತ ಅಭಿಜ್ಞಾನ ಶಾಕುಂತಲಮ್ ಸಂ: ಕೆ.ಟಿ. ಪಾಂಡುರಂಗಿ - ಪ್ರಸಾರಾಂಗ, ಬೆಂಗಳೂರು ವಿಶ್ವವಿದ್ಯಾಲಯ, ಬೆಂಗಳೂರು - 1981
4. ಕನ್ನಡ ಕಾಳಿದಾಸ ಮಹಾಸಂಪುಟ - ಸಂ. ಎಸ್.ವಿ. ಪರಮೇಶ್ವರಭಟ್ಟ - ಸ್ನಾತಕೋತ್ತರ ಕೇಂದ್ರ, ಕೋಣಾಜೆ, ಮಂಗಳೂರು, ದಕ್ಷಿಣ ಕನ್ನಡ - 1972


* * *

# ५. महाराणाप्रतापः

(इतिहासग्रन्थेभ्यः सङ्गृहीतः)

C7W2Y2

## पीठिका

भारतीये इतिहासे केचन तपसा, ज्ञानेन, ग्रन्थग्रथनेन प्रसिद्धिमापन्नाः । एते ऋषयः, मुनयः, दार्शनिकाः कवयः इति बहुमन्यन्ते । अन्ये केचन शौर्येण, त्यागेन, देशप्रेम्णा वा आचन्द्रार्कं कीर्तिम् आर्जयन् । ब्राह्मतेजसा, केचन भूमिम् इमां भूषयामासुः । अपरे वीराः क्षात्रेण ओजसा भारतभूमेः धर्मं, संस्कृतिं, जनताश्च संररक्षुः । तादृशेषु अन्यतमः राणाप्रतापसिंहः ।

**भारतस्य पश्चिमस्यां दिशि सहस्राधिकवर्षेभ्यः आक्रमणं भवति स्म । इमं देशं बहुसम्पदा भरितम् इति मन्वानाः वैदेशिकाः तां सम्पदम् आत्मसात्कर्तुं आगच्छन्ति स्म । तद्विरुद्धं राजस्थानप्रदेशे राजपुत्राः आक्रमणशीलानां प्रतिरोधाय महान्तं प्रयत्नं चक्रुः। एतेषां राजपुत्राणां शौर्यगाथा, महिलानां त्यागनिष्ठा च अद्यापि यूनः स्वदेशकार्ये प्रेरयति ।**

**'मेवाड' इति स्थलं राजस्थाने अत्यन्तं प्रसिद्धमासीत् । तत्स्थलं तत्र उत्पन्नानां शूरराजानां शौर्येण आत्माहुत्या च महतीं प्रसिद्धिम् अवाप । अत्रत्ये सिसीदियावंशे बप्पारावलः राणाहमीरः, राणासाङ्गः प्रभृतयः शूराः जन्म लेभिरे । एतस्मिन्नेव पुण्यवंशे राणाप्रतापसिंहः चत्वारिंशदुत्तर पञ्चदशशततमे वर्षे, मे मासे, नवमे दिनाङ्के(९.५.१५४०), कुम्बल (जुनीकचेरि) ग्रामे एकः द्वितीयः सूर्य इव उदितः । अस्य माता जावन्ताबाई चौहाण्, पिता च द्वितीय उदयसिंहः ।**

**तस्मिन् समये बहवो राजानः मोघलचक्रवर्तिभिः सह आयुध्य, पराजयम् अनुभूय, तानेव दिल्लीश्वरान् भावयन्ति स्म । केचन तेषामेव सेवया आत्मनः धन्यान् मेनिरे । तस्मिन् काले अक्बर् महाशयः देहल्यां शासनं करोति स्म । स अन्यराजेषु विद्यमानं परस्परकलहम् एव उपयुज्य आत्मनः शक्तिम् अवर्धयत । तेन वशीकृताः केचन राजानः तस्य सेवायां निरता आसन् । देशरक्षणार्थं सर्वदा बद्धपरिकरेषु राजपुत्रेष्वेव स्वकर्तव्यविरतेषु का कथा अन्येषां राज्ञाम् ? सर्वथा भरतभूमिः वैदेशिकपदाक्रान्ता दास्यदूषिता च आसीत् ।**

**इत्थम् अन्धकारे सर्वत्र व्याप्ते राणाप्रतापः दीपशिखेव, आत्मगौरवस्य मूर्तिरिव, तस्मिन् कालखण्डे भ्राजते स्म । यद्यपि प्रतापस्य पिता उदयसिंहः प्रतापी राजा आसीत् किन्तु प्रतिकूलत्वात् चित्तौड-मेवाडादिस्थानानि अन्यवशान्यभूवन् । पितुरनन्तरं सिंहासनम् अधिरूढः राणाप्रतापः हस्तच्युतानां प्रमुखानाम् एतेषां स्थानानां स्वायत्तीकरणाय चिन्तयितुम् आरेभे ।**

प्रथमं राणाप्रतापः गण्यानां सभाम् आकारितवान् । 'यावत्पर्यन्तं परवशं राज्यं स्ववशं नाधिगच्छति, तावत्पर्यन्तं स्वर्णरजतादिपात्रेषु भोजनं न करिष्यामि, मृदुशयने न शयिष्ये, राजप्रासादे न वत्स्यामि' इति तेषां पुरतः प्रतिज्ञां स्वीकृतवान् ।

तदानीं हल्दीघाट्प्रदेशे वैरिभिः सह घोरं युद्धं सम्बभूव । वैरिणां सैन्यं समुद्रोपमम् आसीत्। राणाप्रतापः रणरङ्गे घोरम् अयुध्यत । किन्तु पूर्णजयं प्राप्तुं न शशाक । स्वस्य आप्तस्य अश्वस्य चेतकाख्यस्य साहाय्यं सः सर्वदा प्राप्तवान् । तेन सः आपदः आत्मानं रक्षितुं शक्त आसीत् । अरण्यगुहाप्रदेशेषु उषित्वा स्वसङ्कल्पसिद्धये सैन्यसङ्ग्रहणम् उपाक्रमत ।

यदा राणाप्रतापसिंहः अरण्ये वसति स्म तदा तस्य परिवारः महत्कष्टम् अनुबभूव । एकत्र सर्वदा वैर्याक्रमणशङ्का, अन्यत्र आहाराभावात् पुत्रकलत्राणां कष्टपरम्परा च अतीववेदनाकरी बभूव। एकस्मिन् दिने राणाप्रतापस्य पत्नी अरण्यतृणबीजचूर्णेन रोटिकाः सज्जीकृत्य सर्वेभ्यः किञ्चित्-किञ्चिद्भागं दत्तवती । स्वपुत्र्यै अपि रोटिकां दत्वा 'तस्याः अर्धमेव खादित्वा अवशिष्टमर्धं परेद्युः भक्षणार्थं रक्ष' इति सूचितवती । स्वप्रियदुहितुः परेद्युः आहारः लप्स्यते वा न वा इति शङ्कया प्रेममयी माता तथावोचत् । एतादृशं दारुणं कारुण्यपूर्णञ्च जीवनं व्यतीयाय सर्वोऽपि परिवारः। बहुभ्यः दिनेभ्यः पर्याप्ताहाराभावात् क्षुधिता बालिका तदानीमेव रोटिकां खादितुम् आरेभे । तावति काले कुतश्चित् अकस्मादागतः कश्चन अरण्यमार्जालः बालिकायाः हस्तात् रोटिकामाकृष्य कुत्रचिदधावत्। बालिका महता दुःखेन आक्रन्दितुम् उपचक्रमे । एतत्करुणापूर्णदृश्यम् अवलोक्य कठोरहृदयस्य राणाप्रतापस्यापि मनः अद्रवत् ।

किन्तु स्वीकृतां प्रतिज्ञां स्मरन् नानाविधकष्टमनुभवन्नपि दृढमनस्को भूत्वा पुनः सैन्यशक्तिं वर्धयितुकामः राणाप्रतापः सिन्धुनदीप्रदेशं जगाम । तत्र कार्यनिष्ठान् वीरराजपुत्रान् एकीकृत्य स्वसङ्कल्पसिद्धये प्रायतत । तत्र आरण्यकैः बिल्लैः न केवलं रजपूतमहिलानां बालानाञ्च रक्षणं संकष्टसमये कृतम्, अपि च तान् खनिकूपेषु संरक्षितम् । हल्दीघाटी समराङ्गणे बिल्लयुद्धवीराः न केवलं युद्धेन उपकृतवन्तः किन्तु गूढचारकृत्यं निर्वर्त्य पररहस्यं विघटयामासुः ।

तदैव एकस्मिन् दिने राजस्थानसीमाम् अतीत्य यदा राणाप्रतापः गच्छन्नासीत्, तदा एकः वृद्धः आजगाम । सैन्यसङ्ग्रहणं तत्प्रशिक्षणञ्च बहुवित्तव्ययसाध्यं कार्यम् । महता दारिद्र्येण परितप्यमानस्य प्रतापस्य इदमेव चिन्ताकारणमासीत् । कथञ्चित् स्वसङ्कल्पसिद्धये सः कुत्रापि गन्तुं सिद्धस्सन्, राजस्थानसीमाम् अतीत्य जिगमिषुरासीत् । एनमुदन्तं श्रुत्वा भामाशाहनामा सः वृद्धः

किमपि महत्कार्यं कर्तुं कालः समायातः इति भावितवान् । सः राणाप्रतापस्य पूर्वजानाम् आस्थाने अमात्यः आसीत् । सः बहुधनमपि अर्जितवान् । सः प्रतापं प्रति उवाच-'प्रभो, अहं भवद्वंशस्य सेवकः, मम हस्ते प्रभूतं धनं विद्यते, तेन भवान्, पञ्चविंशतिसहस्रसैनिकान् द्वादशवर्षपर्यन्तं पालयितुं प्रभविष्यति' इति । तदा प्रतापः प्रोवाच 'नैतद्धनं स्वीकर्तुम् अहम् इच्छामि । कुत्रापि गत्वा धनं सङ्ग्रहिष्यामि' इति । तदा भामाशाहः प्रावोचत् 'नैतद्धनं परकीयम् । देशरक्षणार्थं मया अर्जितमिदं धनं यदि साहाय्यकं भवति तर्हि मम जीवनं सार्थकं भवेत्'-इति ।

वृद्धस्य भामाशाहस्य वचनं श्रुत्वा आनन्देन राणाप्रतापस्य मनः कृतज्ञतापूर्णं बभूव । सः तद् बहुधनं सम्प्राप्य सैन्यशक्तिसङ्ग्रहकार्यं प्रारेभे । तदानीम् अन्यतोऽपि वित्तं प्राप्तम् । तत्सर्वम् उपयुज्य सः महासैन्यं रचयामास ।

राणाप्रतापः स्वजन्मस्थानमेव परित्यज्य गतवानिति तस्य शत्रवः परिहसन्ति स्म । इतः परं पुनः स योद्धुम् आगच्छेदिति स्वप्नेऽपि ते न चिन्तयन्ति स्म । किन्तु महाराणाप्रतापः तेषां निरीक्षां मिथ्या कृत्वा पराक्रान्तां स्वकीयराज्यसीमाम् असीमपराक्रमेण, स्वाधीनां कर्तुम् अभ्यपतत्। हस्तच्युतान् राज्यस्य भूप्रदेशान् एकैकमपि क्रमेण जित्वा वैरिहृदये भीतिमुत्पादयामास । एतावति काले महतीं कष्टपरम्पराम् अनुभूय जर्जरितः तस्य देहः, ततः परमपि महान्तं श्रमम् अनुभवितुं समर्थः नासीत्। विजयमालासु एकैकशः तस्य ग्रीवायां विराजमानासु चित्तौडविजयमाला कण्ठं नालञ्चकार इति तस्य अतृप्तिरासीत् । सः मेवाडस्य राजा आसीत् । किन्तु देहपरित्यागकाले आत्मना प्रशिक्षितान् यूनः दृष्ट्वा तैः चित्तौडप्राप्तौ प्रदत्ते आश्वासने जातविश्वासः निश्चिन्तः बभूव । यदा महाराणाप्रतापः षट्पञ्चाशत् (५६) वर्षदेशीयः तदा चावण्डप्रान्ते मृगयया व्रणितः सप्तनवत्युत्तरपञ्चदशशततमे वर्षे, प्रथमे मासे, नवविंशतितमे दिने (२९.०१.१५९७) प्राणान् अत्यजत् । तदनन्तरम् अस्य पुत्रः अमरसिंहः, राणाप्रतापस्य मनोकामनां पूरयामास ।

महाराणाप्रातापसिंहस्य देशभक्तिः तथा स्वातन्त्र्यसमरे योगदानं सदा स्मरणीयम् । तस्य आत्मीयः अश्वः चेतकोऽपि स्फूर्तिदायकः । अतः भारतगणराज्येन अस्य स्मृतौ मुद्रा, नाणकम् अपि प्रकाशितम्। वीराधिवीरस्य महाराणा प्रतापसिंहस्य एव आरूढचेतकविग्रहः संसदीय भवनस्य पुरतः संस्थापितः।

एतादृश देशभक्ताः पुरा भारते आसन्, अद्यापि वर्तन्ते । अतः वयम् अपि एतादृशानां चरितं पठित्वा देशभक्ताः भवेम ।

## शब्दार्थः - टिप्पणी

**बद्धपरिकरः** : सोपकरण-ಸಜ್ಜಾದ ಯುದ್ಧೋಪಕರಣಗಳುಳ್ಳವನು-well equipped with weapons

**दास्यदूषिता** : दासभावेन दुष्टाः-दास्येन दूषिता-ದಾಸ್ಯಭಾವದಿಂದ ಕಂಗೆಟ್ಟದ್ದ - pained out of slavery

**दीपशिखेव** : ज्वाला इव-ದೀಪದ ಕುಡಿಯಂತೆ-like a flame of lamp- दीपस्य शिखा इव

**सङ्कल्पसिद्धये** : इच्छासिद्धये-ಗುರಿಸಿದ್ಧಿಗಾಗಿ-to achieve the goal.

**कष्टपरम्परा** : दुःखश्रेणी-ದುಃಖ ಪರಂಪರೆ-series of difficulties

**तृणबीजचूर्णेन** : यवपिष्टेन-ಗೋಧಿಹಿಟ್ಟು (ಹುಲ್ಲು ಬೀಜದ ಹಿಟ್ಟು)-by wheat flour

**व्यतीयाय** : तीर्त्वा-ದಾಟಿ-crossed

**उपचक्रमे** : आरेभे-ಆರಂಭಿಸಿದನು-commenced

**मितयुतः** : परिमितः-ಮಿತವಾದ-limited

**उदन्तः** : वार्ता-ವಾರ್ತೆ-news

**पराक्रान्ता** : वैरिभिः आक्रान्ता-ವೈರಿಗಳಿಂದ ಆಕ್ರಮಿಸಲ್ಪಟ್ಟ-attacked by the enemies

**अभ्यपतत्** : आक्रमत्-ಆಕ್ರಮಿಸಿದನು-attacked

**हस्तच्युतम्** : करगलितम्-ಕೈ ತಪ್ಪಿದ-slipped from hand

**जर्जरितः** : क्षीणः-ಜರ್ಜರಿತ-weakened

**यूनः** : तरुणान्-ಯುವಕರನ್ನು-youth (Ref. Page No. 91)

**आत्मसात्** : स्वाधीनम्-ಅಧೀನ-to own

**जज्ञे** : जन्म लेभे-ಜನಿಸಿದವನು-took birth

**मेनिरे** : ज्ञातवन्तः-ತಿಳಿದರು-considered

**खनिकूपः** : खनिनिमित्तः कूपः-ಗಣಿಗಾಗಿ ಕೊರೆದ ಬಾವಿ-mining pits

**राजपुत्रः** : राज्ञः पुत्रः

**महासैन्यं** : महत् च तत् सैन्यं च

**शौर्यगाथा** : शौर्यस्य गाथा

# अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तराणि लिखत ।**

1. राणाप्रतापः कस्मिन् ग्रामे अजायत ?
2. राणाप्रतापस्य पिता कः ?
3. राणाप्रतापस्य अश्वस्य नाम किम् ?
4. राणाप्रतापस्य पूर्वजानाम् अमात्यः कः ?
5. बालिकायाः हस्तात् रोटिकाम् आकृष्य कः अधावत् ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. राणाप्रतापस्य प्रतिज्ञा का ?
2. बिल्लाः राणाप्रतापं कथं साहाय्यम् अकुर्वन् ?
3. भारतसर्वकारः राणाप्रतापाय कथं गौरवम् असूचयत् ?

**III मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. राणाप्रतापः -----सभाम् आकारितवान् ।
2. वैरिणां ----- समुद्रोपमम् आसीत् ।
3. कठिणहृदयस्य राणाप्रतापस्य ----- अद्रवत् ।
4. कष्टपरम्परायाः अपि काचन ----- भवेत् ।

| सैन्यं ,सीमा, मनः, गण्यानाम् |
|---|

**IV पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. मम हस्ते प्रभूतं धनं विद्यते ।
2. नैतद्धनं स्वीकर्तुम् अहम् इच्छामि ।
3. कुत्रापि गत्वा धनं संग्रहिष्यामि ।
4. मम जीवनं सार्थकं भवेत् ।

## V दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया उत्तरं लिखत ।

1. महाराणाप्रतापेन अनुभूता कष्टपरम्परा ।
2. रोटिकाप्रसङ्गः ।
3. भामाशाहस्य राजभक्तिः ।

## VI रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।

1. 'मेवाड' इति स्थलं राजस्थाने प्रसिद्धमासीत् ।
2. उदयसिंहः प्रतापी राजा आसीत् ।
3. वैदेशिकाः वाणिज्यार्थम् आगच्छन्ति स्म ।

## VII संयोजयत ।

| क | ख |
|---|---|
| जावन्ताबाई | राणाहमीरः |
| बिल्लाः | प्रतापस्य माता |
| अकबर्बादशह | योद्धारः |
| सिसीदिया | दिल्लीश्वरः |

## — योग्यताविस्तारः —

परिवर्तिनि संसारे मृतः को वा न जायते ।

स जातो येन जातेन याति देशः समुन्नतिम् ।।




भारत सर्वकारेण विमोचिता महाराणाप्रतापस्य मुद्रा



महाराणाप्रतापः



चेतकारूढः राणाप्रतापः

### अनुशंसितग्रन्थाः


1. ಪ್ರತಾಪಸಿಂಹ - ಶ್ರೀ ವೆಂಕಟೇಶ ಗಂಗಾವತಿ - ಭಾರತ ಭಾರತಿ ಪುಸ್ತಕ ಸಂಪದ - ರಾಷ್ಟ್ರೋತ್ಥಾನ ಸಾಹಿತ್ಯ, ಕೆಂಪೇಗೌಡನಗರ, ಬೆಂಗಳೂರು – 1974.

2. History of India Part II - Sri D.N. Kundra and Smt. S.D. Kundra - Navdeep Publications, Chawri Bazar, Delhi- 1984

3. श्री महाराणाप्रतापसिंहचरितम्-हसूरकरोपाङ्कः श्रीपादशास्त्री-जगद्धितप्रकाशनं -पुणे-1920


✻ ✻ ✻

# ६. अनुरागोदयः

(कादम्बरी-बाणभट्टः)

N2X4D4

## पीठिका

श्रव्यं दृश्यं चेति काव्यं द्विधा विभक्तम् । श्रव्यकाव्यं पुनः द्विधा विभक्तम्-पद्यकाव्यं गद्यकाव्यं चेति। 'गद्यसाम्राज्यसार्वभौमः' इति प्रख्यातेन महाकविबाणभट्टेन 'हर्षचरितम्' 'कादम्बरी' इति द्वे काव्ये रचिते। अस्य कालः क्रि.श. सप्तमशतकस्य आदिभागः इति निर्धारितः । अयं पाठ्यभागः कादम्बर्याः 'महाश्वेतावृत्तान्तः' इति कथाभागात् सङ्गृहीतः । अत्र पुण्डरीक-महाश्वेतयोः प्रथमानुरागः मनोहरशैल्या निरूपितः ।

(**पूर्वकथा** - उज्ञयिनीदेशस्य राजा तारापीडः स्वपुत्रं चन्द्रापीडं यौवराज्ये नियोजितवान् । तदनु चन्द्रापीडः सेनाबलैः सह दिग्विजययात्रां प्रस्थितवान् । क्रमेण सञ्चरता अनेन कैलासपर्वतप्रदेशः प्राप्तः । तत्र एकस्मिन् प्रदेशे अच्छोदसरः वीक्ष्य, तस्य दक्षिणे तीरे एकं प्राचीनशिवालयं प्राप्तवान् । तत्र श्वेतवस्त्रधारिणीं धृतनियमां कामपि कन्यकाम् अपश्यत् । उपजातकुतूहलः सः तां प्रणिपत्य, ईदृशस्य तपोनियमस्य कारणम् अपृच्छत् । तदा सा स्ववृत्तान्तं कथयति)

**राजपुत्र ! किमनेनातिनिर्घृण-हृदयाया मम मन्दभाग्यायाः जन्मनः वैराग्यवृत्तान्तेन अश्रवणीयेन श्रुतेन । तथापि यदि कुतूहलं, तत् कथयामि, श्रूयताम् - हंसो नाम जगद्विदितो गन्धर्वः बाल एव राज्यपदमासादितवान् । अप्सरसां कुले गौरीति नाम्ना कन्यका प्रसूता । तां च गन्धर्वाधिपतिः हंसो प्रणयिनीमकरोत् । तयोः अहमीदृशी आत्मजा समुत्पन्ना । तातस्तु अनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मम जन्माभिनन्दितवान् । अवाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान् । साहं पितृभवने शैशवमतीतवती । क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन, नवयौवनेन पदम् ।**

**एकदाहमम्बया सह मधुमास-विस्तारित-शोभं प्रोत्फुल्ल-नव-नलिन-कुमुद-कुवलय-कह्लारमिदमच्छोदं सरः स्नातुमभ्यागमम् । एकस्मिंश्च प्रदेशे झटिति वनानिलेनोपनीतम्, अहमहमिकया मधुकरकुलैरनुबध्यमानम्, अनाघ्रातपूर्वम्, अमानुषलोकोचितं, कुसुमगन्धमभ्यजिघ्रम् । कुतोऽयमित्युपारुढकुतूहला चाहं मुकुलितलोचना तेन कुसुमगन्धेन**

मधुकरीवाकृष्यमाणा, कतिचित्पदानि गत्वा, हर-नयन-हुताशनेन्धनीकृत-मदनशोकविधुरं वसन्तमिव तपस्यन्तम्, अखिल-मण्डल-प्राप्त्यर्थमीशान-शिरः-शशाङ्कमिव धृतव्रतम्, अयुग्मलोचनं वशीकर्तुकामं काममिव सनियमम्, तपस्तडाग-कमलिनी-मृणालेनेव यज्ञोपवीतेनालङ्कृतम्, एकेन सनाल-बकुल-फलाकारं कमण्डलुम्, अपरेण मकरकेतु-विनाश-शोकरुदिताया रतेरिव बाष्पजलबिन्दुभिरारचितां स्फटिकाक्षमालिकां करेण कलयन्तम्, अलङ्कारमिव ब्रह्मचर्यस्य, यौवनमिव धर्मस्य, विलासमिव सरस्वत्याः, सङ्केतस्थानमिव सर्वश्रुतीनां, मधुमासमिव कुसुम-धवल-तिलक-भूति-भूषित मुखम्, आत्मानुरूपेण सवयसा अपरेण तापसकुमारेणानुगतम्, अतिमनोहरं, स्नानार्थमागतं, मुनिकुमारकमपश्यम् ।

तेन च कर्णावतंसीकृताम्, अमृतबिन्दुनिस्यन्दिनीम्, अदृष्टपूर्वां, कुसुममञ्जरीमद्राक्षम् । तं तपोधनयुवानम् ईक्षमाणाहमचिन्तयम्-अहो ! रूपातिशयनिष्पादन-उपकरणकोशस्य अक्षीणता विधातुः, यत्त्रिभुवनाद्भुतरूपसम्भारं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपराशिः अयमपरो मुनिमायामयो मकरकेतुरुत्पादितः । मन्ये च सकलजगत्-नयनानन्दकरं शशिबिम्बं विरचयता लक्ष्मीवास भवनानि कमलानि सृजता प्रजापतिना एतदानन-आकार-करणकौशलाभ्यास एव कृतः, अन्यथा किमिव हि सदृशवस्तु विरचनायाः कारणम् ? तद्रूपातिशयं द्रष्टुमिव कुतूहलादालिङ्गन-लालसेभ्यो-अङ्गेभ्यो निरगात् रोमाञ्चजालकम् । अशेषतः स्वेदाम्भसा धौतश्चरणयुगलादिव हृदयमविशद्रागः । अशेषपूजनीया चेयं जातिरिति कृत्वा तद्वदनाकृष्ट-दृष्टिप्रसरम्, अचलितपक्ष्ममालम्, अदृष्टभूतलम्, अस्मै प्रणाममकरवम् ।

तदा तस्याप्यभिनवागतं मदनं प्रत्युद्गच्छन्निव रोमोद्गमः प्रादुरभवत् । वेपथुगृहीता व्रतभङ्गभीतेव अकम्पत करतलगताक्षमाला । तया तु तस्यातिप्रकटया विकृत्या द्विगुणीकृतमदनावेशा तत्क्षणमहं अवर्णनयोग्यां कामप्यवस्थामन्वभवम् ।

प्राप्तप्रसरा चोपसृत्य अस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम्-'भगवन् ! किमभिधानः ? कस्य वायं तपोधनस्य युवा ? किन्नामतरोरियम् अनेन अवतंसीकृता कुसुममञ्जरी' ? इति ।

स तु मामीषद्विहस्य अब्रवीत् -'बाले ! श्रूयताम्, अस्ति खलु महामुनिः दिव्यलोकनिवासी श्वेतकेतुर्नाम । तस्य च भगवतः अशेषत्रिभुवनसुन्दरं रूपमासीत् । स कदाचित् देवतार्चनकमलानि उद्धर्त्तुं, मन्दाकिनीमवततार । तं तदा देवी लक्ष्मी ददर्श । आलोकनमात्रेण समासादित-सुखायां क्रमेण तस्मिन्नेवासनीकृते पुण्डरीके कुमारः समुदपदि । ततस्तमुत्सङ्गेनादाय-'भगवन् ! गृह्यतां

तवायमात्मजः' इत्युक्त्वा श्वेतकेतवे ददौ । पुण्डरीकसम्भवतया तस्य तदेव पुण्डरीक इति नाम चक्रे। सोऽयम् । इयं च सुरासुरैः मथ्यमानात् क्षीरसागरात् उद्गतः पारिजातनाम पादपस्य मञ्जरी । तदेतत् कात्स्न्र्येन आवेदितम्' इति ।

इत्युक्तवति तस्मिन्, स तपोधनयुवा किञ्चिदुपदर्शितस्मितो मामवादीत्-'अयि कुतूहलिनि! किमनेन प्रश्नायासेन ? यदि रुचितसुरभिपरिमला 'तदा गृह्यतामियम्' इत्युक्त्वा समुपसृत्य, आत्मीयात् श्रवणादपनीय, मदीये श्रवणपुटे तामकरोत् । मम तु तत्करतलस्पर्शलोभेन तत्क्षणमपरमिव पारिजातकुसुमावतंसस्थाने पुलकम् आसीत् । स च मत्कपोलस्पर्शसुखेन तरलीकृताङ्गुलीजालकात् करतलादक्षमालां लज्जया सह गलितामपि नाज्ञासीत् । अथाहं तामसम्प्राप्तामेव भूतलम् अक्षमालां गृहीत्वा सलीलं तद्भुज-पाश-सन्धानितकण्ठग्रहसुखमिवानुभवन्ती दर्शितापूर्वहारलता-लीलां कण्ठाभरणतामनयम् ।

उच्चालितायां च मयि, द्वितीयो मुनिदारकः तम् अवादीत्-'सखे, पण्डरीक! नैतदनुरूपं भवतः । धैर्यधना हि साधवः । क्व ते तद्धैर्यम् ? क्वासाविन्द्रियजयः ? क्व ते गुरूपदेशः ? कथं करतलात् गलिताम् अपहृतामक्षमालामपि न लक्षयसि ! अहो ! विगतचेतनत्वम् । अपहृता नामेयम्, इदमपि तावदपह्रियमाणम् अनया अनार्यया निवार्यतां हृदयम्' ।

तदा सः किञ्चदुपजातलज्ज इव प्रत्यवादीत्-'सखे, कपिञ्जल ! किं मामन्यथा सम्भावयसि'! इत्यभिधाय, अलीककोप-कान्तेन प्रयत्नविरचित-भीषण-भ्रुकुटिभूषणेन, स्फुरिताधरेण मुखेन्दुना मामवदत्-'चपले ! प्रदेशादस्मात् इमामक्षमालाम् अदत्त्वा पदात् पदमपि न गन्तव्यम्' इति । तच्च श्रुत्वाहम् आत्मकण्ठादुन्मुच्य एकावलीं 'भगवन् ! गृह्यतामक्षमाला' इति मन्मुखासक्तदृष्टेः शून्यहृदयस्यास्य प्रसारिते पाणौ निधाय, स्वेदसलिलस्नातापि पुनः स्नातुमवातरम् । उत्थाय च कथमपि प्रयत्नेन नीयमाना सखीजनेन बलादम्बया सह तमेव चिन्तयन्ती स्वभवनमयासिषम् ।

## शब्दार्थः - टिप्पणी

**समाचारः** : आचारपूर्वकविधिः-ಆಚರಿಸಬೇಕಾದ ವಿಧಿ-(usual) rites to be performed

**पदं कृतम्** : स्थानं विहितम्-ಪದಾರ್ಪಣ ಮಾಡಿತು-set foot (appeared)

**मधुमासः** : चैत्रमासः-ಚೈತ್ರಮಾಸ-a month in the spring season

**विस्तारिता** : विस्तरणं कृता -ಹೆಚ್ಚಾದ-increased

**प्रोत्फुल्लः** : विकसितः-ಅರಳಿದ-bloomed

**कुमुद-कुवलय-कह्लारः** : श्वेत-नील-रक्त कमलम्-ಬಿಳಿ-ನೀಲಿ-ಕೆಂಪು ಬಣ್ಣದ ತಾವರೆ-white-blue-red lotus

**वनानिलेनोपनीतम्** : अरण्यवायुना आनीतम्-ವನದ ಗಾಳಿಯಿಂದ ಬಂದ-carried by forest breeze

**अनुबध्यमानम्** : अनुगम्यमानम्-ಅನುಸರಿಸಲ್ಪಡುತ್ತಿರುವ-being followed closely

**अनाघ्रातपूर्वम्** : न आघ्रातपूर्वम्-ಹಿಂದೆ ಆಘ್ರಾಣಿಸದ-never smelt before

**अमानुषलोकः** : देवलोकः-ದೇವಲೋಕ-abode of gods-न मानुषलोकः

**उपारूढम्** : उत्पन्नम्-ಜನಿಸಿದ-born

**इन्धनीकृतः** : भस्मीकृतः-ಬೂದಿಯಾದ-reduced to ashes

**शोकविधुरम्** : शोकेन विधुरम्, विह्वलम्-ಶೋಕಾವಿಷ್ಟ-grief stricken

**अयुग्मलोचनम्** : त्रिलोचनम्-ಮುಕ್ಕಣ್ಣ-Lord Shiva-अयुग्मं लोचनं यस्य तम्

**अखिलमण्डलः** : पूर्णमण्डलः-ವೃತ್ತಾಕಾರ-full orb

**धृतव्रतम्** : स्वीकृततपोनियमम्-ತಪೋ ನಿಯಮದ ಆಚರಣೆಯಲ್ಲಿರುವ -practicing austerities

**तपस्तडागः** : तपःकासारः-ತಪಸ್ಸರೋವರ-lake of penance-तप एव तडागः

**मृणालः** : बिसतन्तुः-ತಾವರೆಯ ದಂಟಿನ ಬಿಳಿಯ (ಎಳೆ) ತಂತು-Fibre of a lotus stalk

**बकुलफलम्** : केसरफलम्-ಬಕುಲದ ಹಣ್ಣು (ರಂಜಲ ಹಣ್ಣು)-Bakula fruit

**कलयन्तम्** : धारयन्तम्-ಹಿಡಿದ-held

**सङ्केतस्थानम्** : संयोगाय मिथो निर्दिष्टस्थलम्-ಪರಸ್ಪರ ಭೇಟಿಯಾಗಲು ನಿರ್ಧರಿಸಿಕೊಂಡ ಸ್ಥಳ-self chosen place to meet

**तिलकभूतिः** : १) त्रिपुण्ड्रात्मकं भस्म-ಭಸ್ಮದ ಪಟ್ಟೆ-marks of sacred ash (Bhasma)

२) तिलकसंज्ञकवृक्षः तेषां भूतिः समृद्धिः-ತಿಲಕದ ಪುಷ್ಪಗಳು ತುಂಬಿರುವ ಮರ-tree full of Tilaka flowers

**कर्णावतंसीकृताम्** : श्रवणविभूषणीकृताम्-ಕಿವಿಯ ಆಭರಣವಾಗಿ ಧರಿಸಿದ-wore on ear as an ornament

**अमृतबिन्दुनिस्यन्दिनीम्** : मधुबिन्दुस्राविणीम् -ಮಕರಂದ ಸುರಿಸುತ್ತಿರುವ-dripping down drops of nector

**निष्पादनम्** : निर्माणम्-ನಿರ್ಮಾಣ-creation

**सम्भारः** : समूहः, सङ्ग्रहः-ಸಾಮಗ್ರಿ-material

**मुनिमायामयः** : तापसवेषधारी-ತಾಪಸ ವೇಷಧರಿಸಿದ-in disguise of a sage

**सृजता** : सृष्टिं विदधता-ಸೃಷ್ಟಿಸಿದವನಿಂದ-by the creator

**करणकौशलाभ्यासः** : रचनानैपुण्याभ्यासः-ರಚನಾ ಕೌಶಲದ ನಿಪುಣತಾ ಅಭ್ಯಾಸ-practicing to gain skill

**रागः** : रक्तवर्णः, प्रेम-ಕೆಂಪು; ಅನುರಾಗ- redness; passion

**अशेषपूजनीया** : समस्तलोक-अर्चनीया-ಎಲ್ಲರಿಂದ ಪೂಜಿಸಲ್ಪಡುವ-worshipped by all

**इयं जातिः** : तापसवर्गः-ತಾಪಸವರ್ಗ-group of sages

**पक्ष्ममाला** : लोचनरोमपङ्क्तिः-ಕಣ್ಣಿನ ರೆಪ್ಪೆ-eye-lashes

**प्रत्युद्गच्छन्निव** : सम्मुखं व्रजन्निव-ಸ್ವಾಗತಿಸಲೋ ಎಂಬಂತೆ-as if to welcome

**रोमोद्गमः** : रोमाञ्चनः-ಮೈನವಿರೇಳು-horripilation

**अतिप्रकटया** : बाहुल्येन प्रकाशितया-ಸ್ಪಷ್ಟವಾಗಿ ತೋರುತ್ತಿರುವ-clearly visible

**विकृत्या** : विकारेण-ಬದಲಾವಣೆಯಿಂದ-on account of the change

**प्राप्तप्रसरा** : लब्धावकाशा-ಅವಕಾಶ ಪಡೆದ-getting a suitable opportunity

**गलितामपि** : पतितामपि-ಜಾರುತ್ತಿರುವುದನ್ನೂ ಸಹ-even slipping down

**तरलीकृतम्** : कम्पितम्-ಕಂಪಿಸಿದ-tremulous

**उच्चालिता** : अग्रे चालिता-ಮುಂದೆ ನಡೆಸಿದ-one who leads ahead

**विगतचेतनत्वम्** : निर्गतचेतनत्वम्-ಮೈ ಮರೆವು-forgetting one self

**अनार्यया** : दुर्विनीतया-ದುಷ್ಟಳಿಂದ-by the mischievous

**अलीककोपकान्तेन** : मिथ्याक्रोधशोभितेन-ಹುಸಿ ಮುನಿಸಿನಿಂದ ಶೋಭಿತನಾದ-charming on account of his feigned anger

**पदात् पदमपि** : एकपदमपि-ಒಂದು ಹೆಜ್ಜೆಯನ್ನೂ ಸಹ-even a single step

**एकावली** : ಏಕಾವಲೀಹಾರ-single stringed pearl necklace

**शून्यहृदयः** :रिक्तमनस्कः-ಬರಿದಾದ ಹೃದಯವುಳ್ಳವ-empty hearted

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. महाश्वेतायाः पिता कः ?
2. महाश्वेता कं प्रति स्ववृत्तान्तं कथयति ?

3. महाश्वेता स्नातुं कुत्र आगच्छति ?

4. महाश्वेता किम् अजिघ्रत् ?

5. श्वेतकेतोः तनयः कः ?

## II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. महाश्वेतायाः वपुषि यौवनं कथं पदं कृतम् ?

2. कीदृशं कुसुमगन्धम् अजिघ्रम् इति महाश्वेता वदति ?

3. प्रणामावसरे महाश्वेता कीदृशी आसीत् ?

4. पुण्डरीकस्य अनुरागं महाश्वेता कथं जानाति ?

## III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।

1. तथापि यदि कुतूहलम्, तत् कथयामि ।

2. 'भगवन् ! किमभिधानः' ?

3. 'पुण्डरीक इति नाम चक्रे' ।

4. किम् अनेन प्रश्नायासेन ?

5. धैर्यधना हि साधवः ।

6. किं माम् अन्यथा सम्भावयसि ?

## IV दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. कीदृशं मुनिकुमारकम् अपश्यम् इति महाश्वेता वर्णयति ?

2. तपोधनं युवानं दृष्ट्वा महाश्वेता किम् अचिन्तयत् ?

3. पुण्डरीकस्य जन्मवृत्तान्तं लिखत ।

4. पुण्डरीक-महाश्वेतयोः सरससंवादः ।

## V रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।

1. गन्धर्वाधिपतिः <u>हंसः</u> ।
2. <u>अम्बया</u> सह स्नातुम् अभ्यागमम् ।
3. <u>भगवतः</u> सुन्दरं रूपमासीत् ।

## VI मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।

1. तयोः अहमीदृशी.........समुत्पन्ना ।
2. ...........गन्धम् अभ्यजिघ्रम् ।
3. भगवतः अशेषत्रिभुवनसुन्दरं..........आसीत् ।
4. अनया अनार्यया निवार्यतां.......... ।

| कुसुम, रूपम्, हृदयम्, आत्मजा |
|---|

## VII संयोजयत ।

| क | ख |
|---|---|
| अलङ्कारमिव | ऋषिकुमारकः |
| हंसः | सरस्वत्याः |
| विलासमिव | ब्रह्मचर्यस्य |
| पुण्डरीकः | गौरी |

## — योग्यताविस्तारः —

'वृत्तबन्धोज्झितं गद्यम्' - (साहित्यदर्पणम् - विश्वनाथः)

गद्यं तु गदितं द्वेधा कथा चाख्यायिकेति च ।

कथा कल्पितवृत्तान्ता सत्यार्थाख्यायिका मता ।। - (काव्यादर्शः-दण्डी)

गद्यसाम्राज्यसार्वभौम इति विख्यातः बाणभट्टः महाराजहर्षवर्धनस्य आस्थाने कविरासीत् । श्रीहर्षवर्धनस्य कालः क्रि.श. ६०६-६४८ इति ऐतिहासिकतया प्रसिद्धः । अतः बाणस्य कालः क्रि.श. सप्तमशतकस्य आदिभागः इति वक्तुं शक्यते । बाणस्य पिता चित्रभानुः माता च राजदेवी । शोणानदस्य तटे प्रीतिकूटनगरे सः प्रतिवसति स्म । हर्षचरिते बाणस्य वंशवृक्षः विस्तृततया वर्णितः अस्ति।

कादम्बरी काव्यस्य पूर्वार्धं बाणभट्टेन तथा तस्य मरणानन्तरं पुत्रेण भूषणभट्टेन उत्तरार्धं लिखितम्। 'कथा' प्रकारकं गद्यकाव्यमिदं 'बृहत्कथामाश्रित्य' रचितम् ।

### बाणप्रशस्तयः

जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि ।

प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूवेति ।। - आर्यासप्तशती (आचार्य गोवर्धनः)

वाणी पाणिपरामृष्टा वीणानिक्वणहारिणीम् ।

भावयन्ति कथं वान्ये भट्टबाणस्य भारतीम् ।। - मधुराविजयम् (गङ्गादेवी)

युक्तं कादम्बरीं श्रुत्वा कवयो मौनमाश्रिताः ।

बाणध्वनावनध्यायो भवतीति स्मृतिर्यतः ।। - कीर्तिकौमुदी (सोमेश्वरः)

बाणोच्छिष्टं जगत्सर्वम् । - अभियुक्तोक्तिः

'ಬಾಣಭಟ್ಟನದು ಸಾಟಿಯಿಲ್ಲದ ಪ್ರತಿಭೆ. ಸಂಸ್ಕೃತಭಾಷೆ ಇವನ ಮುಂದೆ ಕೈ ಮುಗಿದು ನಿಲ್ಲುತ್ತದೆ. ಸಂಸ್ಕೃತದ ಗದ್ಯ ಸಾಹಿತ್ಯದಲ್ಲಿ ಇವನೇ ಸಾರ್ವಭೌಮ. ....ಆನೆ ನಡೆದದ್ದೇ ದಾರಿ. ಅವನನ್ನು ಅನುಸರಿಸುವುದೂ ಉಳಿದವರಿಂದಾಗಲಿಲ್ಲ. ಕಾದಂಬರಿಗೆ ಕಾದಂಬರಿಯೇ ಉಪಮಾನ. ಬಾಣಭಟ್ಟನ ಕೃತಿಯ ನಾಯಿಕೆ 'ಕಾದಂಬರಿ'. ಆದರೆ ಮುಂದೆ ಕನ್ನಡದ ಕಥಾಪ್ರಬಂಧದ ಪ್ರಕಾರಕ್ಕೆಯೇ 'ಕಾದಂಬರಿ' ಎಂದು ಹೆಸರಾಯಿತು. ಬಾಣಭಟ್ಟನ ಪಾಂಡಿತ್ಯ 'ಒಂದು ಅದ್ಭುತ, ಅವನ ಮೇರುಕೃತಿ ಕಾದಂಬರಿ ಕೂಡ'.

**- 'ವಿದ್ಯಾವಾಚಸ್ಪತಿ' ಬನ್ನಂಜೆ ಗೋವಿಂದಾಚಾರ್ಯ**

''ಬಾಣಭಟ್ಟನ 'ಕಾದಂಬರಿ'ಯನ್ನು ಓದದ ಸಂಸ್ಕೃತ-ವಿದ್ವಾಂಸ ಯಾರು ? ಅದರ ಹೆಸರನ್ನೂ ಕೇಳದ ಸುಸಂಸ್ಕೃತ ಎಂಥವನು ? ಕನ್ನಡ ಸಾಹಿತ್ಯದಲ್ಲಿ, ಅನೇಕ ಶತಮಾನಗಳ ಪೂರ್ವದಲ್ಲಿ, ಆ ಕೃತಿ ಅನುವಾದಿತವಾಯಿತು. ಅದರ ಕವಿ ನಾಗವರ್ಮನು ಗಣ್ಯನೆನಿಸಿದನು. ಬಾಣನ ಸಂಸ್ಕೃತ ಗೌಡಿಯು ನಾಗವರ್ಮನ ಕನ್ನಡ 'ಪ್ರೌಢಿ'ಯನ್ನು ಪಡೆದುದು ಅಂದಿನ ವಿದ್ಯಾವಂತಿಕೆಗೆ ಭೂಷಣಪ್ರಾಯ''.

**- ಡಾ॥ ದ.ರಾ. ಬೇಂದ್ರೆ**

हृदिलग्नेन बाणेन यन्मन्दोऽपि पदक्रमः ।
भवेत्कविकुरङ्गाणां चापलं तत्र कारणम् ।। - त्रिलोचनः ।

रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति ।
सा किं तरुणी ! नहि नहि वाणी बाणस्य मधुरशीलस्य ।। - धर्मदासः

## अनुशंसितग्रन्थाः


1. Bana's Kadambari-Edited with Skt. commentary and English translation by-M.R. Kale, Motilal Banarasidass, Delhi-7, Fourth Edition – 1968.
2. Kadambari of Banabhatta-Edited with Skt. Hindi commentary by-Shri Krishnamohana Shastri, Chowkhambha Prakashan, Varanasi Edition-reprint – 2011
3. Kadambari Mahashwetavrittanta-Edited with Hindi commentary by-Pradyumna Pandeya-Chowkhamba Vidya Bhavan, Varanasi Edition- 1987.
4. ಬಾಣಭಟ್ಟನ ಕಾದಂಬರಿ-ಕನ್ನಡದ ಕನ್ನಡಿಯಲ್ಲಿ-ಶ್ರೀ ಬನ್ನಂಜೆ ಗೋವಿಂದಾಚಾರ್ಯ, ಈಶಾವಾಸ್ಯ ಪ್ರತಿಷ್ಠಾನ (ರಿ.) ಉಡುಪಿ, ಬೆಂಗಳೂರು, VI Edition - 2011


✻ ✻ ✻

# ७. सा शान्तिः

(अनूदितकथा)

Y5D1T9

## पीठिका

विश्वभाषासु संस्कृतम् अत्यन्तप्राचीनतमम् । संस्कृतभाषायां पद्यकाव्यवत् गद्यकाव्यमपि विपुलमस्ति। सुबन्धुः, बाणभट्टः, दण्डी इत्यादयः कवयः प्रसिद्धाः वर्तन्ते । एवमेव आधुनिककालेऽपि गद्यसाहित्यम् अविच्छिन्नतया प्रवहति । तेषु आधुनिकलेखकेषु कीर्तिशेषः डा ।। बि.एस्. रामकृष्णराव् महोदयः अन्यतमः। अयं पाठ्यभागः एतेन महोदयेन अनूदितात् 'संस्कृतगद्यलेखावली' नामकग्रन्थात् संगृह्य सङ्कलितः । कथायाः मूललेखकस्तु डा ।। डि.शिवरामकृष्णन् महोदयः । मूलं तु आङ्ग्लभाषया विरचितम् ।

**सुभ्रूः, सुकेशी, सुदती, सुवर्णा, 'सा' सुलोचना, संक्षेपतश्चेत् स्मर्तव्यसर्वावयवसुन्दरी । स्वीये तारुण्ये वर्तमाना, विंशतिके वयसि विराजमाना सा सर्वजनमनोहरा सदा रमणीया च । सुमधुरलावण्येन सुभगवेषेण सदाचारैः सुस्मितैः सुसंस्कृतवृत्तेन च अनितरसाधारणम् अपूर्वम् आकर्षणमासीत् अस्याः आननारविन्दे । सिद्धवस्त्रविक्रयशालायां कर्मनिरता सा । सोपानपङ्क्तिषु प्रकोष्ठाभ्यन्तरे वा आगच्छन्त्यां तस्यां निष्कारणमेव तां द्रष्टुमहं वीथिकातः स्वमुखम् उन्नमय्य, सकृत् असकृद्वा तन्मुखकमलं दृष्ट्वा, तत एव स्वीयं कार्यालयं प्रति गच्छन्नासं निरपवादतया ।**

**सः वस्त्रापणः, यत्र एषा कार्यनिरता, कथमपि कुतूहलजनक एव । बहिःस्थितः कोऽपि मनुजपशुः आपणाभ्यन्तरं द्रष्टुं न पारयति स्म । तथापि यदा कदा वा क्वचित् काचित् कमनीयरूपा ललनामणिः यवनिकाभ्यन्तर एव दृष्टिपथमायाति स्म स्वकर्तव्यनिर्वहणनिमग्ना वस्त्रविशेषाणां विशिष्टालङ्कारकर्मणि व्यापृता, आलिखिता अप्सराः इव । आपणस्य प्रवेशद्वारेऽपि काचित् महती काचपेटी यत्रैका निर्जीवा पुत्थलिका सजीवेव प्रतिदिनं नवनवीनं परिधानविशेषं धारयन्ती, रसिकमनांसि विनोदयन्ती, ग्राहकान् आकर्षन्ती, विद्युत्पञ्जरबद्धापि स्वतन्त्रेव विराजमाना, विशिष्य मादृशान् मोहयन्ती अतिष्ठत् । सुविहितवस्त्रविन्यासा चेयं पुत्थलिका तस्याः तरुण्याः सादृश्यं वहन्तीव, सन्दृश्यते स्म । देशविदेशानां विमानपत्तनानां विनाकृतकरविशेषाणां वस्त्रापणानां मध्ये उपलभ्यमानाः जापानशाटिकाः धृत्वा ।**

**यथाकथमपि प्रत्यहं तस्य वस्त्रापणस्य मार्गमाश्रित्यैव निजकार्यालयं प्रति गमनं मम निश्चितं नित्यकर्माभूत् । सकृदपि तस्याः दर्शनं न भवति चेत् नितरां खिद्यते स्म मे चेतः । पूर्णं दिनमपि शून्यमिव प्रतिभाति स्म । स्वीये कार्यालये कार्यमग्नेऽपि मयि, मम मनस्तु तस्यामेव रमते स्म ।**

विरामक्षणेषु तु मे मनःप्राङ्गणे नृत्यन्ती  सा मत्पुरतः प्रादुर्भवति स्म । तदा तदा एवमपि चिन्तासन्ततयः समुद्भवन्ति स्म । 'कास्विदेषा सुन्दरी तरुणी ? ऊढास्यात् अथवा अनूढा ? अपत्यं किं भवेदस्याः ?  पतिः कः स्यात् तस्याः भाग्यभाक्. . . .?' इत्यादि प्रश्नेभ्यः उत्तराणि लब्धानि स्युरपि मम भावनायां भेदः न भवति स्म।

प्रतिदिनमपि तस्याः दर्शनं मह्यं कामपि अव्यक्तरमणीयां तृप्तिमापादयति स्म ययाहं नितरां तुष्टः परेद्युः पर्यन्तम् । कस्मिंश्चिदपि दिने तामहम् अपश्यं केनापि तरुणेन सह सम्भाषमाणाम् । सपद्येव अहं स्वके क्रोधमूर्च्छितः अभवम् । नाशकं तत् दृश्यं सुचिरं सोढुम् । स तस्याः पतिः भवेत् अथवा भ्राता । परं सुपुष्टः सुन्दरो युवा । अहं तु समत्सरं निर्निमेषदृशा दहन्निव तं युवकं दृष्टवान् । न कदापि पूर्वं मया एवम् आचरितमासीत् । दिष्ट्या नाहं परशिवः आसम्, न वा सा रतिः, नापि स पुरुषः मन्मथः क्रोधाग्निना भस्म भवितुम् । यदाहं तां गूढं समीपे सुष्ठु संलक्षितवान् रिक्तः आसीत् तस्याः भालदेशः। न कुङ्कुमं ललाटे, नापि सिन्दूरं सीमन्ते । सा वरणीया किं न स्यात् ? न न दैवहतक! कुतो वा स्वकीयबुद्धिः तस्यां मम ? जनाः तु कथयन्ति यत् चमत्काराः खलु बहवो भवन्ति अस्मिन् जगतीतले इति । परं नाहं सर्वं विश्वसिमि । कथमपि कदाचित् अपि देवः मया न प्रार्थितः तथापि चमत्कारः यः समभवत् एकस्मिन् दिने । सा ननु सा, तस्याः वस्त्रविक्रयशालायाः तरुणी, मे स्वप्नसुन्दरी, सकृत् मां द्रष्टुं मदीयं कार्यालयम् आगच्छत् ।  यदैव द्वारि स्थितः प्रतीहारः मम प्रकोष्ठस्याभ्यन्तरं तां प्रावेशयत् न कोऽपि शब्दः स्मृतिपथमायातः तस्यै स्वागतवचनानि व्याहर्तुम्। किंकर्तव्यतामूढतया  अभिभूतोऽहमभवम् । पुरः एव तिष्ठन्त्यां तस्यां तदभिमुखे उपविश्य तां द्रष्टुमपि नाहम् अपारयम् । न जाने यदि तया ज्ञातमिदं यदहं तां निजहृदयप्रकोष्ठाभ्यन्तरे बद्ध्वा संरक्षितवानिति । को वा वेद दुर्वेदनम्?

सोऽहं व्यवस्थापितवाक् कथञ्चित् स्वागतं व्याहृत्य सविनयमेव अपृच्छम्- कः समाचारः? तां तुदितुं न ईप्सितं मया । सत्यं वक्तव्यं चेत् अहं तस्याः अभिरामः भवितुमेव इष्टवान् ।

'अहमस्मि शान्तिः, सुन्दरस्य पत्नी' प्रत्यवदत्  सा ।

सुन्दर इति नामधेयं परिचितपूर्वं प्रतिभाति मे । सुन्दरः अस्माकं ग्रामस्यैव अभिजनः । कतिभ्यश्चित् वर्षेभ्यः पूर्वं यदैव स मुम्बय्यीं समागतः । अहमेव प्रथमो जन आसं यः तेन मिलितः। तस्य पिता गोविन्दः क्षेत्रकृषकेषु अन्यतम आसीत् निजग्रामे मे । अस्माभिर्ज्ञायते स्म यद् गोविन्दः

बह्वपत्यः न धनिकः । परं सामाजिकदृष्ट्या नासीत् अस्मासु कोऽपि सम्बन्धविशेषः । वयं क्षेत्रस्वामिनः सोऽपि कश्चित् कृषिकर्मकरः ।

सुन्दरो यदा माम् अमिलत् उद्योगः कोऽपि प्रार्थित आसीत् तेन । 'यः कोऽपि उद्योगः भवतु' इत्युक्तवान् आसीत् सः ।

'किमर्थं स्वग्रामं त्यक्तवान्' ? अहमासं पृष्टवान् ।

'वयं भ्रातरः षट् , भगिन्यौ द्वे च । उपरते च पितरि अल्पेन आदायेन निजनिलये जीवितुं महान् क्लेशः अनुभूतः स्वके ग्रामे । दिष्ट्या उभयोरपि कन्ययोः विवाहः पित्रैव निर्वर्तित आसीत् निजजीवितावधौ । भ्रातृषु द्वौ ग्रामे एवम् उषितुं कृतमनस्कौ अभूताम् । अवशिष्टाः चत्वारः एकैकशः ग्रामं त्यक्तवन्तो वयम् । अहमेव चरमः निजसदनात् निर्गतेषु' ।

'त्वं शालायां पठन्नासीः ननु' ?

आम्, अहं दशमकक्ष्यापर्यन्तं पठितवानस्मि ।

'न खलु उद्योगाः अस्मत्प्रतीक्षायां तिष्ठन्ति । तथापि त्वदर्थं कमपि समुचितम् उद्योगम् अन्वेष्टुं प्रयतिष्ये । त्वत्पिता गोविन्दः अस्माकं बहुसेवां कुरुते स्म । दिनद्वयानन्तरं मां पश्य'- इति आज्ञापितवानहम्।

कथमपि दैवगत्या उक्तमात्रे एव मयि कोऽपि उद्योगपतिः स्वीये समवाये एनं सुन्दरं सेवकत्वेन स्वीकृतवान् । ततः परेद्यवि सुन्दरः तत्रासीत् प्रेषितः ।

मन्ये स उद्योगः तेन स्वीकृत आसीत् सुन्दरेण । ततः न कदापि आसीदवसरः सुन्दरं मिलितुम्। वस्तुतः तु मम तावती आसक्तिरपि नासीत् तं पुनः द्रष्टुं, सः अन्यां कामपि प्रार्थनां पुरस्कुर्यादिति मनीषया एव ।

सुन्दरस्य पत्नी शान्तिः मम सम्मुखे अतिष्ठत् । मुहूर्तमात्रे अहं सर्वमपि सुन्दरस्य वृत्तान्तं स्मृतवान् । अतःपरं सा, सा वस्त्रापणे विद्यमाना न अपरिचिता अप्सराः या मम मनोमन्दिरे साधु संस्थापिता । सा तु अस्माकमेव ग्रामस्य सुन्दरस्य पत्नी सा, सा एव ।

'मत्सकाशात् त्वं किम् अपेक्षसे' ? अशान्तमनसा, तामहम् अपृच्छम् अपि तु न कोपेन ।

मम पतिः भवद्विषये उक्तवान् आसीत् । भवद्विषये तु बहुभक्तिभावयुतः खलु सः, यतः उद्योगः दापितो भवता । तेन उद्योगेन च नूतनं जीवनं प्रदत्तमासीत् अस्मिन् महानगरे मम पत्युः । स च मया सह भवन्तं द्रष्टुं सकृद्वा मिलितुम् इयेष, उभयोरपि आवयोः कृतज्ञतां निवेदयितुम् । परं स दिवसः नैव समायातः. . . .

'किं? किं? किमभूत् सुन्दरस्य'?

'गत. . . .गतवर्षे दिवमगात्' ।

'दिवमगात्? अस्ति किञ्चित् अपत्यं ते'?

'नास्ति किमपि' ।

अहम् आसं शोकाविष्टः । एका विधवा ईदृशी तरुणे वयसि एव (मौनम्) !

'श्वः....' मौनं विभज्य शान्तिरवोचत् 'श्वः मम पत्युः प्रथमं वार्षिकश्राद्धं वर्तते । अहमत्र समायाता भवतः आशिषः ग्रहीतुम् । भवांश्च तस्य ग्रामस्यैव अभिजनः क्षेत्रस्वामी च' इति ।

आशिषः? दुर्हृदयेन क्षेत्रस्वामिना? उन्नतोद्योगवान् न क्षेत्रस्वामी चेति योऽयमध्यासः मया सर्वत्र कारितः आसीत् सः झटिति भग्नः अभूत् । अहम् अचिन्तयम् - सेयं शान्तिः अस्माकं संस्कृतेः प्रतिनिधिरस्ति, कथङ्कारमपि अहं न । सा खलु सुसंस्कृता जीवति ।

रूप्यकाणां शतस्य मुद्रामेकाम् उद्धृत्य शान्त्यै प्रायच्छं 'कृपया' स्वीकुरु श्राद्धकर्मणे । सुन्दरः सुशीलः युवा आसीत्।

'अहं भवतः आशीराकाङ्क्षया आगता न खलु धनाशया' उक्तवती सा ।

शान्तिः धनं न स्वीचकार । सा मां प्रणम्य कार्यालयप्रकोष्ठात् बहिः निरगच्छत् । अहं तस्याः विषये अधिकं ज्ञातुम् अभिलषितवान् । परं सा अवकाशं नायच्छत् ।

वस्तुतस्तु अहमस्मि तस्यै नितरां कृतज्ञः । सा खलु मे हृदयात् किल्बिषमेकं निर्मूलितवती।

इदानीम् एषा सा, न 'सा' ।

## शब्दार्थः - टिप्पणी

**सुदती** : सु-शोभनाः दन्ताः यस्याः सा-ಒಳ್ಳೆಯ ಲಕ್ಷಣವಾದ ದಂತಗಳುಳ್ಳವಳು-having beautiful teeth

**सुभगवेषेण** : सुन्दरवेषेण-ಒಳ್ಳೆಯ ವೇಷ ಧರಿಸಿದ - well dressed

**प्रकोष्ठः** : कक्षः-ಕೋಣೆ-room

**वस्त्रापणः** : वस्त्रविक्रयस्थलम्-ಬಟ್ಟೆಅಂಗಡಿ-cloth shop

**उन्नमय्य** : उत्थाप्य-ಮೇಲೆತ್ತಿ-having lifted

**पुत्थलिका** : सालभञ्जिका-ಗೊಂಬೆ-puppet

**काचपेटी** : काचमञ्जूषा-ಗಾಜಿನ ಪೆಟ್ಟಿಗೆ-glass box

**परिधानम्** : आवरणवस्त्रम्-ಉಡುಗೆ-dress

**कमनीयरूपम्** : कमनीयं च तत् रूपं च ।

**सकृत्** : एकवारम्-ಒಮ್ಮೆ-once (अव्ययम्)

**प्रादुर्भवति** : उद्भवति-ಹುಟ್ಟುತ್ತದೆ-arises

**अनूढा** : अविवाहिता-ಅವಿವಾಹಿತೆ-unmarried
न ऊढा

**परेद्युः** : परस्मिन् दिने-ಮಾರನೆಯ ದಿನ-next day

**सपदि** : सत्वरम्-ಕೂಡಲೆ-immediately (अव्ययम् )।

**स्मृतिपथम्** : स्मरणमार्गम्-ನೆನಪು-recollection

**ईप्सितम्** : आप्तुम् इष्टम्-ಪಡೆಯಲು ಬಯಸಿದ್ದು-desired to get

**क्षेत्रपतिः** : भूस्वामी-ಜಮೀನ್ದಾರ-landlord

**निजसदनम्** : स्वगृहम्-ಸ್ವಂತ ಮನೆ-own house

**दापितः** : अनुग्राहितः-ಕೊಡಿಸುವುದು-made to give-दा-धातोः प्रेरणार्थक रूपम् ।

**झटिति** : शीघ्रम्-ಕೂಡಲೆ-immediately

**किल्बिषम्** : दुरितम्-ಪಾಪ-sin

**भालदेशः** : ललाटप्रान्तः-ಹಣೆಯ ಭಾಗ-forehead

**अभिजनः** : सज्जनः-ಸಜ್ಜನ-noble man

**समवायः** : समूहः-ಗುಂಪು-group

**हृदयप्रकोष्ठः** : हृदयान्तरालम्-ಮನದಾಳದಿಂದ-heartily

**व्यवस्थापितवाक्** : योजितवचनः-ಮಾತನ್ನು ಜೋಡಿಸಿಕೊಂಡವನು-with pre-planned speech व्यवस्थापिता वाक् येन सः

**दिष्ट्या** : अदृष्टवशात्- ಸುದೈವದಿಂದ -luckily

**अध्यासः** : भ्रमः-ತಪ್ಪುಗ್ರಹಿಕೆ-misconception

**सीमन्तः** : केशवेशः-ಬೈತಲೆ- the parting line of the hair

**कथङ्कारम्** : कथमपि-ಯಾವುದೇ ರೀತಿಯಲ್ಲಿ-in no way

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तराणि लिखत ।**

1. 'सा' शान्तिः कुत्र कार्यं करोति ?
2. शान्त्याः पत्युः नाम किम् ?
3. सुन्दरः किमर्थं नगरम् आगच्छति ?
4. सुन्दरस्य पिता कः ?
5. सुन्दरः कियत् पर्यन्तं पठितवान् ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. 'शान्त्याः' सौन्दर्यं वर्णयत ।
2. शान्तिः किमर्थं तरुणं द्रष्टुम् आगतवती ?
3. सुन्दरः किमर्थं स्वग्रामं त्यक्तवान् ?

**III दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. शान्तिदर्शनात् तरुणस्य चिन्तासन्तति : ।
2. सा शान्तिः ।

**IV मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. संक्षेपतश्चेत् स्मर्तव्या ...............।
2. ...........नवनवीनं परिधानविशेषं धारयति ।
3. अहमस्मि..............सुन्दरस्य पत्नी ।
4. मे हृदयात् किल्बिषमेकं..............।

| निर्मूलितवती, प्रतिदिनं, सर्वावयवसुन्दरी, शान्तिः |
|---|

## V रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।

1. शान्तिः धनं न स्वीचकार ।
2. उद्योगाः अस्मत् प्रतीक्षायां न तिष्ठन्ति ।
3. सुन्दरः सुशीलः युवा आसीत् ।

## VI संयोजयत ।

| क | ख |
|---|---|
| पुत्थलिका | कुङ्कुमम् |
| ललाटे | पापम् |
| किल्बिषम् | बह्वपत्यः |
| गोविन्दः | वस्त्रापणम् |

## — योग्यताविस्तारः —

कीर्तिशेषः डा।। बि.एस्. रामकृष्णराव्महोदयः बेङ्गलूरुनगरस्य बसवनगुडि नैषनल् महाविद्यालयस्य संस्कृतविभगाध्यक्षः आसीत् । महोदयोऽयं 'विश्वभाषा' इति संस्कृतपत्रिकायाः सम्पादकः आसीत् । एषः सुरसरस्वतीसभायाः कार्यदर्शी च आसीत् । संस्कृत-कन्नड- आङ्ग्लभाषासु अनेन बहवो ग्रन्थाः विरचिताः प्रकाशिताश्च । ताः -

१) संस्कृतगद्यलेखावली ।
२) पद्यमणिमाला ।
३) गद्यरत्नमञ्जूषा ।
४) सुभाषितसमुच्चयः । (सङ्ग्रहः)
५) हास्यमधुबिन्दवः । (हास्यलघुकाः)
६) तिलोत्तमा । (अनुवादः)
७) निबन्धनवनीतम् । (सहलेखनम्)
८) रसहृदयतन्त्रम् । (सहसम्पादनम्)

* * *

# ८. विधिविलसितम्

('गुरुशापम्'-डा ।। के.एस्. नागराजन्)

D6C9N4

## पीठिका

संस्कृतवाङ्मये काव्यसाहित्यम् अगाधम् अपरिमेयं च । कवेः कर्म काव्यम् इति । कविश्च क्रान्त दर्शी। दृश्यकाव्ये रूपकम् उपरूपकमिति द्विविधम् । उपरूपकेषु अष्टादशभेदाः परिकल्पिताः। रूपकाणि दश प्रकारकाणि गण्यन्ते ।

संस्कृतभाषा यथा प्राचीना तथा अर्वाचीना च । डा. के एस्. नागराजन् महोदयेन विरचितस्य 'गुरुशापम्' इति वीररसप्रधानरूपकस्य प्रथमाङ्कस्य कथां संगृह्य 'विधिविलसितम्' इति नाम्ना अत्र सादरं स्वीकृतम् ।

(**पूर्वकथा** - पराक्रमी दानशूरः कर्णः महताप्रयत्नेन अनितरसाधारणगुरुसेवया च भार्गवास्त्रं कथं सम्पादयति इति नाटकेऽस्मिन् निरूपितम् । स सूतपुत्रः इति ज्ञात्वा गुरुः परशुरामः शपति । ततः शिष्यवात्सल्यार्द्रहृदयः परशुरामः कर्णम् अपारकरुणया स्वयमेव सान्त्वनं कृत्वा यथा अनुगृह्णाति इति सम्यगस्मिन् रूपके प्रतिपादितम् ।)

### पात्रपरिचयः

**गुरुः** - परशुरामः

**कर्णः** - राधेयः

(आश्रमस्थो गुरुः परशुरामः कर्णेनान्वीयमानः)

**गुरुः** : **कर्ण ! तव शस्त्राभ्यासः परिसमाप्तः । भवान् यथाकामं गच्छतु ।**

**कर्णः** : **भगवन् ! अत एव दूये भवत्सन्निधिं विहाय गन्तुम् । न जाने कथं वा गुरुदाक्षिणां दास्यामि। भवादृशा गुरवः अतीव विरलाः । मया तु अपूर्वभाग्यविशेषेण भवच्छिष्यत्वमधिगतम् ।**

**गुरुः** : **ममाप्यत्र पुण्यविशेषः । शिष्याः सहस्रशो युगद्वये अस्मिन्मयाध्यापिताः । त्वादृशः शिष्यो न कदापीतः पूर्वं लब्धः । अतस्तवाद्यैव रहस्यतमास्त्रं प्रयोगविधानमुपदिशामि। दृढीक्रियतां चेतः । ममादेशानुसारं नियमेनोपवासः समाचरितो ननु ?**

कर्णः : **आचार्य ! यथाज्ञप्तं तथा सर्वमनुष्ठितम् ।**

गुरुः : **यद्येवं श्रृणु ।** (कर्णस्य दक्षिणकर्णे मन्त्रमुपदिशति) **वत्स! चक्षुषी उन्मील्याद्य पश्य ।**

कर्णः : (उन्मीलिताक्षः) **भगवन् ! आश्चर्यमाश्चर्यम् !**

गुरुः : **अयमेवास्त्रप्रभावः । अत एवेदमस्त्रं भार्गवास्त्रमिति नाम्ना समाहूयते । देवा अपि अस्त्रात् एतस्मात् बिभ्यति । इयमेव पराकाष्ठा तव विद्याभ्यासस्य । आचार्यं मामपि अतिशेषे।**

कर्णः : (साञ्जलिबन्धं कृतज्ञतापूर्णाश्रुकण्ठश्च) **आचार्य ! अनन्यसाधारणम् ईदृशम् अनाथे मयि गुरुवात्सल्यम् अभूतपूर्वम् । सर्वथा भाग्यवताम् अग्रगण्योऽस्मि । तत्कृपया कथयन्तु, का वा गुरुदक्षिणा मया देया ? अनुगृह्यतामयं दासजनः ।** (पादयोः पतति) ।

गुरुः : (शिष्यमुत्थापयन्) **वत्स ! उत्तिष्ठ । निर्लिप्तस्य वने वसतः किं मे तव दक्षिणया कार्यम्। अलमलं विषादेन । तथापि यदि त्वं गुरुदक्षिणां दातुं कृतदृढसंकल्पोऽसि तर्हि श्रृण्विदम्-**

**अस्त्रप्रयोगैश्च मयोपदिष्टैः प्रभुत्वमत्ता सकलास्त्वया नु ।**
**नामावशेषाः सततं क्रियन्ते यदीह दत्ता गुरुदक्षिणा स्यात्   ।। १ ।।**

कर्णः : **आचार्यवर्य ! भवदाज्ञां शिरसि धृत्वा सर्वथा सर्वकालेषु परिपालयिष्यामि ।** (पुनः पुनःतम् अभिवादयते ।)

गुरुः : **वत्स! गच्छ त्वं पुनरागमनाय । त्वयास्त्राणि सर्वाणीतः प्रभृति सज्जनानां दीनानां चावनाय, दुर्जनानां प्रमत्तानां च नाशनायैव प्रयोक्तव्यानि, नान्यथा । सत्यपथादीषदपि न प्रचलितव्यम् । समस्त सन्मङ्गलानि ते भवन्तु ।**

कर्णः : (उत्थाय) **आचार्य ! सत्येन शपे । सर्वथा तथा करिष्यामि । भवदनुग्रह एव रक्षाकवचम्।** (परितोऽवलोक्य आत्मगतम्) **सर्वथा असमर्थोऽस्मि गुरुकुलं गुरुं च विहाय गन्तुम् । अत्रैव मुहूर्तं स्थित्वा ततो गमिष्यामि । अहो ! गुरुकुलवैभवम् । शस्त्राभ्यासनिरतेन मया न कदापि दृष्टपूर्वमेतत् ।**

**विजृम्भते वेदसरस्वतीमयं तपोवनं निर्मलकर्मशोभितम् ।**
**विनीतशिष्यैरपनीतकल्मषैरधिष्ठितं विश्वगुणाभिरञ्जितम्   ।। २ ।।**

(पुरतो शयानं गुरुं दृष्ट्वा तत्रैवोपसर्पति । भूमावुपविश्य गुरोरुत्तमाङ्गं स्वोत्सङ्गे निवेशयति।)

**धन्योऽस्मि गमनात्पूर्वमीदृशी सम्पदागता ।**
**विना तु गुरुशुश्रूषां नान्यद्भाव्यं परं मम   ।। ३ ।।**

(अत्रान्तरे कश्चिद् वरटः कर्णस्योत्सङ्गे मांसभक्षणे निरतः । परशुरामः मन्दोष्णरुधिरसंपर्कात् अर्धोन्मीलिताक्षः)

**गुरुः** : **कर्ण ! कस्येदं रुधिरम् । कथय, कथमिदमत्र संभूतम् ? कथं मे शीर्षस्य तवोत्सङ्गशयनप्राप्तिः ?** (ईषत्क्रुद्ध इव) **सर्वं सत्यमेव वद । किमर्थम् आश्रमं प्रति आगतः ?**

**कर्णः** : **आचार्य ! सर्वं यथासम्भूतं कथयामि । ममापराधः कृपया क्षन्तव्यः ।**

**वज्राख्यः कृमिरेष वीक्ष्य भगवन् पीनं ममोरुद्वयं**
**कृन्तन् चञ्चुपुटेन निर्दयमथो रक्तं पिबन् सत्त्वरम् ।**
**यावद्भक्षयति स्म मांसमखिलं तावच्च सा यातना**
**निद्राभङ्गभयादहो तव मया सोढा समस्ता ध्रुवम् ।। ४ ।।**

**गुरुः** : (सक्रोधम्) **कर्ण ! किमेतदाचरितं त्वया ? सीमातीतस्तव सहनगुणः । सदा सदाचारसंपन्ना मानवा ईदृशीं भयङ्करदेहबाधां क्षणमपि न सहन्ते ।**

**कर्णः** : **सर्वथा सत्यमेतन्नान्यथा ।**

**गुरुः** : (सरोषम्) **क्षणार्धादविश्वसनीयः सञ्जातः । त्वम् असत्यवादीव प्रतिभासि ।**

**कर्णः** : **भगवन् ! न मया किञ्चिदपि इह धर्मविरुद्धमाचरितम् । दयामयो मां भवान् क्षन्तुमर्हति।**

**गुरुः** : (द्विगुणीकृतक्रोधः) **नीच ! प्रकृत्या सत्यवादी वा महतीमीदृशीं बाधां क्षणमपि न सहते। सर्वमस्त्रज्ञानमविचार्य प्रदत्तं भवते । अहो ! भग्नप्रतिज्ञोऽस्मि । हा ! वञ्चितोऽस्मि। अस्थाने खलु निक्षिप्तो मदीयः समस्तो ज्ञानभण्डारः ।** (कोपसंरक्तनयनः) **कथय, शीघ्रमद्यापि सत्यम् ।**

**कर्णः** : (भयात्कम्पमानः) **भगवन् ! जात्या सूतोऽहम् । परन्तु दैवायत्तं कुले जन्म । आसीन्ममोत्कटेच्छा अस्त्राभ्यासे । अतो भवत्पादमूले सर्वाण्यस्त्राण्यधीतानि न कदापि पापकार्याय ।**

**गुरुः** : **एतदप्यसत्यं भवेत् । अपेहि मम दृष्टिपथात् ।**

**कर्णः** : (साञ्जलिबन्धम् ) **भगवन् ! क्षन्तव्यो मेऽपराधः कृपया ।**

**गुरुः** : (विहस्य) **अहो ! अनृतवादी त्वम् । सर्वथा दण्डनार्होऽसि मम । कर्ण ! येन त्वमनृतमवदः तेन त्वम् इत्थम् अभिशप्तोऽसि । अवहितमनाः श्रुणु ।**

**अस्त्रप्रयोगवेलायां यदा ते सूतभावना ।**

**तदा सर्वाणि चास्त्राणि भवेयुर्निष्फलानि हि ।। ५ ।।**

**स वरम् एव । इतो पलायस्व । नोचेदपरमपि शापं तेऽविनीताय शिष्याय । तव पापकर्मणः फलं त्वमेवानुभव ।**

(कर्णः भयशोकाभिभूतो गुरोः पादयोः पतन् मूर्च्छितः । पुनः लब्धसंज्ञः शिशुरिव रोदिति)

(पतितं कर्णमुत्थाप्य) **समाश्वसिहि कर्ण ! समाश्वसिहि । असमर्थोऽस्मि दत्तं शापं प्रतिसंहर्तुम्। विधिरहो बलिष्ठः । चिरं जीव । चिरमभिवर्धतां तव धवलकीर्तिः सर्वासु दिक्षु । दीनेभ्यः यथेष्टं धनं देहि । सदाचारसंपन्नो भव । असत्यं मा कदाचिदपि वद । गच्छ त्वं पुनर्दर्शनाय ।**

**कर्णः** : **गुरुवर्य ! अनुगृहीतोऽस्मि । पुनन्तु मां भवदाशीर्वचनानि । एष गच्छामि मन्दभाग्यः ।** (पुनः पादयोः पतित्वा ततः निष्क्रान्तः)

**गुरुः** : (दयावात्सल्यभरितदृष्ट्या निर्गच्छन्तं कर्णं पश्यन्) **अहो ! विधिविलसितम् ।**

**कर्णः सुशीलेन बभूव शिष्यः प्रियो ममात्यन्तगुणी गुणज्ञः ।**

**तथाप्यसत्येन च भाषितेन प्राप्तो नु शापात्कृपणामवस्थाम् ।। ६ ।।**

(दुःखेन निष्क्रामति )

**श्लोकान्वयः -**

१. यदि इह मयोपदिष्टैः अस्त्रप्रयोगैश्च सकलाः प्रभुत्वमत्ताः (राजानः) त्वया सततं नामावशेषाः क्रियन्ते (तर्हि) गुरुदक्षिणा दत्ता स्यात् नु ।

२. वेदसरस्वतीमयं निर्मलकर्मशोभितम् अपनीतकल्मषैः विनीतशिष्यैः अधिष्ठितं विश्वगुण अभिरञ्जितं तपोवनं विजृम्भते ।

(वेदघोषपूर्णः वेदोक्तकर्मानुष्ठानसहितः दोषरहितविनयशीलशिष्ययुतः सर्वगुणसहितः आश्रमः विराजते इति भावार्थः ।)

३. गमनात्पूर्वम् ईदृशी सम्पदागता धन्योऽस्मि । गुरुशुश्रूषां विना मम नान्यत् परं भाव्यम् ।

४. भगवन् ! अथ एषः वज्राख्यः कृमिः चञ्चुपुटेन निर्दयं वीक्ष्य कृन्तन् पीनं ममोरुद्वयं रक्तं सत्वरं पिबन् यावत् अखिलं मांसं भक्षयति स्म तावच्च सा समस्ता यातना अहो तव निद्राभङ्गभयात् ध्रुवं मया सोढा।

५.	ते अस्त्रप्रयोग वेलायां यदा सूतभावना तदा सर्वाणि च अस्त्राणि निष्फलानि हि भवेयुः।

६.	अत्यन्तगुणी गुणज्ञः कर्णः सुशीलेन मम प्रियोशिष्यः बभूव । तथापि च असत्येन भाषितेन शापात् कृपणामवस्थां प्राप्तो नु ।

## शब्दार्थः - टिप्पणी

**अन्वीयमान** : अनुसरन्-ಅನುಸರಿಸುವ- following

**दूये** : सन्तपामि-ಪರಿತಪಿಸುತ್ತೇನೆ - I repent

**अधिगतम्** : प्राप्तम्-ಹೊಂದಲ್ಪಟ್ಟಿತು-obtained

**समाहूयते** : कथ्यते-ಕರೆಯಲ್ಪಡುತ್ತದೆ-called

**पराकाष्ठा** : परमावधिः-ಅಂತಿಮ-ultimate

**अतिशेषे** : अतिवर्तसे-ಮೀರಿಸುತ್ತೀಯೆ-excel

**सत्येन शपे** : प्रतिज्ञां करोमि-ಶಪಥ ಮಾಡುತ್ತೇನೆ-I swear

**उत्सङ्गः** : अङ्कः-ಮಡಿಲು-lap.

**वरटः** : कीटः-ಕೀಟ-insect.

**कृमिः** : कीटः-ವಜ್ರದುಂಬಿ ಎಂಬ ಕೀಟ-insect by name Vajradumbi.

**कृन्तन्** : छेदयन्-ಕತ್ತರಿಸುತ್ತ -cutting

**चञ्चुपुटः** : वदनाग्रम्-ಕೊಕ್ಕು-stinging organ.

**सोढा** : मर्षिता-ಸಹಿಸಲ್ಪಟ್ಟ-being tolerated.

**अपेहि** : निर्गच्छ-ದೂರಹೋಗು–get lost.

**प्रतिसंहर्तुम्** : प्रत्यानेतुम्-ಹಿಂಪಡೆಯಲು-to withdraw.

**प्रभुत्वमत्ताः** : प्रभुत्वेन मत्ताः-ಒಡೆತನದಿಂದ ಮದೋನ್ಮತ್ತರಾದವರು-insolent kings

**उत्कटेच्छा** : तीव्रेच्छा- ತೀವ್ರವಾದ ಆಸೆ-strong desire उत्कटा च असौ इच्छा च

**वेदसरस्वतीमयम्** :वेदघोषपूर्णम्– ವೇದಘೋಷದಿಂದ ತುಂಬಿದ-filled with Vedic chants

**निर्मलकर्मशोभितम्** : वेदोक्तकर्मालङ्कृतम्– ಪುಣ್ಯಕರ್ಮದಿಂದ ಶೋಭಿತನಾದ-embellished with meritorius deeds directed by Vedas

**विश्वगुणाभिरञ्जितम्** : सर्वगुणविशिष्टम्– ಸರ್ವಗುಣಾಲಂಕೃತ-virtuous

**नामावशेषाः** : केवलम् नाम्ना अवशिष्यन्ते-ಹೆಸರಿನಿಂದ ಮಾತ್ರ ಉಳಿದವರಾಗಿ-completely destroyed

**ज्ञानभण्डारः** : ज्ञानस्य भण्डारः

**निद्राभङ्गः** : निद्रायाः भङ्गः

**कृपणामवस्थाम्** : दैन्यावस्थाम्-ದೀನಾವಸ್ಥೆ-pitiable condition.

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तराणि लिखत ।**

1. कर्णस्य गुरुः कः ?
2. परशुरामः कर्णं किम् अस्त्रम् उपदिशति ?
3. गुरोः उत्तमाङ्गं कर्णः कुत्र निवेशयति ?
4. कर्णस्य रक्षाकवचं किम् ?
5. कः कर्णस्य रक्तम् अपिबत् ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. वज्राख्यः कीटः किं करोति ?
2. कर्णं प्रति परशुरामोपदेशं लिखत ।

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. दृढीक्रियतां चेतः ।
2. भवदनुग्रह एव रक्षाकवचम् ।
3. अहो ! गुरुकुलवैभवम् ।
4. अहो ! भग्नप्रतिज्ञोऽस्मि ।

**IV दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. कर्ण-परशुरामयोः संवादः ।
2. कर्णशापप्रसङ्गः ।

**V पाठनाम उल्लिख्य अधोनिर्दिष्टसङ्ख्याकानां श्लोकानाम् अनुवादं कन्नड - आङ्ग्लभाषया वा कुरुत । श्लोकसङ्ख्याः - २, ३, ५**

**VI मञ्जूषातः पदानि चित्वा रिक्तस्थानं पूरयत ।**

1. भवादृशा गुरवः अतीव............ ।

2. वत्स............उन्मील्याद्य पश्य ।

3. ममापराधः...........क्षन्तव्यः ।

4. ..............मम दृष्टिपथात् ।

| चक्षुषी, विरलाः, कृपया, अपेहि |
|---|

## — योग्यताविस्तारः —

**कवि-कृतिपरिचयः**

बेङ्गलूरुनगरवास्तव्येन प्रथितयशसा डा ।। के.एस्. नागराजन् महोदयेन विरचितं गुरुशापं नाम नाटकं विंशतिशतकस्य संस्कृतसाहित्यकृतिषु उन्नतं स्थानमर्हति । श्री नागराजन् महोदयः दशाधिक कृतिभिः, शताधिक उपन्यासैश्च सहृदयसंस्कृतज्ञानां सुपरिचित एव । डा ।। के.एस्. नागराजन् महोदयः आन्ध्रप्रदेशस्य चित्तूरुमण्डलस्य सोडं ग्रामे जन्म लेभे । तस्य पिता पण्डितशेषय्यर्, माता च श्रीमती नागम्मा । तयोः प्रेरणया एव सः संस्कृतभाषाध्ययने बद्धप्रीत्यादर अभवत् । बाल्यादेव तस्य नानाविधानां संस्कृतकाव्यानां निर्माणे महती आशा आसीत् । अयं महोदयः बेङ्गलूरुनगरस्य ए.जि. कार्यालये लेखा परीक्षाधिकारी आसीत्। तस्मिन् निवृत्यनन्तरं अनेकेषु विद्यालयेषु संस्कृतप्राध्यापक आसीत् ।

**अस्य कृतयः**

| | | |
|---|---|---|
| महाकाव्यम् | - | सीतास्वयंवरम् । |
| पद्यकाव्यानि | - | भारतराष्ट्रवैभवम्, शबरीविलासः, लवलीपरिणयम् । |
| गद्यकाव्यम् | - | भारतीयदेशभक्तचरितम् । |
| नाटकानि | - | उन्मत्तकीचकम्, गुरुशापम् । |
| भाषान्तराणि | - | भास्कराचार्यस्य लीलावती, साक्षात्कारयोगसुधा । |

**वज्राख्यः कीटः**

'वज्राख्यकीटत्वम् अवाप शक्रः' इति महाभारतवचनात् इन्द्रः एव वज्रकीटात्मना कर्णस्य ऊरुद्वयं चिच्छेद । आगामिनि महाभारतसमरे स्वपुत्रम् अर्जुनं कर्णात् त्रातुम् इन्द्रः इमम् उपायं कृतवान् । कर्णपर्वणि (३६ तमे अध्याये) शान्तिपर्वणि (तृतीयाध्याये) अयं प्रसङ्गः विवृतः ।

* * *

# ९. नीतिसारः

(चाणक्यनीतिसारः-कामन्दकनीतिः-राजनीतिरत्नाकरः)

H8A2P8

## पीठिका

नीतिसारः नाम लोकानुभवसारः । संस्कृतसाहित्ये नीतिश्लोकाः विपुलाः उपलभ्यन्ते । तेषाम् अध्ययनेन मनः उल्लसति । ते मानवजीवनस्य समुन्नतये बुद्धिविकासाय च प्रभवन्ति । एते श्लोकाः चाणक्यनीतितः, कामन्दकनीतितः, राजनीतिरत्नाकरतः च स्वीकृताः ।

**एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।**
**वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा ॥१॥**

**अधमा धनमिच्छन्ति धनं मानं च मध्यमाः ।**
**उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥२॥**

**श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिम् ।**
**श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षमवाप्नुयात् ॥३॥**

**कामक्रोधौ तथा लोभं स्वादं शृङ्गारकौतुके ।**
**अतिनिद्रातिसेवे च विद्यार्थी ह्यष्ट वर्जयेत् ॥४॥**

**यथा धेनुसहस्रेषु वत्सो गच्छति मातरम् ।**
**तथा यच्च कृतं कर्म कर्तारमनुगच्छति ॥५॥**

**मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत् ।**
**मन्त्रवत् रक्षयेत् गूढं कार्ये चापि नियोजयेत् ॥ ६ ॥**

**कामधेनुगुणा विद्या ह्यकाले फलदायिनी ।**
**प्रवासे मातृसदृशी विद्या गुप्तधनं स्मृतम् ॥७॥**

**वित्तेन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।**
**मृदुना रक्ष्यते भूपः सत्स्त्रिया रक्ष्यते गृहम् ॥ ८ ॥**

**धनहीनो न हीनश्च धनिकः स सुनिश्चयः ।**
**विद्यारत्नेन यो हीनः स हीनः सर्ववस्तुषु ।। ९ ।।**

**विषयामिषलोभेन मनः प्रेरयतीन्द्रियम् ।**
**तन्निरुन्ध्यात् प्रयत्नेन जिते तस्मिन् जितेन्द्रियः ।। १० ।।**

**वाक् सूनृता दया दानं दीनोपगतरक्षणम् ।**
**इति सङ्गः सतां साधुहितं सत्पुरुषव्रतम् ।। ११ ।।**

**ये प्रियाणि च भाषन्ते प्रयच्छन्ति च सत्कृतम् ।**
**श्रीमन्तो वन्द्यचरणा देवास्ते नरविग्रहाः ।। १२ ।।**

**बकवत् चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्**
**वृकवच्चानुलुप्येत शशवच्च विनिष्पतेत् ।। १३ ।।**

**धर्महेतोस्तथार्थाय भृत्यानां भरणाय च ।**
**आपदर्थश्च संरक्ष्यः कोषः कोषवता सदा ।। १४ ।।**

**अश्वत्थमेकं पिचुमन्दमेकं न्यग्रोधमेकं दशतिन्त्रिर्णी च ।**
**कपित्थबिल्वामलकत्रयं च नवाम्रवापी नरकं न पश्येत् ।। १५ ।।**

**श्लोकान्वयः -**

१. एकेनापि सुपुत्रेण कुलं यथा (तथा) पुष्पितेन सुगन्धिना सुवृक्षेण तत् वनं सर्वं वासितम् ।

(चाणिक्यनीतिः, अध्यायः ३, श्लोकः १४)

२. अधमाः धनम् इच्छन्ति, मध्यमाः धनं मानं च इच्छन्ति, उत्तमा मानम् इच्छन्ति । मानः हि महतां धनम् । (चाणक्यनीतिः, अध्यायः ८, श्लोकः १)

३. श्रुत्वा धर्मं विजानाति, श्रुत्वा दुर्मतिं त्यजति, श्रुत्वा ज्ञानम् अवाप्नोति, श्रुत्वा मोक्षम् अवाप्नुयात् ।

(चाणक्यनीतिः, अध्यायः ६, श्लोकः १)

४. विद्यार्थी कामक्रोधौ, लोभं, स्वादं तथा शृङ्गारकौतुके, अतिनिद्रातिसेवे च अष्ट हि वर्जयेत् ।

(चाणक्यनीतिः, अध्यायः ११, श्लोकः १०)

५. धेनुसहस्रेषु यथा वत्सः मातरं गच्छति तथा कृतं च यत् कर्म कर्तारम् अनुगच्छति । **(उपमालङ्कारः)**

(चाणिक्यनीतिः, अध्यायः १३, श्लोकः १५)

६. मनसा चिन्तितं कार्यं वाचा न एव प्रकाशयेत् । मन्त्रवत् गूढं रक्षयेत्, अपि च कार्ये नियोजयेत्। **(उपमालङ्कारः)** (चाणिक्यनीतिः, अध्यायः ८, श्लोकः ७)

७. विद्या कामधेनुगुणा, अकाले फलदायिनी हि, प्रवासे मातृसदृशी, विद्या गुप्तधनं स्मृतम् ।

(चाणक्यनीतिः, अध्यायः ४, श्लोकः ५)

८. धर्मो वित्तेन रक्ष्यते, विद्या योगेन रक्ष्यते, भूपः मृदुना रक्ष्यते, सत्स्त्रिया गृहं रक्ष्यते ।

(चाणक्यनीतिः, अध्यायः ५, श्लोकः ९)

९. धनहीनः हीनः न, सः च धनिकः सुनिश्चयः, यः विद्यारत्नेन हीनः सः सर्ववस्तुषु हीनः ।

(चाणक्यनीतिः, अध्यायः १०, श्लोकः १)

१०. मनः विषयामिषलोभेन इन्द्रियं प्रेरयति, तत् प्रयत्नेन निरुन्ध्यात्, जिते तस्मिन् जितेन्द्रियः ।

(कामन्दकीयः नीतिसारः, प्रकरणम् १, श्लोकः २९)

११. सूनृतावाक्, दया, दानं, दीनोपगतरक्षणं, सतां सङ्गः, साधुहितम् इति सत्पुरुषव्रतम् ।

(कामन्दकीयः नीतिसारः, प्रकरणम् ६, श्लोकः २)

१२. ये च प्रियाणि भाषन्ते, सत्कारपूर्वकं च प्रयच्छन्ति, ते श्रीमन्तः वन्द्यचरणाः, नरविग्रहाः देवाः ।

(कामन्दकीयः नीतिसारः, प्रकरणम् ६, श्लोकः ३०)

१३. बकवत् अर्थान् च चिन्तयेत्, सिंहवत् पराक्रमेत्, वृकवत् च अनुलुप्येत, शशवत् च विनिष्पतेत्। **(उपमालङ्कारः)** (राजनीतिरत्नाकरः, पृष्टः ११५)

१४. कोषवता कोषः सदा धर्महेतोः, तथा अर्थाय, भृत्यानां भरणाय च आपदर्थं च संरक्ष्यः ।

(राजनीतिरत्नाकरः, पृष्टः ६१)

१५. एकम् अश्वत्थम्, एकं पिचुमन्दम्, एकं न्यग्रोधं, दशतिन्त्रिणीः च, कपित्थबिल्वामलकत्रयं च, नवाम्रवापी नरकं न पश्येत् ।

(कृषिपराशरीयम्)

### भावानुवादः :

२. ये धनम् इच्छन्ति ते अधमाः । ये धनं मानं च इच्छन्ति ते मध्यमाः । ये मानम् इच्छन्ति ते उत्तमाः। यतः महतां धनं मानः । महाराजानां धनम् अभिमानः इति भावः ।

३. आप्तवाक्यश्रवणात्, श्रवणानन्तरं धर्मज्ञानं, दुर्मतित्यागः, ज्ञानप्राप्तिः मोक्षप्राप्तिश्च भवति इति भावः। (श्रवण- ज्ञान आप्तवाक्यश्रवणेन)

४. विद्यार्थी कामः, क्रोधश्च लोभं, स्वादं (रुचिः), शृङ्गारः, कौतुकं (कुतूहलम्), अतिनिद्रा, अतिसेवा च इति अष्ट वर्जयेत् ।

५. धेनुसहस्रेषु यथा वत्सः मातरं गच्छति एव, यत् कृतं कर्म कर्तारम् तत् अनुगच्छति एव । (धेनूनां सहस्रं-धेनुसहस्रं)

७. अकाले फलदायिनी विद्या कामधेनुगुणा हि । देशान्तरगमने मातृसदृशी, गुप्तधनम् इति स्मृतम् । (तत् तत् काले-अकालेऽपि फलदायिनी, अतः कामधेनुगुणा) विद्या । कामधेन्वोः गुणाः यस्यां सा। गुप्तधनं-संरक्षितधनम् ।

८. धर्मो वित्तेन रक्ष्यते। योगेन विद्या रक्ष्यते । भूपः मृदुना रक्ष्यते। सत्स्त्रिया गृहं रक्ष्यते । (वित्तेन विना राजा धर्मः रक्षितुं न शक्यते)। चित्तस्य एकाग्रतया विद्या रक्ष्यते। राजा मृदु (मृदु, तीक्ष्ण, सम इति दण्डत्रयं) दण्डेन रक्ष्यते। सुशीलया स्त्रिया गृहं रक्ष्यते । (मृदुना-यथा अर्हः दण्डः)

९. धनहीनः न हीनः (धनरहितः न कस्मादपि हीनो न भवति) सः धनिकः च सुनिश्चयः। यः विद्यारत्नेन हीनः सः सर्ववस्तुषु हीनः (विद्या विहीनो कनिष्ठः)

१०. मनः विषयामिषलोभेन इन्द्रियं प्रेरयति । तस्मिन् प्रयत्नेन जिते जितेन्दियः। (यद् मनः प्रयत्नेन नियमयेत् । तस्मिन् जिते, मनसि जिते सति जितेन्द्रियः)

११. सत्यवचनं, दया, दानं, शरणागत (उपागत) रक्षणं, सज्जनसङ्गः, (साधवे हितम्) साधुहितम् इति सत्पुरुषाणां व्रतम् (निष्ठा) ।

१२. ये च प्रियाणि भाषन्ते सत्कृतं च प्रयच्छन्ति। वन्द्यचरणाः श्रीमन्तः नररूपाः देवाः ते ।

१३. अर्थान् बकवत् चिन्तयेत् । सिंहवत् च पराक्रमेत् । वृकवत् च अनुलुप्येत । शशवत् च विनिष्पतेत्। (बकपक्षी यथा मत्स्यानां ग्रहणे एकाग्रतया सदा चिन्तयति, तथा अर्थसञ्चयचिन्तनं करणीयम् ।

सिंहः यथा निर्भयेन सावधानेन शत्रुम् आक्रमते । वृकः यथा अपाये पलायते तथा वर्तेत । शशः यथा उल्लङ्घ्य उल्लङ्घ्य अनिष्टं निवार्य इष्टं प्राप्नोति तथा इष्टम् अनिष्टनिवारणेन प्राप्तव्यम्) ।

१४. कोषवता नृपेण कोषः सदा धर्माचरणाय, तथा अर्थसञ्चयाय, सेवारतानां पालनाय, आपन्निवारणाय संरक्षयेत ।

१५. यः एकम् अश्वत्थम्, एकं पिचुमन्दं (निम्बवृक्षम्), एकं न्यग्रोधं, तिन्त्रिणीः दश च, कपित्थ-बिल्व-आमलक-त्रयं, नव आम्रं च आरोपयति सः नरकं न पश्येत् ।

## शब्दार्थः - टिप्पणी

**कौतुकम्** : उत्सुकता-ಕುತೂಹಲ-curiosity

**कोषवान्** : वित्तकोशवान्-ವಿತ್ತಕೋಶವಿರುವವನು -one who possesses treasury

**जितेन्द्रियः** : इन्दियनिग्रही-ಇಂದ್ರಿಯಗಳನ್ನು ಗೆದ್ದವನು-one who has bridled his senses-जितानि इन्द्रियाणि येन सः

**विषयः** : शब्दः, रूपं, रसः, गन्धः, स्पर्शः - ವಿಷಯ-object of the sense organs.

**आमिषः** : अत्याशा-ದುರಾಸೆ-greed

**निरुन्ध्यात्** : दमयेत्-ನಿಯಂತ್ರಿಸಬೇಕು-should restrain

**सूनृता** : सत्या तथा प्रिया वाक्-ಸತ್ಯವೂ ಮತ್ತು ಪ್ರಿಯವಾದ ಮಾತು-pleasant truthful speech

**वन्द्यचरणाः** : सत्कारयोग्याः-ಸತ್ಕಾರಕ್ಕೆ ಯೋಗ್ಯರು -worthly of respect.

**कृपणः** : लोभी-ಜಿಪುಣ-miser

## अभ्यासः

### I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।

1. के धनमिच्छन्ति ?
2. कृतं कर्म कम् अनुगच्छति ?
3. कामधेनुगुणा का ?
4. सत्क्रिया किं रक्ष्यते ?
5. अर्थान् कथं चिन्तयेत् ?

## II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।

1. सत्पुरुषव्रतम् किम् ?
2. नरविग्रहाः देवाः के ?
3. कोषः किमर्थं संरक्ष्यः ?

## III पाठनाम उल्लिख्य अधोनिर्दिष्टसङ्ख्याकानां श्लोकानाम् अनुवादं कन्नड - आङ्ग्लभाषया वा कुरुत - ३, ४, ६, ९, १०

## IV मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।

1. सिंहवच्च ..............।
2. नवाम्रवापी............. न पश्येत् ।
3. विद्या..............रक्ष्यते।

| नरकम्, पराक्रमेत्, योगेन |
|---|

## V संयोजयत ।

| क | ख |
|---|---|
| पुष्पितः | गुप्तधनम् |
| श्रुत्वा | वृक्षः |
| विषयः | ज्ञानमवाप्नोति |
| विद्या | प्रेरयतीन्द्रियम् |

## — योग्यताविस्तारः —

चाणक्यः चन्द्रगुप्तस्य आचार्यः आसीत् । सः 'अर्थशास्त्रम्' इत्यद्भुतग्रन्थं रचितवान् । अद्यापि चाणक्यनाम्नि प्रसिद्धः नीतिश्लोकानाम् अनेके सङ्कलितग्रन्थाः उपलभ्यन्ते । ते वृद्धचाणक्यम्, चाणक्यनीतिसारः, लघु चाणक्यं, चाणक्यस्य नीतिदर्पणम्, राजनीतिदर्पणम्, इत्यादि प्रमुखाः । चणकस्य अपत्यम् अतः चाणक्य इति प्रसिद्धः । कौटिल्यः इति कुटिलगोत्रोत्पन्नात् विष्णुगुप्तः इत्यपि नामान्तराणि सन्ति । चाणक्यनीतिग्रन्थे सप्तदशाध्यायाः शतत्रयाधिकश्लोकाः सन्ति ।

कौटिल्यार्थशास्त्राधारेण निर्मितः कामन्दकीयनीतिसारः । महाभारतस्य शान्तिपर्वणि (१२३, ११) कामन्दकस्य उल्लेखः वर्तते । कामन्दकीयनीतिशास्त्रे विंशतिसर्गाः, षट्त्रिंशत् प्रकरणानि सन्ति ।

श्रीचण्डेश्वरः राजनीतिरत्नाकरस्य कर्ता । मिथिलाराजस्य भवेश्वरस्य आदेशेन राजनीतिरत्नाकरः विरचितः । एतेन राजाहरिसिंहदेवस्य शासनावधौ चण्डेश्वरः महासन्धिविग्राहिकः आसीत् । सः प्राड्-विवाक (न्यायाधीश) पदमपि अलञ्चकार । अस्य जीवितावधिः त्रयोदशशतकस्य अन्तिमभागः चतुर्दशशतकस्य आदिभागः, इति ज्ञायते । अस्मिन् राजनीतिरत्नाकरे षोडशतरङ्गाः विद्यन्ते ।

### अनुशंसितग्रन्थाः


1. ಚಾಣಕ್ಯ ನೀತಿ ಶ್ಲೋಕಗಳು - ಡಾ. ಬಿ.ಎಸ್. ರಾಮಕೃಷ್ಣರಾವ್-ಲಲಿತಾಪ್ರಕಾಶನ ಹನುಮಂತನಗರ ಬೆಂಗಳೂರು-2001
2. नीतिसारः कामन्दकीयः - त. गणपतिशास्त्रिणः -अनन्तशयनम् - १९१२ ।
3. The Nitisara by Kamandaki- Dr. Sisir Kumar Mitra - The Asiatic society calcutta - 1982 .
4. Rajaniti Ratnakara-Sri Chandesvara-Chowkhamba Sanskrit series, Varanasi.-1970.


* * *

# १०. कृष्णशास्त्रीमहोदयः

(व्यक्तिपरिचयः)

G3X6J7

## पीठिका

वयं कर्णाटकप्रन्तीयाः । अत्रत्या संस्कृतिः अनुसरणयोग्या । भाषा अतिमधुरा । भूमि-भाषा-संस्कृतीनां रक्षणार्थं बि.एम्.श्री, डि.वि.जि., शिवरामकारन्तः, बेन्द्रे, गोकाक्, मास्ति वेङ्कटेश अय्यंगार्यः, कुवेम्पु, ए.आर्.कृष्णशास्त्री इत्यादयो महनीयाः बद्धकङ्कणा भूत्वा स्वजीवनम् एतदर्थमेव समर्पितवन्तः। एषु कृष्णशास्त्रिणां जीवनपरिचयः सङ्क्षिप्ततया प्रदत्तः ।

**संस्कृत-कन्नडसाहित्यक्षेत्रयोः साहित्याकाशे विंशतिशतमाने ध्रुवतारा इव विराजते प्रो।। ए. आर्. कृष्णशास्त्रीमहाभागः । संस्कृत - कन्नडभाषयोः तस्य योगदानं तु अनुपमं विद्यते। सः कन्नडभाषायां 'वचनभारतम्', 'कथामृतम्' इत्यादि कृतिभिः सुपरिचितः । अस्य जीवनचरितं विदित्वा, वयमपि तत्पथमनुगन्तुं प्रेरणां स्वीकुर्मः ।**

**बाल्यम् -**

**पारम्परिकसंस्कृताध्ययनशीले सत्सम्प्रदायबद्धे कुले श्री अम्बले रामकृष्णशास्त्री - श्रीमति शङ्करम्मा दम्पत्योः ज्येष्ठपुत्रत्वेन नवत्युत्तर अष्टादशशततमे वर्षे, आगस्ट् मासे, द्वादशे दिने (क्रि.श. १२.८.१८९०) जातः । श्री कृष्णशास्त्रिणः संस्कृताभ्यासः बाल्यादेव तत्पितुः सकाशे एव आरभत। सः बाल्ये पित्रा सह पाठशालां गच्छति स्म । संस्कृतश्लोकाः, अमरकोषः, पाणिनेः व्याकरणसूत्राणि निरर्गलतया तस्य मुखान्निस्सरन्ति स्म । सः मैसूरुनगरे रायल् स्कूल्, वेस्लियन् मिषन् हैस्कूल्, महाराजकालेज् विद्यालयेषु च अध्ययनम् अकरोत् । महाराजमहाविद्यालये प्रो। एम्. हिरियण्णः, प्रो। बि.एम्.श्री, कानकानहळ्ळि वरदाचार्यप्रभृतीनां प्रकाण्डपण्डितानां शिष्यत्वमलभत। शास्त्रिणां जीवने एषां विदुषां ज्ञानदाहः, कर्तव्यपरता, श्रद्धा, चिन्तनपद्धतिः च आदर्शप्रायाः अभवन् ।**

**संस्कृतभाषाप्रेम -**

**संस्कृतभाषायां विद्यमानं तस्य प्रेम एवमभिव्यक्तम् -''संस्कृतं, तत्र प्रतिपादितानि शास्त्राणि च अस्माकं पूर्वजेभ्यः अस्मत्कृते दत्ता सम्पदस्ति । अस्माभिः कदापि एतत् न नश्येत् । इदानीं सर्वत्र सर्वार्थं पाश्चात्यदेशेभ्यः नः भिक्षाटना आरब्धा । यदि वयं संस्कृतार्थमपि तत्र गच्छामश्चेत् देशस्य**

अधःपतनं सुनिश्चितम् । संस्कृताध्ययनं न्यूनं भवति चेत् शिशोः मातृस्तन्यात् दूरनयनमिव । भाषासाहित्यविद्यार्थिभिः बहुभाषाप्रवेशः अत्यवश्यः । तत्रापि संस्कृतभाषा अध्येतव्या एव । अत्र अधिकाध्ययनं प्रशस्यते'' इति तस्य स्पष्टोक्तिः ।

सः स्वगुरून् अनुसृत्य आदर्शाध्यापकोऽभवत् । 'सः सर्वदा पाठस्य सिद्धतां सम्यक् कृत्वैव कक्ष्यां प्रविशति स्म । तस्य बोधनाक्रमः विद्यार्थिनः आकर्षति स्म' इति डि.वि.जि. महोदयः तं प्रशंसति ।

शिष्यवात्सल्यम् -

तच्छिष्यवात्सल्यमपि अनुपमम् आसीत् । तस्य शिष्येषु एकतमः डा।। के.एम्. कृष्णराव् महोदयः कुत्रचित् घटनामिमां वर्णयति - ''तस्य सहपाठी एकः आर्थिकतया क्लिष्टं परिस्थितिम् अनुभवति स्म । परीक्षार्थं धनं पूरयितुम् असाध्यमिति परीक्षागमनमेव मास्तु इति निश्चित्य सः कालेज् आगमनमेव स्थगितवान् । पञ्चषानि दिनान्यवलोक्य कृष्णशास्त्री महोदयः तद्विद्यार्थिनः आर्थिकसमस्यां विदित्वा, 'सः यत्र कुत्रापि भवतु, कालेज् आनेतव्य एव' इति कृष्णराव् महोदयं समादिष्टवान् । आगते च तस्मिन् परीक्षार्थं कियद्धनं पूरयितव्यमिति विचार्य तदर्थं स्वस्यैव 'चेक्' दत्वा परीक्षां स्वीकर्तुं साहाय्यम् अकरोत् । 'ऋणरूपेण स्वीकरोतु, धनं सम्पाद्य तदनन्तरं प्रतिददातु' इति समाश्वास्य तत्सङ्कोचं दूरमकरोत् । 'परीक्षार्थम् इतोऽपि समयावकाशः विद्यते, सम्यक् अध्ययनं कर्तव्यम्' इति वक्तुं न व्यस्मरत् सः'' ।

राष्ट्रकविः कुवेम्पुमहोदयोऽपि एषां शिष्य आसीत् । सः यदा बेङ्गलूरु नगरात् मैसूरुनगरं गच्छति स्म, तदा कुवेम्पुमहोदयेन सह निरपवादतया मिलति स्म । 'यदा मैसूरु नगरं गच्छति तदा स्वशिष्यः कुवेम्पुः न दृष्टश्चेत् देवतादर्शनं विना देवालयात् प्रत्यागमनमिव' इति तस्य भावना आसीत् ।

कुवेम्पुमहाशयस्य प्रतिभां प्रथमे वयस्येव प्रत्यभिज्ञाय तं 'वरकविः' इति सम्बोधितवान्। आनन्दवर्धनस्य 'ध्वन्यालोकं' कन्नडभाषया अनूदितुं महदौत्सुक्यमासीत् एतेषु । कृतेरस्याः अनुवादकार्यं स्वशिष्येण डा।। के. कृष्णमूर्तिमहाभागेन स्वीकृतमिति विदित्वा, ससन्तोषं तमेव प्रोत्साहितवान्, प्रास्ताविकवचनानि अलिखच्च ।

### संस्कृतकन्नडभाषाकृते योगदानम् -

तस्य साहित्यसेवा अपि अन्यादृशी । कर्णाटकसङ्घं स्थापयित्वा तद्द्वारा साहित्यसेवा अनुवर्तिता सहृदयैः सह । 'प्रबुद्धकर्णाटकः' इति पत्रिका आरब्धा । आङ्ग्ल-कन्नडनिघण्टु रचनासमितेः सदस्योऽभवत् । कन्नडसाहित्यपरिषदः पत्रिकायाः सम्पादकत्वम् ऊढमनेन । अस्य स्वतन्त्राः कृतयस्तु 'श्रीरामकृष्णपरमहंसचरितम्', 'भासकविः' (कविकाव्यविमर्शः), 'संस्कृतनाटकम्', 'सर्वज्ञकविः', 'श्रीपतिकथाः', 'बङ्किमचन्द्रः', 'भाषणानि लेखनानि', 'कवनं' च, अप्रकटिता कृतिः 'रामप्प', इति। एषु पुस्तकेषु स्वतन्त्रचिन्तने विशेषतया दत्तमवधानमिति गमनार्होऽयं विषयः । एषु 'बङ्किमचन्द्रः' इति कृतिः केन्द्रसाहित्य-अकादमी पुरस्कृता भूत्वा कन्नडभाषायाः गौरवमवर्धयत ।

### विद्यार्थिनां कृते सन्देशः -

''मित्राणि, वयं न सात्त्विकाः स्मः, तामसप्रवृत्तयः ; क्षमाशीलाः शूराः न; भीरवः कातराश्च स्मः। राजकीयं युद्धमस्माकमनवश्यकम् । जीवनम् इति युद्धे नः तेजः धैर्यस्थैर्यं स्वाभिमानं च अत्यवश्यकम् । उत्तिष्ठत! जाग्रत ! प्राप्य वरान्निबोधत ! वीररसयुताः कथाः पठत। हृदयम् उत्साहेन पूरयत । धर्मबुद्धिं सञ्चारयत । स्वदेश-स्वजनाभिमानयुताः भवत । यूयं विद्यार्थिनः । विद्यार्थिनां विद्यार्जनमेव तपः । आलस्यं त्यजत । युष्माकं देशस्य इतिहासं पठत, तद्वित्त । नः राष्ट्रस्य च समुन्नतिः कथं भवेदिति चिन्तयत । प्रीतिर्भवतु । संहतिर्भवतु । मङ्गलं भवतु ।''

सन्देश एषः प्रत्येकस्यापि नरस्य जीवनं प्रचोदयतु इत्याशास्महे ।

## शब्दार्थः - टिप्पणी

**संहतिः** : एकीभवनम्-ಒಗ್ಗಟ್ಟು-unity

**निरपवादः** : अनिवार्यतया-ತಪ್ಪದೆ-without fail

**वित्त** : अवगच्छत-ತಿಳಿಯಿರಿ-know (लोट्लकारः मध्यमपुरुषः बहुवचनम्)

## अभ्यासः

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. कृष्णशास्त्रिणां माता का ?
2. कृष्णशास्त्रिणाम् अध्यापकेषु एकस्य नाम लिखत ।
3. कृष्णशास्त्रीमहोदयेन आरब्धा पत्रिका का ?
4. ध्वन्यालोकः कन्नडभाषायां केन अनूदितः ?
5. केन्द्रसाहित्य - अकादमी प्रशस्तिद्वारा पुरस्कृता कृतिः का ?

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. बाल्ये शास्त्रिणां संस्कृताध्ययनम् ।
2. शास्त्रिणाम् औदार्यम् ।
3. शास्त्रिणाम् पाठनक्रमः ।
4. संस्कृताध्ययनविषये शास्त्रिणाम् अभिप्रायः ।
5. कृष्णशास्त्रिणां कन्नड-साहित्यसेवा ।

**III पाठनाम उल्लिख्य कः कं प्रति अवदत् इति संस्कृतभाषया लिखत ।**

1. परीक्षार्थम् इतोऽपि समयावकाशः विद्यते ।
2. सः यत्रकुत्रापि भवतु कालेज् आनेतव्य एव ।

**IV दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. शास्त्रिणाम् शिष्यवात्सल्यम् ।
2. विद्यार्थिनां कृते कृष्णशास्त्रिणां सन्देशः ।

**V रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. भाषासाहित्यविद्यार्थिभिः <u>संस्कृतभाषा</u> अध्येतव्या एव ।
2. <u>विमर्शकेन</u> कृतीनामध्ययनं सम्यक् कर्तव्यम् ।



ಪ್ರೊ. ಎ. ಆರ್. ಕೃಷ್ಣಶಾಸ್ತ್ರೀ

1. **ಎ. ಆರ್. ಕೃಷ್ಣಶಾಸ್ತ್ರೀ** ಅವರ ಬೋಧನೆಯನ್ನು ಅವರ ಶಿಷ್ಯರಾದ ಡಾ ॥ ಕೆ. ಎಂ. ಕೃಷ್ಣರಾವ್ ಅವರು ಹೀಗೆ ಸ್ಮರಿಸುತ್ತಾರೆ – 'ಎ.ಆರ್.ಕೃ. ಅವರು ಬೋಧಿಸುತ್ತಿದ್ದ ಎಂ. ಎ. ತರಗತಿಯಲ್ಲಿ ಇಬ್ಬರೇ ವಿದ್ಯಾರ್ಥಿಗಳಿದ್ದರೂ ಬಹಳ ಆಸಕ್ತಿಯಿಂದ, ಸಮಯದ ಪರಿವೆಯೇ ಇಲ್ಲದೆ, ಪಂಪಭಾರತದ ಸೊಗಸನ್ನೂ, ಯಕ್ಷಗಾನಗಳ ಸ್ವಾರಸ್ಯವನ್ನೂ, ಭಾಷಾಚರಿತ್ರೆಯ ವಿಕಾಸವನ್ನೂ ಕಾವ್ಯಮೀಮಾಂಸೆಯ ರಸದೌತಣವನ್ನೂ ಉಣಿಸುತ್ತಿದ್ದರು.'



Prof. M. Hiriyanna

2. **Prof. M. Hiriyanna (1871-1950)** is recognized in learned circles both in India and abroad as an outstanding authority on traditional Indian philosophy. Deeply versed in Sanskrit classics and equally proficient in English literature, Hiriyanna worked with single-minded devotion to the cause of Indian philosophy and literary studies. Though Hiriyanna did not claim anything like a philosophy of his own, he had a distinctive perception of both the general spirit and the specific concepts and doctrines of Indian philosophy. His prominent works include Indian Conception of Values, Outlines of Indian Philosophy, Quest after Perfection and Art Experience. His books are held in hundreds of libraries, even outside India.

**Works:**

1. Outlines of Indian Philosophy
2. The Essentials of Indian Philosophy
3. The Quest After Perfection
4. Indian philosophical studies
5. Popular essays in Indian philosophy
6. The mission of philosophy
7. The Twofold way of life
8. The Ethics of the Upanichads
9. Indian aesthetics
10. The Main aspects of Indian aesthetics
11. Indian conception of values
12. Reviews
13. Art Experience
14. Sanskrit Studies
15. Tales From Sanskrit Dramatists

Great scholars like Dr. S. Radhakrishnan, Ex-President of India, Prof. A.R. Krishnashastry etc., had the previlage of being his disciples.

**अनुशंसितग्रन्थाः**


1. **ಭಾಷಣಗಳು ಮತ್ತು ಲೇಖನಗಳು** – ಎ. ಆರ್. ಕೃಷ್ಣಶಾಸ್ತ್ರೀ– ಹೇಮಂತ ಸಾಹಿತ್ಯ, ಬೆಂಗಳೂರು – ತೃತೀಯ ಮುದ್ರಣ 2012
2. ಎ. ಆರ್. ಕೃಷ್ಣಶಾಸ್ತ್ರಿಗಳ ಬದುಕು ಮತ್ತು ಬರಹ – ಶ್ರೀಮತಿ ರುಕ್ಮಿಣಿರಘುರಾಮ್ – ಲೋಕಶಿಕ್ಷಣ ಟ್ರಸ್ಟ್ – ಹುಬ್ಬಳ್ಳಿ –2009
3. ಎ. ಆರ್. ಕೃಷ್ಣಶಾಸ್ತ್ರೀ ಅವರ ಬೆಲೆ ಬಾಳುವ ಬರಹಗಳು – ಸಂಪಾದಕರು ಎಲ್.ಎಸ್. ಶೇಷಗಿರಿ ರಾವ್ – ವಸಂತ ಪ್ರಕಾಶನ, ಬೆಂಗಳೂರು – 2013
4. ಎ. ಆರ್. ಕೃಷ್ಣಶಾಸ್ತ್ರೀ – ಬಿ.ವಿ. ಶ್ರೀಧರ – ನವಕರ್ನಾಟಕ ಪ್ರಕಾಶನ – ದ್ವಿತೀಯ ಮುದ್ರಣ 2009


* * *

# व्याकरणविभागः

# १. सन्धिप्रकरणम्

K7F9V7

वर्णात् वर्णे परे विकारकारणीभूतः संयोगः सन्धिः । सन्धौ प्रामुख्येन त्रयः भेदाः सन्ति । स्वरसन्धिः, व्यञ्जनसन्धिः, विसर्गसन्धिः च इति । तत्र स्वरसन्धयः, व्यञ्जनसन्धयः प्रथमवर्षस्य पाठ्यपुस्तके एव निरूपिताः । अधुना विसर्गसन्धिपरिचयः दीयते ।

## विसर्गसन्धिः

विसर्गात् परतः स्वरे व्यञ्जने वा परे विसर्गः रूपान्तरं भजते । तदा विसर्गसन्धिः भवति । सः षट् प्रकारकः । यथा -

**१. विसर्गस्य सकारः** - विसर्गात् तकारे, थकारे, सकारे परे विसर्गस्य सकारः आदेशः भवति ।

**उदा-** सूर्यः + तपति = सूर्यस्तपति
ततः + थूर्वाणः = ततस्थूर्वाणः
मुनिः + सः = मुनिस्सः

**२. विसर्गस्थाने रेफः** - अकार - आकारौ विहाय विसर्गात् पूर्वम् अन्यस्वराः भवन्ति चेत् स्वरे मृदुव्यञ्जने वा परे विसर्गस्य रेफः (र कारः) भवति ।

**उदा-** शम्भुः + आगतः = शम्भुरागतः ।
मुनिः + इति = मुनिरिति ।
हरिः + अत्र = हरिरत्र ।
धनुः + आचार्यः = धनुराचार्यः ।

**३. विसर्गस्य लोपः** - ह्रस्व अकारात् परस्य विसर्गस्य, ह्रस्व अकारं विना इतरे स्वरवर्णे परे विसर्गस्य लोपः भवति ।

**उदा -** देवः + उवाच = देव उवाच ।
रामः + आगतः = राम आगतः ।
बालः + एव = बाल एव ।

आकारात् परस्य विद्यमानस्य विसर्गस्य स्वरे मृदुव्यञ्जने वा परे, विसर्गस्य लोपः भवति।

**उदा -** नृपाः + गच्छन्ति = नृपा गच्छन्ति ।

मृगाः + धावन्ति = मृगा धावन्ति ।

बालिकाः + अधुना = बालिका अधुना ।

**अयं विशेषः**

तत्, एतत् शब्दयोः प्रथमाविभक्तेः विसर्गस्य लोपः भवति व्यञ्जने परे ।

**एतत्तदोः सुलोपो ऽ कोरनञ् समासे हलि** (पा.सू. ६-१-१३२)

**उदा -** एषः + गतः = एष गतः

सः + दृष्टः = स दृष्टः ।

**४. रेफस्य उकारः -**

ह्रस्व अकारात् परस्य विद्यमानस्य विसर्गस्य ह्रस्व अकारे मृदुव्यञ्जने वा परे ओकारः आदेशः भवति । **अतो रोरप्लुतादप्लुते** (पा.सू. ६-१-११३) । हशि च । (पा.सू. ६-१-११४)

i) ह्रस्व अकारे परे-

**उदा** देवः + अस्ति → देव**स्** + अस्ति → देव**र्** + अस्ति → देव + **उ** + अस्ति

दे**वो** अस्ति → देवोऽस्ति ।

कः + अपि = को अपि = कोऽपि । अत्र पूर्वरूप सन्धिः ।

ii) मृदुव्यञ्जने परे -

गजः + याति = गजो याति ।

देवः + वन्द्यः = देवो वन्द्यः ।

**विशेषसूचना**

i) ह्रस्व अकारात् परस्य विसर्गस्य, 'अ' कारे परे विसर्गस्य सकारः भवति ।

५) निखिलेऽस्मिन् भारतदेशे को न जानाति अत्रत्यस्य द्वितीयप्रधानमन्त्रिपदम् अलङ्कुर्वाणस्य श्रीमतः लालबहादूरशास्त्रिणः नाम । अस्य महानुभावस्य जन्म १९०४ तमे वर्षे अक्टोबरमासस्य द्वितीये दिनाङ्के वाराणसी समीपस्थे मोगलसराई नामक स्थाने समभूत् । एतस्य विद्याध्ययनं वाराणस्यां हरिश्चन्द्रविद्यालये काशीविद्यापीठे च सम्पन्नम् । काशीविद्यापीठतः असौ शास्त्री पदवीं प्राप्तवान् । अत एव अयं शास्त्रीति नाम्ना प्रसिद्धः ।

६) दीपावलीमहोत्सवः दिनत्रयं यावत् आचर्यते अत्र चतुर्दश दुष्टशक्तेः नाशं सूचयति । अमावास्यायां लक्ष्मी पूजा प्रचलति । प्रतिपदि दिने वामनरूपिणा विष्णुना प्राप्तानुग्रहः बलिः पूज्यते, अस्मिन् अवसरे सर्वेषां जीवने अन्धकारः नश्यतु प्रकाशं प्रसारयतु इत्याशया सर्वत्र दीपानाम् मालाः विराजन्ते ।

७) आधुनिकमानवः प्रपञ्चे किं प्रवर्तते इति ज्ञातुम् इच्छति । ग्रामे, नगरे, देशे, विदेशेऽपि प्रतिदिनं, प्रतिक्षणं प्रवर्तमानानि घटनानि ज्ञातुं समूहमाध्यमः अत्यवश्यकः । समूहमाध्यमेषु बहवः जनाः अहोरात्रं कार्यं कुर्वन्ति । एषु आकाशवाणी, दूरदर्शनं, साक्ष्यचित्राणि, पुस्तकानि, वार्तापत्रिकाः, दूरवाणी, सङ्गणकयन्त्रम् इत्यादयः प्रमुखाः । समूहमाध्यमः राष्ट्रियैकतां संरक्षति ।

८) सङ्गणकस्य निर्देशनं प्रदातुं का भाषा नितराम् उपयुक्ता इति अन्वेष्टुं बहवः प्रयोगाः कृताः । विश्वस्य सकलाः भाषाः तत् प्रयोगे परीक्षिताः। विश्वभाषासु संस्कृतमेव अधिकं वैज्ञानिकं वर्तते । अतः सङ्गणकस्य कृते संस्कृतम् एव श्रेष्ठभाषा भवितुम् अर्हतीति अद्य प्रयोगैः प्रमाणितम् ।

९) रात्रिर्गता । प्रभातं रमणीयं दृश्यं दृष्टिगोचरं कारयति । नक्तं प्रकाशमानाः ताराः सूर्यस्योदये मन्दप्रकाशाः सञ्जाताः तिरोहिताश्च । सर्वत्र प्रकाशः प्रसरति । अन्धकारः नष्टः । पक्षिणां मधुरं कूजनं सर्वासु दिक्षु व्याप्तम् । प्रातःकाले शुद्धो वायुः वाति । सर्वेषाम् उत्साहं वर्धयति ।

## संस्कृतभाषया अनुवदत -

1. ಗೋಪಾಲಕೃಷ್ಣಗೋಖಲೆಯವರು ಅಪ್ರತಿಮ ದೇಶಭಕ್ತರಾಗಿದ್ದರು. ಭಾರತದ ಸ್ವಾತಂತ್ರ್ಯ ಸಂಗ್ರಾಮದಲ್ಲಿ ಅವರು ಪ್ರಮುಖ ಪಾತ್ರ ವಹಿಸಿದ್ದರು. ಅವರು ಉತ್ತಮ ವಾಗ್ಮಿಗಳೂ ಆಗಿದ್ದರು. ಜನರು ಅವರ ಮಾತಿನಿಂದ ದೇಶಭಕ್ತಿಯ ಪ್ರೇರಣೆಯನ್ನು ಪಡೆದು ಸ್ವಾತಂತ್ರ್ಯ ಚಳುವಳಿಯಲ್ಲಿ ಭಾಗವಹಿಸಿದರು. ಅವರು ತಮ್ಮ ಸರಳ ಹಾಗೂ ನಿಸ್ವಾರ್ಥ ಜೀವನದಿಂದ ಎಲ್ಲರಿಗೂ ಆದರ್ಶಪ್ರಾಯರಾಗಿರುವರು.

Gopala Krishna Gokhale was a great patriot. He lead the freedom movement prominently. He was a very good orator too. The people joined the freedom movement, having listened to his inspiring patrotic speech. His simple and self less life is a role model to all.

2. ಒಮ್ಮೆ ರಾಜರ್ಷಿಯಾದ ಜನಕಮಹಾರಾಜನ ಬಳಿ ಋಷಿಗಳು ಬಂದು ಪ್ರಶ್ನಿಸಿದರು – 'ಹೇ ರಾಜನ್, ಪ್ರಜಾಪಾಲನೆ ಹಾಗೂ ಯೋಗಸಾಧನೆಗಳನ್ನು ಏಕಕಾಲದಲ್ಲಿ ಹೇಗೆ ಮಾಡುತ್ತೀಯೆ?' ಎಂದು. ಆಗ ಜನಕನು 'ಎಲೈ ಋಷಿವರ್ಯರೇ, ನೀವು ಸ್ವತಃ ತಿಳಿದಿದ್ದರೂ, ನನ್ನನ್ನು ಪರೀಕ್ಷಿಸಲು ಪ್ರಶ್ನಿಸುತ್ತಿರುವಿರಿ. ಎಂದು ಭಾವಿಸುತ್ತೇನೆ. ಈ ಪ್ರಪಂಚದಲ್ಲಿ ಎಲ್ಲವೂ ಪರಮೇಶ್ವರನ ಅನುಗ್ರಹದಿಂದ ನಡೆಯುತ್ತದೆ. ನನ್ನದು ಏನೂ ಇಲ್ಲ ಎಂಬ ಭಾವನೆಯಿಂದ ಕರ್ತವ್ಯವನ್ನು ನಿರ್ವಹಿಸುತ್ತೇನೆ. ಹಾಗಾಗಿ ಇದು ಸಾಧ್ಯ' ಎಂದು ಉತ್ತರಿಸಿದನು.

Once the sages went to the king Janaka and asked him - 'Oh king, how can you perform both protection of the subjects and accomplishing Yoga simultaneously?' The king replied- 'Oh great sages, I think, you are questioning me, though you yourselves know it. Every thing happens in this world by the grace of Almighty. I discharge my duties with the feeling that nothing is mine. So this is possible.'

3. ತಾರಕಾಸುರನನ್ನು ಸಂಹರಿಸಿದ ಕಾರ್ತಿಕೇಯನು ಶಿವನ ಕಿರಿಯ ಮಗ. ವಿಘ್ನನಿವಾರಕನಾದ ಗಣೇಶನು ಹಿರಿಯ ಮಗ. ಸಂಪತ್ತಿಗೆ ಅಧಿಪತಿಯಾದ ಕುಬೇರನು ಪರಮಮಿತ್ರ. ಜಗನ್ಮಾತೆಯಾದ ಪಾರ್ವತಿಯು ಮಡದಿ. ಮಾವನು ಪರ್ವತರಾಜ. ಅವನ ವಾಹನವು ನಂದಿ. ಅವನ ಸೇನಾಪ್ರಮುಖನು ವೀರಭದ್ರ. ಇಂತಹ ಕುಟುಂಬವನ್ನು ಹೊಂದಿದ್ದರೂ ಪರಶಿವನು ಭಿಕ್ಷಾಟನೆಯನ್ನು ಮಾಡುತ್ತಾನೆ. ಎಂತಹ ವಿಧಿವಿಪರ್ಯಾಸ !

Kartikeya, the destroyer of demon Taraka, is the younger son of Lord Shiva. Ganesha, the remover of obstacles is His elder son. Kubera, the lord of wealth is His friend. Parvathi, the mother of Universe is His wife. Parvatharaja, the king of mountains is His father- in -law. Nandi is His vehicle. Virabhadra is His chief of army. In spite of all this Lord Shiva begs. What a destiny!

4. ಒಮ್ಮೆ ವಿಶ್ವಾಮಿತ್ರ ಮಹರ್ಷಿಗಳು ದಶರಥ ಮಹಾರಾಜನ ಆಸ್ಥಾನಕ್ಕೆ ಬಂದರು. ಯಜ್ಞರಕ್ಷಣೆಗಾಗಿ ಬಾಲಕರಾದ ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ತಮ್ಮ ಜೊತೆ ಕಳುಹಿಸುವಂತೆ ಕೇಳಿಕೊಂಡರು. ಪುತ್ರವಾತ್ಸಲ್ಯದಿಂದ ದಶರಥನು ದುಃಖಿತನಾದನು. ಕುಲಪುರೋಹಿತರಾದ ವಸಿಷ್ಠರು ವಿಶ್ವಾಮಿತ್ರರ ಬೇಡಿಕೆಯನ್ನು ಪೂರೈಸುವಂತೆ ದಶರಥನಿಗೆ ನುಡಿದರು. ಲೋಕಕಲ್ಯಾಣಕ್ಕಾಗಿ ದಶರಥನು ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ಕಳುಹಿಸಿದನು.

Once the sage Vishwamitra came to the court of the king Dasharatha. He requested to send the boys Rama and Lakshmana to protect his sacrifice. Dasharatha felt sad due to affection towards his children. Vasishtha, the preceptor of the family, advised Dasharatha to fulfil Vishwamitra's request. Dasharatha sent Rama and Lakshmana for the welfare of the world.

5. ವಾರಾಣಸಿಯು ಗಂಗಾನದಿಯ ದಡದಲ್ಲಿದೆ. ಅದು ದೇವಾಲಯ, ರೇಷ್ಮೆ ವಸ್ತ್ರ ಮತ್ತು ಘಟ್ಟಗಳಿಗಾಗಿ (ಘಾಟ್) ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇದು ಭಾರತದ ಪ್ರಾಚೀನನಗರಗಳಲ್ಲೊಂದು. ಇದು ಭಾರತದ ಪ್ರಸಿದ್ಧಯಾತ್ರಾಸ್ಥಳ. ದೇಶದ

ಎಲ್ಲಭಾಗಗಳಿಂದ ಜನರು ಇಲ್ಲಿಗೆ ಬರುವರು.  ಅವರು ಗಂಗಾನದಿಯಲ್ಲಿ ಸ್ನಾನ ಮಾಡಿ ವಿಶ್ವನಾಥನ ದರ್ಶನವನ್ನು ಪಡೆದು ತಮ್ಮ ಜನ್ಮ ಸಾರ್ಥಕವಾಯಿತೆಂದು ಭಾವಿಸುವರು.

Banares is on the banks of the river Ganga. It is famous for its temple, silk and ghats. It is one of the most ancient cities. It is a famous pilgrim centre in India. People from all parts of the contry visit ths place. They take bath in the river Ganaga, having visited the Viswanatha temple. They feel that their life is fulfilled.

6. ಮಗುವಿನ ಮನವು ಹಸಿಯ ಮಣ್ಣಿನ ಮುದ್ದೆ ಇದ್ದಂತೆ. ಕುಂಬಾರನು ತನ್ನ ಕೈಚಳಕದಿಂದ ಮಣ್ಣಿನ ಮುದ್ದೆಗೆ ಒಂದು ರೂಪವನ್ನು ಕೊಡುವನು. ಅಂತೆಯೇ ಗುರುವು ತನ್ನ ಶಿಷ್ಯನ ಭವಿಷ್ಯ ಜೀವನವನ್ನು ನಿರ್ಮಿಸುವನು. ಶಿಷ್ಯನ ಮನದಲ್ಲಿ – 'ನಾನು ಉತ್ತಮನು. ಸಮಯ ಬಂದಾಗ ನನ್ನೆಲ್ಲ ಶಕ್ತಿಯನ್ನೂ  ಒಗ್ಗೂಡಿಸಿ ದೇಶಕ್ಕಾಗಿ ವಿನಿಯೋಗಿಸುವೆನು' ಎಂಬ ಭಾವನೆಯನ್ನು ತುಂಬುತ್ತಾನೆ.

The mind of a child is like a wet clay mound. The potter gives clay mound a correct shape by his skill. In the same way a teacher constructs the future of a student. And fills his mind with the feeling that - 'I am great. At times necessary I will collect and utilise all my energy for the nation.

7. ಪ್ರತಿಯೊಂದು ಕಾರ್ಯದ  ಯಶಸ್ಸಿನ ಮೂಲವು ಆತ್ಮವಿಶ್ವಾಸವಾಗಿರುವುದು.  ಅದು ಮಾನವನಿಗೆ ಅವನ ಗುರಿಯನ್ನು ತೋರಿ, ಅದನ್ನು ಸಾಧಿಸಲು ದಾರಿಮಾಡಿಕೊಡುತ್ತದೆ. ಅದು ನಮ್ಮೊಳಗೆ ಶಕ್ತಿಯನ್ನು ತುಂಬಿ ಕಷ್ಟವಾದ ಕೆಲಸವೂ ಸಹ ಸಾಧ್ಯವಾಗುವಂತೆ ಮಾಡುತ್ತದೆ. ಪ್ರತಿಯೊಬ್ಬ ಮಾನವನ ಆಪ್ತಮಿತ್ರ ಆತ್ಮವಿಶ್ವಾಸ. ಮಾನವನು ಗಳಿಸಬೇಕಾದ ಸಂಪತ್ತು ಇದೇ ಆಗಿದೆ.  ದಿನದಿಂದ ದಿನಕ್ಕೆ ಇದನ್ನು ಹೆಚ್ಚಿಸಿಕೊಳ್ಳುವುದು ಎಲ್ಲರ ಕರ್ತವ್ಯವಾಗಿದೆ.

Self confidence is the success behind all the works. It shows the aim and paves the way to attain it. It makes a stream of energy to flow within us which makes possible even the difficult mission. which seems impossible. It is the best friend of each and every human being. This is the real wealth to be acquired. It is the duty of all of us to increase this day by day.

* * *

# १०. अर्थग्रहणम् (उदाहरणार्थमेव)

L4K2C1

१. पातालस्य राजा बलिः महान् भगवद्भक्तः आसीत् । कदाचित् कृष्णः युधिष्ठिरेण सह तस्य प्रासादम् अगच्छत् । दैत्यानां राजा कृष्णं सत्कृत्य 'अयमपरः महाशयः कः ?' इति अपृच्छत् । तदा भगवान्-'अयं भारतदेशस्य महाचक्रवर्ती युधिष्ठिरः, भूलोके महादाता च । अस्य प्रासादात् न कोऽपि याचकः निराशः गच्छति' इति अवदत् । बलिः इदं श्रुत्वा स्मित्वा-''स्वामिन्, यदा अहं राजा आसं तदा भिक्षुक एव नासीत्'' इति विज्ञापयामास ।

१. बलिः कीदृशः आसीत् ?

२. कृष्णः केन सह प्रासादम् अगच्छत् ?

३. कृष्णं सत्कृत्य बलिः किमपृच्छत् ?

४. कृष्णः यधिष्ठिरं कथं परिचाययति ?

५. बलिः स्मित्वा किं विज्ञापयामास ?

२. आसीत् कश्चित् बालकः । सः एकम् आरामं गत्वा तत्र एकस्मिन् आम्रवृक्षे मनोहरं फलं दृष्ट्वा तत् अपचेतुम् ऐच्छत् । परन्तु तं वृक्षं परितः बहवः कण्टकिनः गुल्माः आसन् । तेभ्यः भीत्वा फलम् अनपचित्य गृहं गतः । तदा अन्यः बालकः तत् फलं दृष्ट्वा परिगतेभ्यः कण्टकिभ्यः गुल्मेभ्यः अभीत्वा वृक्षम् आरुह्य फलमपचित्य भक्षयामास । अतः धैर्यवतो भाग्यम् उपैति ।

१. बालकः आरामं गत्वा कि कर्तुम् ऐच्छत् ?

२. वृक्षं परितः के आसन् ?

३. गुल्मेभ्यः भीतः बालकः किम् अकरोत् ?

४. अन्यः बालकः वृक्षमारुह्य किं चकार ?

५. अस्याः कथायाः नीतिः का ?

* * *

# ११. पत्रलेखनम्

C5J4I8

पत्रव्यवहारम् अत्यवश्यकम् । अस्मिन् शतमाने क्षेमसमाचारं बन्धषु मित्रेषु च निवेदयितुं, व्यवहारे अनेकविषयप्रेषणार्थम्, उद्योगप्राप्त्यर्थं पत्रलेखनम् आवश्यकम् ।

पत्रलेखनसमये एते अंशाः अवश्यम् अनुसरणीयाः ।

१. शिरोलेखनम् । (शीर्षिका)
२. सम्बोधनम् ।
३. विषयः । (अस्य विवरणम्)
४. समाप्तिः ।
५. हस्ताङ्कनम् ।
६. पत्रसङ्केतः ।

स्थलम् :
दिनाङ्कः :

सम्बोधनम्

विषयः

समाप्तिः
हस्ताङ्कनम्

(पृष्ठभागे)

सविधे,
सङ्केतः

सकाशात्
सङ्केतः

## १. पितरं प्रति पुत्रस्य पत्रम् ।

**क्षेमम्** **।। श्री ।।** **स्थलम् : शिरसि**

**दिनाङ्कः : १०.०१.२०१४**

पूज्य पितृचरणारविन्दयोः साष्टाङ्गप्रणामाः । अहमत्र कुशली । तत्र भवन्तः सर्वे कुशलिनः इति भावयामि।

अत्र मम अध्ययनं सम्यक् प्रवर्तते । अस्माकं विद्यालयस्य केचन मम वयस्याः अध्यापकैः सह प्रवासार्थं बेलूरु-हळेबीडु नगरं गमिष्यन्ति । अहम् अपि गन्तुम् इच्छामि, अतः प्रवासार्थं पञ्चशतं रूप्यकाणि प्रेषयन्तु इति प्रार्थये ।

मात्रे नमस्कारान् निवेदयतु ।

**इति भवदीयः पुत्रः**
**विनायकः**
**(हस्ताङ्कनम्)**

**सविधे,**
**श्री विश्वनाथः**
**बेन्द्रे मार्गः**
**कारवार (उ.क)**

**सकाशात्**
**विनायकः एस्.**
**गृहसङ्ख्या, ४०**
**कुवेम्पू मार्गः**
**शिरसिनगरम्**

## २. मित्रं प्रति पत्रम् ।

॥ श्री ॥

स्थलम् : तुमकूरुनगरम्

दिनाङ्कः : ०४.०१.२०१४

प्रियमित्र,

सादरं प्रणामाः ।

अहमत्र कुशली । भवान् अपि कुशली इति भावयामि । मम अध्ययनं सम्यक् प्रवर्तते । अस्माकं विद्यालये संस्कृतोत्सवकार्यक्रमः, तथा भगवद्गीताकण्ठपाठस्पर्धा च आयोजिता वर्तते । अहमपि भागं वहामि। अतः तस्मिन् समये भवता अवश्यम् आगन्तव्यम् ।

अन्यत् सर्वं कुशलम् । अवश्यम् आगच्छति ननु ।

**भवदीयः मित्रम्**
**प्रतापः**
**(हस्ताङ्कनम्)**

**सविधे,**
**विजयः**
**द्वितीय पि.यू.सि 'क' विभागः**
**विद्योदयविद्यालयः**
**शिरसिनगरम् ।**

**सकाशात्**
**प्रतापः**
**द्वितीय पि.यू.सि. 'अ' विभागः**
**सर्कारि प.पू विद्यालयः**
**तुमकूरुनगरम्**

## ३. विरामपत्रम्

**सकाशात्**

भुवना एस्.

द्वितीय पि.यू.सि. 'अ' विभागः,

सर्कारि प.पू. विद्यालयः,

धारवाड नगरम्

**सविधे**

मान्यः प्राचार्यः

सर्वकारीय प.पू. विद्यालयः,

धारवाड नगरम्

**विषय : दिनद्वयस्य विरामपत्रम् ।**

----

माननीय,

अहं द्वितीय पि.यू.सि. 'अ' विभागस्य छात्रा अस्मि । अहं श्वः मातृपितृभ्यां सह बेङ्गलूरुनगरं गमिष्यामि । तत्र मम बन्धोः गृहप्रवेशोत्सवः वर्तते । अतः दिनद्वयं यावत् विरामं यच्छन्तु इति सविनयं प्रार्थये ।

सादरं वन्दनानि ।

**स्थलम् : धारवाडनगरम्**

**दिनाङ्कः : ०८.०१.२०१४**

**इति भवदीया विधेया**

**भुवना एस्.**

**(हस्ताङ्कनम्)**

### ४. पुस्तकप्रकाशकं प्रति पुस्तकप्रेषणाय आवेदनापत्रं लिखत ।

**सकाशात्**
सुहास् हेच्.
१०, तृतीयमुख्यमार्गः, जयनगरम्
मैसूरु

**सविधे**
वेदान्तभारती
बनशङ्करी
बेङ्गलूरु

मान्याः

**विषय : पुस्तकप्रेषणाय आवेदनम् ।**

----

भवत्प्रकाशितस्य 'प्रबन्धसङ्ग्रहः' नामकपुस्तकस्य विषये अहं ज्ञातवान् । तत् पुस्तकं मया अवश्यं क्रेतव्यम् । अतः तत्पुस्तकं वि.पि.पि. द्वारा शीघ्रं प्रेषयतु इति विनयेन प्रार्थये ।

धन्यवादाः ।

**स्थलम् : मैसूरु** — **भवदीयः**
**दिनाङ्कः : १०.०१.२०१४** — **सुहासः**

***

# परिशिष्टभागः

# APPENDIX

# १. सन्धयः

## I. स्वरसन्धयः

१. **सवर्णदीर्घसन्धिः -** 'अकः सवर्णे दीर्घः' (पा.सू. ६-१-१०१) इति पाणिनिसूत्रम् । अक् वर्णानां सवर्णे अचि परे दीर्घः एकादेशः स्यात् ।

| | | | | | |
|---|---|---|---|---|---|
| **उदा -** | हिम | + आलयः | = | हिमालयः | |
| | हरि | + ईशः | = | हरीशः | |
| | आपणेषु | + उपविश्य | = | आपणेषूपविश्य | |
| | पितृ | + ऋणम् | = | पितॄणम् | इत्यादयः । |

२. **गुणसन्धिः -** 'आद्गुणः' (पा.सू. ६-१-८७) इति पाणिनि सूत्रम् ।

अवर्णात् असवर्णे स्वरे परे पूर्वपरयोः गुणः एकादेशः भवति ।

| | | | | |
|---|---|---|---|---|
| **उदा -** | देव | + इन्द्रः | = | देवेन्द्रः |
| | चन्द्र | + उदयः | = | चन्द्रोदयः |
| | महा | + ऋषिः | = | महर्षिः |

३. **वृद्धिसन्धिः -** 'वृद्धिरेचि' (पा.सू. ६-१-८८) इति सूत्रम् ।

अवर्णात् एचि परे वृद्धिः (आ, ए, औ) एकादेशः भवति ।

| | | | | |
|---|---|---|---|---|
| **उदा -** | मम | + एव | = | ममैव |
| | अष्ट | + ऐश्वर्यम् | = | अष्टैश्वर्यम् । |
| | मृग | + ओघः | = | मृगौघः । |
| | धर्म | + औत्सुक्यम् | = | धर्मौत्सुक्यम् । |

४. **यण्सन्धिः -** 'इको यणचि' (पा.सू. ६-१-७७) इति पाणिनि सूत्रम् ।

इकः (इ, उ, ऋ, लृ) स्थाने यण् (य, व, र, ल) स्यात् अचि परे ।

**उदा -**अति + अन्तम् = अत्यन्तम् ।

गुरु + आज्ञा = गुर्वाज्ञा ।

धातृ + अंशः = धात्रंशः ।

५. **अयादिसन्धिः -** 'एचोऽयवायावः' (पा.सू. ६-१-७८) इति सूत्रम् । एच् वर्णानां परतः अचि परे क्रमात् अय्, अव्, आय्, आव् च आदेशाः भवन्ति ।

**उदा -**हरे + ए = हरये ।

विष्णो + ए = विष्णवे ।

नै + अकः = नायकः ।

द्वौ + अपि = द्वावपि ।

६. **पूर्वरूपसन्धिः -** 'एङः पदान्तात् अति' (पा.सू. ६-१-१०९) इति पाणिनिसूत्रम् । पदान्तात् ए, ओ वर्णात् ह्रस्व 'अ' कारे परे पूर्वरूपम् एकादेशः भवति । अवर्णं सूचयितुं अवग्रहचिह्नं (ऽ) प्रयुज्यते

**उदा -**एते + अत्र = एतेऽत्र ।

प्रभो + अहम् = प्रभोऽहं ।

७. **पररूपसन्धिः -** 'एङि पररूपम्' (पा.सू. ६-१-९४) इति पाणिनिसूत्रम् । अवर्णान्तात् उपसर्गात् एङादौ (ए, ओ) धातौ परे पररूपम् एकादेशः भवति । (परपदस्य आद्यः वर्णः)

**उदा -**प्र + एजते = प्रेजते । उप + ओषति = उपोषति ।

ओमाङोश्च (पा.सू. ६-१-९५) इति च - अकारात् ओम् इति पदम् आङ् इति निपाते च पूर्वपरयोः परस्य एकादेशः भवति ।

**उदा -** शिवाय + ओम् = शिवायोम् । शिव + एहि = शिवेहि ।

८. **प्रकृतिभावसन्धिः -** 'प्लुतप्रगृह्य अचि नित्यम्' (पा.सू. ६-१-१२५) इति सूत्रम् । यत्र स्वरसन्धिः भवितुमर्हति तत्रैव यदि कारणान्तरैः यथा रूपं तथैव प्रकृत्या अवशिष्यते सः प्रकृतिभावः इति कथ्यते । अत्र सन्धिकार्यं न भवति ।

| | | | | |
|---|---|---|---|---|
| **उदा -** गुरू | + | आस्ताम् | = | गुरू आस्ताम् । |
| हरी | + | एतौ | = | हरी एतौ । |
| लते | + | एते | = | लते एते । |

## II. व्यञ्जनसन्धयः

व्यञ्जनव्यञ्जनयोः अथवा व्यञ्जनस्य परतः केषुचित् स्वरेषु सत्सु व्यञ्जन सन्धिः भवति ।

१. **श्चुत्वसन्धिः -** 'स्तोः श्चुना श्चुः' (पा.सू. ८-४-४०) इति पाणिनिसूत्रम् । सकारतवर्गयोः शकारचवर्गाभ्यां योगे क्रमेण सकारस्य शकारः तवर्गस्य चवर्गः च आदेशत्वेन भवतः ।

| | | | | |
|---|---|---|---|---|
| **उदा -**रामस् | + | च | = | रामश्च |
| शरत् | + | चन्द्रः | = | शरच्चन्द्रः । |
| तत् | + | शङ्करः | = | तच्छङ्करः । |

२. **ष्टुत्वसन्धिः -** 'ष्टुना ष्टुः' (पा.सू. ८-४-४१) इति पाणिनिसूत्रम् ।

सकारतवर्गयोः षकारटवर्गाभ्यां योगे सकारस्य षकारः, तवर्गस्य टवर्गादेशः भवति ।

| | | | | |
|---|---|---|---|---|
| **उदा -**हरिस् | + | षष्ठः | = | हरिष्षष्ठः । |
| तस्मात् | + | टीका | = | तस्माट्टीका । |
| चक्रिन् | + | ढौकसे | = | चक्रिण्ढौकसे । |

३. **जश्त्वसन्धिः -** 'झलां जशोऽन्ते' (पा.सू. ८-२-३९) इति पाणिनिसूत्रम् । पदान्तात् झल् वर्णात् अचि परे जश् वर्णः आदेशः भवति ।

| | | | | |
|---|---|---|---|---|
| **उदा -** ऋक् | + | वेदः | = | ऋग्वेदः । |
| अच् | + | अन्तः | = | अजन्तः |
| षट् | + | आननः | = | षडाननः । |
| जगत् | + | ईशः | = | जगदीशः । |
| सुप् | + | अन्तः | = | सुबन्तः । |

४. **अनुनासिकसन्धिः -** 'यरोऽनुनासिकेऽनुनासिको वा' (पा.सू. ८-४-४५) इति पाणिनिसूत्रम्। यर् वर्णानां अनुनासिके परे तत् वर्गस्य अनुनासिकः आदेशः भवति ।

**उदा -** वाक् + नियमः = वाङ्नियमः ।

षट् + मुखः = षण्मुखः ।

तत् + मङ्गलम् = तन्मङ्गलम् ।

५. **ङमुडागमसन्धिः -** 'ङमो ह्रस्वादचि ङमुण्नित्यम्' (पा.सू. ८-३-३२) इति पाणिनिसूत्रम्।

ह्रस्वस्वरस्य परतः विद्यमानेभ्यः ङ्, ण्, न्, वर्णेभ्यः स्वरे परे क्रमशः ङ्, ण्, न् वर्णाः आगमाः भवन्ति ।

**उदा -** प्रत्यङ् + आत्मा = प्रत्यङ्ङात्मा । चिन्तयन् + इव = चिन्तयन्निव ।

सुगण् + ईशः = सुगण्णीशः ।

६. **परसवर्णसन्धिः -** 'अनुस्वारस्य ययि परसवर्णः' (पा.सू. ८-४-५८) इति पाणिनिसूत्रम् । अनुस्वारस्य ययि परे तत्तद्वर्गस्य अनुनासिक आदेशः भवति । तथैव 'त' वर्गस्य 'ल' कारे परे, 'त' वर्गस्य लकारः आदेशः भवति । (पा.सू.तोर्लि ८-४-६०)

**उदा -** अं + कितः = अङ्कितः । इं + धनम् = इन्धनम् ।

तत् + लीनः = तल्लीनः ।

७. **अनुस्वारसन्धिः -** मोऽनुस्वरः । (पा.सू. ८-३-२३) इति पाणिनिसूत्रम् ।

पदान्ते विद्यमानस्य 'म्' कारस्य व्यञ्जने परे 'म्' कारस्य अनुस्वारः आदेशः भवति ।

**उदा -** ग्रामम् + गच्छति = ग्रामं गच्छति ।

वस्त्रम् + हरति = वस्त्रं हरति ।

८. **छत्वसन्धिः -** 'शश्छोऽटि' (पा.सू. ८-४-६३) इति पाणिनि सूत्रम् ।

वर्गस्य अनुनासिकं विहाय इतरेषां वर्णानां परतः शकारे स्थिते तदुत्तरे अटि (सर्वे स्वराः, हयवर) वर्णे परे सति शकारस्थाने छकारादेशः भवति ।

**उदा -** तत् + शिवः = तच्छिवः । दूरात् + शिरः = दूराच्छिरः ।

* * *

# २. तिङन्तः

## १. लट्लकारः

परस्मैपदिनि | आत्मनेपदिनि

| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| **प्रथमपुरुषः** | भवति | भवतः | भवन्ति | राजते | राजेते | राजन्ते |
| **मध्यमपुरुषः** | भवसि | भवथः | भवथ | राजसे | राजेथे | राजध्वे |
| **उत्तमपुरुषः** | भवामि | भवावः | भवामः | राजे | राजावहे | राजामहे |

## २. लङ्लकारः

परस्मैपदिनि | आत्मनेपदिनि

| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| **प्रथमपुरुषः** | अभवत् | अभवताम् | अभवन् | अराजत | अराजेताम् | अराजन्त |
| **मध्यमपुरुषः** | अभवः | अभवतम् | अभवत | अराजथाः | अराजेथाम् | अराजध्वम् |
| **उत्तमपुरुषः** | अभवम् | अभवाव | अभवाम | अराजे | अराजावहि | अराजामहि |

## ३. लिट्लकारः

परस्मैपदिनि | आत्मनेपदिनि

| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| **प्रथमपुरुषः** | बभूव | बभूवतुः | बभुवुः | रराजे | रराजाते | रराजिरे |
| **मध्यमपुरुषः** | बभूविथ | बभूवथुः | बभूव | रराजिषे | रराजाथे | रराजिध्वे |
| **उत्तमपुरुषः** | बभूव | बभूविव | बभूविम | रराजे | रराजिवहि | रराजिमहि |

## ४. लोट्लकारः

परस्मैपदिनि | आत्मनेपदिनि

| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| प्रथमपुरुषः | पठतु | पठताम् | पठन्तु | राजताम् | रजेताम् | राजन्ताम् |
| मध्यमपुरुषः | पठ | पठतम् | पठत | राजस्व | राजेथाम् | राजध्वम् |
| उत्तमपुरुषः | पठानि | पठाव | पठाम | राजै | राजावहै | राजामहै |

## लट्लकारः

कृ धातोः विशेष रूपत्वात् अस्य रूपाणि अत्र प्रदत्तानि ।

परस्मैपदिनि | आत्मनेपदिनि

| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| प्रथमपुरुषः | करोति | कुरुतः | कुर्वन्ति | कुरुते | कुर्वाते | कुर्वते |
| मध्यमपुरुषः | करोषि | कुरुतः | कुरुथ | कुरुषे | कुर्वाथे | कुरुध्वे |
| उत्तमपुरुषः | करोमि | कुर्वः | कुर्मः | कुर्वे | कुर्वहे | कुर्महे |

## लङ्लकारः

परस्मैपदिनि | आत्मनेपदिनि

| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| प्रथमपुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् | अकुरुत | अकुर्वाताम् | अर्कुवत |
| मध्यमपुरुषः | अकरोः | अकुरुतम् | अकुरुत | अकुराथाः | अकुर्वाथाम् | अकुरुध्वम् |
| उत्तमपुरुषः | अकरवम् | अकुर्व | अकुर्म | अकुर्वि | अकुर्वहि | अकुर्महि |

✻ ✻ ✻

# ३. कृदन्तः

द्विप्रकारका - प्रत्ययाः धातोः विधीयन्ते । येषां प्रत्ययानां संयोगेन धातुभ्यः क्रियापदानि निष्पद्यन्ते ते तिङ् प्रत्ययाः । तिङ् भिन्नाः धातोः विधीयमानाः सर्वे प्रत्ययाः कृत् प्रत्ययाः । कृत् प्रत्ययान्तं पदं कृदन्तम्। कृत्यप्रत्यययोगेन कानिचन अव्ययानि, कानिचन विशेषणानि भवन्ति । कृद् विशषेणीभूतकृदन्ताः विशेष्यस्य लिङ्गं वचनं च अनुसरन्ति । अत्र केषाञ्चन प्रमुखानां निरूपणं क्रियते ।

**कृदन्त विशेषणानि ।**

१) **वर्तमानकुदन्तः -** वर्तमानकालार्थे धातुभ्यः शतृ (अत्), शानच् (आन) प्रत्ययौ भवतः । परस्मैपदिभ्यः धातुभ्यः शतृप्रत्ययः विधीयते । शत्रन्तानि त्रिषु लिङ्गेषु भिन्नरूपाणि भजन्ते ।

| | धातुः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|---|
| **यथा -** | **दृश्-(पश्य)** | पश्यन् | पश्यन्ती | पश्यत् |
| | **कृ** | कुर्वन् | कुर्वन्ती | कुर्वत् |
| | **रुद्** | रुदन् | रुदन्ती | रुदत् |

आत्मनेपदिभ्यः धातूभ्यः ‘शानच्’ प्रत्ययः भवति । **उदाः**

| धातुः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| **लभ्** | लभमानः | लभमाना | लभमानम् |
| **वृद्ध्** | वर्धमानः | वर्धमाना | वर्धमानम् |
| **शीङ्** | शयानः | शयाना | शयानम् |
| **धा** | दधानः | दधाना | दधानम् |

२) **भूतकृदन्ताः -** भूतकालार्थधातुभ्यः कर्मणि क्तप्रत्ययः (त) कर्तरि क्तवतु (क्त्वत्) प्रत्ययश्च विधीयेते । कृदन्तानि अपि प्रातिपदिकानि । भूते विहिताः कृदन्ताः सुबन्तवत् सर्वविभक्तिरूपाणि भजन्ते ।

| धातुः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| **भू** + कत (तः) | भूतः | भूता | भूतम् |

| | | | |
|---|---|---|---|
| **कृ** + कत (तः) | कृतः | कृता | कृतम् |
| **रक्ष** + क्त | रक्षितः | रक्षिता | रक्षितम् |
| **पठ्** + क्त | पठितः | पठिता | पठितम् |

कर्तरि भूतकृदन्तः धातुः + क्तवतु (तवत्)

| | | | |
|---|---|---|---|
| **भू** + क्तवतु | भूतवान् | भूतवती | भूतवत् |
| **कृ** + क्तवतु | कृतवान् | कृतवती | कृतवत् |

**३) भविष्यत्कृदन्ताः -** धातोः शतृ-शानच् प्रत्यययोः च मध्ये 'स्य' प्रत्ययस्य योगेन भविष्यत्कृदन्त रूपाणि निष्पद्यन्ते ।

| **धातुः** | **पुंलिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|
| **गम्** | गमिष्यन् | गमिष्यन्ती | गमिष्यत् |
| **कृ** | करिष्यन् | करिष्यती | करिष्यत् |
| **लभ्** | लप्स्यमानः | लप्स्यमाना | लप्यस्यमानम् |
| **वृत्** | वर्तिष्यमाणः | वर्तिष्यमाणा | वर्तिष्यमाणम् |

**४) विध्यर्थककृदन्ताः -** 'तव्यत्' (तव्य)ः अनीयर् (अनीयः) यत् (य), ण्यत् (य) प्रत्ययाः विध्यर्थकाः । एते प्रत्ययाः धातुभ्यः भावार्थे कर्मार्थे च विधीयन्ते ।

तव्यत् प्रत्ययान्ताः ।

| **धातुः** | **पुंलिङ्गः** | **स्त्रीलिङ्गः** | **नपुंसकलिङ्गः** |
|---|---|---|---|
| **पठ्** | पठितव्यः | पठितव्या | पठितव्यम् |
| **कृ** | कर्तव्यः | कर्तव्या | कर्तव्यम् |
| **नी** | नेतव्यः | नेतव्या | नेतव्यम् |
| **लभ्** | लब्धव्यः | लब्धव्या | लब्धव्यम् |
| **गम्** | गन्तव्यः | गन्तव्या | गन्तव्यम् |

५) **अनीयर् प्रत्ययान्ताः -**

| धातुः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| **पठ्** | पठनीयः | पठनीया | पठनीयम् |
| **कृ** | करणीयः | करणीया | करणीयम् |

**६) ण्यत्प्रत्ययाः -**

| | | | |
|---|---|---|---|
| **कृ** | कार्यः | कार्या | कार्यम् |
| **गम्** | गम्यः | गम्या | गम्यम् |
| **भू** | भाव्यः | भाव्या | भाव्यम् |

**७) कृदन्ताव्ययानि -**

धातुभ्यः कृत्-प्रत्ययविधानेन अव्ययानि अपि भवन्ति । ते च प्रत्ययाः चत्वारः १) क्त्वा २) ल्यप् ३) तुमुन् ४) णमुल् इति ।

**1) क्त्वान्ताव्ययानि -** द्वयोः, क्रिययोः समानकर्तृकत्वे पूर्वतनक्रियावाचकात् धातोः क्त्वा (क्त्वा) प्रत्ययः भवति । अर्थात् यदि एकः एव कर्ता क्रियाद्वयं निर्वहति तदा प्रथमक्रियार्थक धातोः (क्त्वा) प्रत्ययः विधीयते ।

**उदा -** बालः शालां **गत्वा** पाठं पठति ।

अहं गृहं **गत्वा** जलं **पीत्वा** आगच्छामि ।

**2) ल्यबन्ताव्ययानि -** उपसर्गे सति धातोः विहितात् क्त्वा प्रत्ययस्थाने ल्यप् आदेशो भवति ।

**उदा -** **पा** पीत्वा **नि**पीय

**भू** भूत्वा **अनु**भूय सम्भूय

**स्मृ** स्मृत्वा **वि**स्मृत्य ।

**3) तुमुन्नन्ताव्ययानि -** क्रियार्थे या क्रिया, तद्वाचकात् धातोः तुमुन प्रत्ययः विधीयते ।

**उदा -** **कृ** कर्तुम् **नी** नेतुम्

**विद्** वेत्तुम् स्मृ स्मर्तुम्

# ४. तद्धितम्

तद्धितप्रत्यये विहिते तद्धितान्तः शब्दः प्रातिपदिकसंज्ञां लभते । तस्मात् सुप् प्रत्ययाः विधीयन्ते । तद्धितप्रत्ययाः बहवः सन्ति । तेषु केचित् प्रसिद्धाः तद्धितान्ताः अत्र प्रदर्श्यन्ते । एतेषु प्रत्ययेषु विधीयमानेषु प्रातिपदिकस्य आदिस्वरस्य वृद्धिर्भवति ।

**१) अतिशय बोधकौ तरप् तमप् प्रत्ययौ ।**

द्वयोः मध्ये एकस्य अतिशये वक्तव्ये प्रातिपदिकस्य 'तरप्' प्रत्ययः विधीयते । बहुषु एकस्य अतिशये वक्तव्ये 'तमप्' प्रत्ययः विधीयते ।

**उदा- पटुः पटुतरः**

अनयोः अतिशयेन पटुः पटुतरः ।

**पटुतमः**

एतेषु अतिशयेन पटुः पटुतमः ।

एवमेव

| | | |
|---|---|---|
| क्लिष्टः | क्लिष्टतरः | क्लिष्टतमः |
| बलवान् | बलवत्तरः | बलवत्तमः |
| पवित्रा | पवित्रतरा | पवित्रतमा |
| सुन्दरः | सुन्दरतरः | सुन्दरतमः |
| लघुः | लघुतरः | लघुतमः |

२) **मतुप् प्रत्ययः -** 'अस्य अस्ति' इत्यर्थे प्रातिपदिकस्य मतुप् प्रत्ययः विधीयते ।

**उदा-** श्रीः अस्य अस्ति इति श्रीमान् । (पुंलिङ्गः)

श्रीःअस्याः अस्ति इति श्रीमती । (स्त्रीलिङ्गः)

श्रीः अस्य अस्ति इति श्रीमत् । (नपुंसकलिङ्गः)

एवमेव

धीः अस्य / अस्याः अस्ति इति धीमान् / धीमती ।

**उदा-** बलम् अस्य / अस्याः अस्ति इति बलवान् / बलवती ।

रूपम् अस्य / अस्याः अस्ति इति रूपवान् / रूपवती ।

'अस्य अस्ति' इत्यर्थे 'इन्' प्रत्ययः अपि प्रातिपदिकस्य विधीयते ।

**उदा-** गुणः अस्य अस्ति इति गुणिन् (पुंलिङ्गः)

गुणः अस्याः अस्ति इति गुणिनी । (स्त्रीलिङ्गः)

गुणः अस्य अस्ति इति गुणि । (नपुंसकलिङ्गः)

**एवमेव**

धनम् अस्य अस्ति इति धनिन् (धनी)

शूलम् अस्य अस्ति इति शूलिन् (शूली)

**उदाहरणान्तराणि :** तेजस्विन्, मेधाविन्, पुष्करिणी, इत्यादीनि पदानि ।

३) **अपत्यार्थकप्रत्ययाः** बहवः सन्ति । तेषु प्रमुखाः प्रत्ययाः

अण्, (अ), इञ्, (इ), एय, ईय, आयन्

(आयनेयीनीयीयियः फढखछघाम् प्रत्ययादीनाम्) (पा.सू. ७-१-२)

फक् - आयन् - नड + फक् - नाडायनः

स्त्रीभ्यो ढक् ढ - एय - विनता + ढक् - वैनतेयः

ख - ईन - कुल + ख - कुलीनः

छ - ईय - गर्ग + छ - गार्गीयः

भारत + छ - भारतीयः (तलन्तः स्त्री)

घ - इय - क्षत्र + घः - क्षत्रियः

| | | | | |
|---|---|---|---|---|
| **उदा-** वसुदेवस्य | अपत्यं | पुमान् | **वासुदेवः** | |
| धृतराष्ट्रस्य | अपत्यं | पुमान् | **धार्तराष्ट्रः** | |
| सुभद्रायाः | अपत्यं | पुमान | **सौभद्रः** | **- अण्** |
| दशरथस्य | अपत्यं | पुमान् | **दाशरथिः** | **- इञ, (इ)** |
| दक्षस्य | अपत्यं | पुमान् | **दाक्षिः** | |
| जनकस्य | अपत्यं | स्त्री | **जानकी** | |
| द्रुपदस्य | अपत्यं | स्त्री | **द्रौपदी** | ईय् |
| कुन्त्याः | अपत्यं | पुमान् | **कौन्तेयः** | |
| राधायाः | अपत्यं | पुमान् | **राधेयः** | **एय** |
| गङ्गायाः | अपत्यं | पुमान् | **गाङ्गेयः** | |
| युगन्धरस्य | अपत्यं | पुमान् | **यौगन्धरायणः** | |
| शकटस्य | अपत्यं | पुमान् | **शाकटायनः** | **आयन्** |
| दाक्षेः | अपत्यं | पुमान् | **दाक्षायणः** | |
| दाक्षेः | अपत्यं | स्त्री | **दाक्षायणी** | |

**४) भावार्थकप्रत्ययाः त्व, तल्, अण्, ष्यञ्**

| | | |
|---|---|---|
| **उदा-** अमृतस्य | भावः | **अमृतत्वम्** |
| मृदोः | भावः | **मृदुत्वम्** |
| व्यक्तेः | भावः | **व्यक्तित्वम्** |
| तल् (ता) एकस्य | भावः | **एकता** |
| मधुरस्य | भावः | **मधुरता** |
| **उदाः** कुशलस्य | भावः | **कौशलम्** |
| पुरुषस्य | भावः | **पौरुषम्** |
| लघोः | भावः | **लाघवम्** |

**ष्यञ् (य)ः प्रत्ययः**

| | | |
|---|---|---|
| धीरस्य | भावः | **धैर्यम्** |
| सुन्दरस्य | भाव | **सौन्दर्यम्** |
| चतुरस्य | भावः | **चातुर्यम्** |

५) **सम्बन्धार्थकप्रत्ययाः**

अण् ईय तथा इक प्रत्ययाः सम्बन्धार्थे प्रातिपदिकेभ्यः विधीयन्ते ।

**उदा : शिवस्य अयम् शैवः**

| | | | | | |
|---|---|---|---|---|---|
| इन्द्रस्य | अयम् | **ऐन्द्रः** | भूमेः | इदम् | **भौमम्** |
| मम | इदम् | **मदीयम्** | तव | इदम् | **त्वदीयम्** |
| भवतः | इदम् | **भवदीयम्** | भारतस्य | इदम् | **भारतीयम्** |
| मानवस्य | इदम् | **मानवीयम्** | समाजस्य | इदम् | **सामाजिकम्** |
| नगरस्य | अयम् | **नागरिकः** | मनसः | अयम् | **मानसिकः** |

६) **तद्धितान्ताव्ययानि**

था, त्र, दा, दानीम्, तस्, तसिल्, या एते प्रसिद्धप्रत्ययाः विधीयन्ते तानि च अव्ययानि भवन्ति ।

**उदाः** अ) यद् + था - **यथा,** तद् + था - **तथा,** सर्व + था - **सर्वथा**

आ) सप्तम्यर्थे - किम्, यद्, तर्, इत्यादि शब्देभ्यः त्र (त्रल्) प्रत्ययः विधीयते ।

यद् + त्र - **यत्र ,** अन्य + त्र - **अन्यत्र,** तत् + त्र - **तत्र**

इ) कालार्थे किम् सर्व एक इत्यादि शब्देभ्यः 'दा' प्रत्ययः विधीयते ।

सर्व + दा - **सर्वदा,** किम् + दा - **कदा,** एक + दा - **एकदा,** यद् + दा - **यदा**

ई) पञ्चम्यर्थे प्रातिपदिकेभ्यः तसिल् (तः) प्रत्ययः विधीयते

**उदा :** ग्राम + तसिल् - **ग्रामतः,** नगर + तसिल् - **नगरतः** , शाला + तसिल् - **शालातः**

✻ ✻ ✻

# ६. उपयुक्ताः व्याकरणनियमाः

1. **अन्तरान्तरेण युक्ते । (पा.सू.२-३-४)**

   अन्तरा (मध्ये), अन्तरेण (वर्जयित्वा) एताभ्यां योगे द्वितीया विभक्तिः स्यात् ।

   **अन्तरा त्वां मां हरिः । हरिम् अन्तरेण न सुखम् ।**

2. उभयतः, सर्वतः, अभितः, परितः, प्रति, धिक्, एतैः प्रयोगे द्वितीया स्यात् ।

   **मार्गम् उभयतः वृक्षाः, धिक् माम्,**

3. **सहयुक्तेऽप्रधाने । (पा.सू.२-३-१९)**

   सहार्थेन पदेन योगे तृतीया विभक्तिः स्यात् । (साकं, सार्धं, समं, सह)

   **उदा -** अ) तेन सह गच्छति ।  आ) तया सार्धं गायति ।

   इ) मित्रेण समं खेलति ।  ई) जनकेन साकं पठति ।

4. **नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च (पा.सू.२-३-१६)**

   नमः, स्वस्ति, स्वाहा, स्वधा, अलं (समर्थः, शक्तः इत्यर्थे), वषट् एभिः योगे चतुर्थीविभक्तिः भवति।

   **उदा -** अ) रामाय नमः ।  आ) शारदायै नमः ।  इ) सरस्वत्यै नमः ।

   ई) गुरवे नमः ।  उ) स्वस्ति प्रजाभ्यः ।  ऊ) अग्नये स्वाहा ।

   ऋ) पितृभ्यः स्वधा ।  ऋ) दैत्येभ्यः हरिः अलम् ।  ए) इन्द्राय वषट् ।

5. **रुच्यर्थानां प्रीयमाणः । (पा.सू.१-४-३३)**

   रुच् धातोः ईप्सितार्थे कर्मपदस्य चतुर्थी स्यात् ।

   उदा - शिशवे क्षीरं रोचते ।

6. **स्पृहेरीप्सितः । (पा.सू.१-४-३६)**

   स्पृह धातोः ईप्सितार्थे चतुर्थी स्यात् ।

   **उदा -** बालिका आभरणाय स्पृहयति ।

7. **भीत्रार्थानां भयहेतुः । (पा.सू.१-४-२५)**

भयस्य कारणं पञ्चमी विभक्तिः भवेत् । उदा - मूषिकः मार्जालात् बिभेति ।

8. **राजाहस्सखिभ्यष्टच् । (पा.सू.५-४-९१)**

राजन्, अहस्, सखिशब्दाः समासान्ते अकारान्ताः भवन्ति ।

**उदा -** महाराजः, पुण्याहः, आत्मसखः ।

9. **भवद्योगे न मध्यमः । शेषे प्रथमः । (पा.सू.१-४-१०८)**

'भवत्' शब्दस्य योगे मध्यमपुरुषः न स्यात् । प्रथमपुरुष एव भवेत् । **उदा -** भवान् वदतु ।

10. **समवप्रविभ्यः स्थः । (पा.सू.१-३-२२)**

सम्, अव, वि, प्र उपसर्गाणां योगे 'स्था' धातुः आत्मनेपदी भवति ।

**उदा -** सन्तिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते ।

11. **तुम्काममनसोरपि ।**

तुमुन् प्रत्ययान्तपदयुक्तं कामपदं मनः पदं वा चेत् प्रत्ययस्य मकारः लुप्यते ।

**उदा -** गन्तुं कामः गन्तुकामः । गन्तुं मनः गन्तुमनाः ।

12. **न माङ्योगे । (पा.सू.६-४-७४)**

निषेधार्थक 'मा' पदयोगे लङ्निमित्तअडागमस्य अकारः लुप्यते ।

**उदा -** मा भूत् विलम्बः । (मा अभूत् = मा भूत्)

13. **लट् स्मे । (पा.सू.३-२-११८)**

वर्तमानकालवाचकक्रियापदस्य स्म योगे भूतकालार्थः भवति ।

**उदा -** बालाः हसन्ति स्म ।

**ससम्बन्धिकाव्ययानां लक्षणम् उदा -**

1. यत्र तत्र - साहचर्ये **-यत्र** धूमः **तत्र** अग्निः। साहचर्ये **यत्र** मीनः **तत्र** जलम् ।
2. यावत् तावत् - अवधिसूचनार्थे -लोके **यावत्** वेदाः भवन्ति, **तावत्** संस्कृतभाषा अपि प्रचलिष्यति।
3. यदा तदा - कालसूचनार्थे - **यदा** गुरुः कक्ष्यां प्रविशति **तदा** छात्राः उत्तिष्ठन्ति ।
4. यथा तथा सादृश्यार्थे - **यथा** राजा **तथा** प्रजाः । **यथा** पिता **तथा** पुत्राः ।
5. यद्यपि तथापि - एकस्य निषेधार्थे - **यद्यपि** जलाशये जलमस्ति **तथापि** नलेन नागच्छति ।
6. यदि तर्हि - कार्यकारणभावे - जनाः **यदि** संस्कृतं पठन्ति **तर्हि** सम्भाषणं कर्तुं शक्नुयुः।

   विकल्पेन अस्मिन्नेवार्थे 'चेत्' इति प्रयोगः भवेत् ।

   परीक्षासमयः समीपे अस्ति **चेत्** छात्राः अधिकं पठन्ति ।

   (इमानि नित्यसम्बन्धिपदानि इत्यपि प्रसिद्धानि ।)

* * *

# ७. छन्दो विचारः

अस्मिन् पाठ्यपुस्तके विविधवृत्तनिबद्धाः श्लोकाः दत्ताः । अतः अत्र छन्दोविचारः प्रस्तूयते । श्लोकः पादचतुष्टययुक्तः वा भवति । पादगताक्षराणां मात्राणां वा आधारेण छन्दः द्विधा विभज्यते 'वृत्तं' जातिः च इति ।

वृत्तं च अक्षरसंख्यानिबद्धम् । जातिश्च स्वरमात्रासंख्यानिबद्धा । जातिच्छन्दसि आर्या, गीतिः, उपगीतिः इत्यादयः भेदाः विद्यन्ते ।

वृत्ते तु अनुष्टुप् वसन्ततिलका इत्यादयः भेदाः दृश्यन्ते ।

वृत्तेषु प्रतिपादम् अक्षराणां स्वराधारेण गुरु, लघु, इति विभागः क्रियते । ह्रस्वस्वरवर्ण सहिताः वर्णाः लघुवर्णाः । लघुवर्णसूचकं चिह्नम् '∪', गुरुवर्ण सूचकं चिह्नम् '-' इति । गुरुविषये व्यवस्था एवम् उक्तम् -

सानुस्वरश्च दीर्घं च विसर्गश्च गुरुर्भवेत् । अं - आ - अः (each marked with — above)

वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि च ।। (अर्कः) (— — above र्क)

सर्वे दीर्घवर्णाः (आ, ई, ऊ इत्यादयः)

अनुस्वारसहिताः (अं, इं, उं इत्यादयः)

विसर्गयुक्ताः (अः, इः, उः, ओः, औः इत्यादयः)

वृत्तलक्षणानुगुणं पादस्य अन्तिमवर्णाः च गुरुसंज्ञकाः भवन्ति ।

वृत्तानां लक्षणज्ञानाय गणविभागस्य ज्ञानम् अपेक्षितम् । एकस्मिन् पादे नियमितानि यानि अक्षराणि तानि प्रत्यक्षरत्रयं विभज्यते । तादृशः अक्षरत्रयस्य समूहः गणः इति उच्यते । गणः च अष्टधा विभक्तः ।

**'यमाताराजभानसलगं'** इति अष्टगणस्मारक सूत्रम् । गुरुलघुव्यवस्थाम् आश्रित्य गणाष्टकस्य व्यवस्था एवं विद्यते -

१. यगणः - ∪ – – य मा ता (आदिलघुः)

२. मगणः - – – – मा ता रा (त्रिगुरुः)

३. तगणः - – – ∪ ता रा ज (अन्त्यलघुः)

४. रगणः - – ∪ – रा ज भा (मध्यलघुः)

५. जगणः - ∪ – ∪ ज भा न (मध्यगुरुः)

६. भगणः - – ∪ ∪ भा न स (आदिगुरुः)

७. नगणः - ∪ ∪ ∪ न स ल (त्रिलघुः)

८. सगणः - ∪ ∪ – स ल गम् (अन्त्यगुरुः)

आदिमध्यावसानेषु यरता यान्ति लाघवम् ।

भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ।।

**वृत्तानां लक्षणोदाहरणानि**

| क्र. सं | नाम | प्रतिपादम् अक्षरसंख्या | गणव्यवस्था | लक्षणोदाहरणानि | पाठ संख्या | श्लोक संक्या |
|---|---|---|---|---|---|---|
| १. | अनुष्टुप् | ८ | | पञ्चमं लघु सर्वत्र सप्तमंद्विचतुर्थयोः । | | ६/२/१ ४/११ |
| २. | इन्द्रवज्रा | ११ | त त ज - - | स्यादिन्द्रवज्रा यदि तौ जगौ गः । | | |
| ३. | उपेन्द्रवज्रा | ११ | ज त ज - - | उपेन्द्रवज्रा यदि तौ जगौ गः । | | |
| ४. | वंशस्थम् | १२ | ज त ज र | जतौतुवंशस्थमुदीरितं जरौ । | | ७ |

| | | | | |
|---|---|---|---|---|
| ५. वसन्ततिलका | १४ | त भ ज ज - - | उक्तावसन्ततिलका तभजाजगौगः । | १० |
| ६. मालिनी | १५ | न न म य य | ननमयययुतेयं मालिनी भोगिलोकैः । | २/९ |
| ७. शिखरिणी | १७ | य म न स भ ∪– | रसैरुद्रैच्छिन्ना यमनसभलागः शिखरिणी । | ३ |
| ८. मन्दाक्रान्ता | १७ | म भ न त त - - | मन्दाक्रान्ताजलधिषड गैम्भौंनतौताद्गुरूचेत् । | ८ |

* * *

# कोष्ठकः

S1B6E3

| धातुः | वर्तमाने लट् | | भूते लङ् | | भविष्यति लृट् | | प्रार्थनादौ लोट् | |
|---|---|---|---|---|---|---|---|---|
| | कर्तरि | कर्मणि | कर्तरि | कर्मणि | कर्तरि | कर्मणि | कर्तरि | कर्मणि |
| गम् | गच्छति | गम्यते | अगच्छत् | अगम्यत | गमिष्यति | गंस्यते | गच्छतु | गम्यताम् |
| पठ् | पठति | पठ्यते | अपठत् | अपठ्यत | पठिष्यति | पठिष्यते | पठतु | पठ्यताम् |
| लिख् | लिखति | लिख्यते | अलिखत् | अलिख्यत | लेखिष्यति | लेखिष्यते | लिखतु | लिख्यताम् |
| खाद् | खादति | खाद्यते | अखादत् | अखाद्यत | खादिष्यति | खादिष्यते | खादतु | खाद्यताम् |
| ज्ञा* | जानाति | ज्ञायते | अजानात् | अज्ञायत | ज्ञास्यति | ज्ञास्यते | जानातु | ज्ञायताम् |
| क्रीड् | क्रीडति | क्रीड्यते | अक्रीडत् | अक्रीड्यत | क्रीडिष्यति | क्रीडिष्यते | क्रीडतु | क्रीड्यताम् |
| पा | पिबति | पीयते | अपिबत् | अपीयत | पास्यति | पास्यते | पिबतु | पीयताम् |
| कृ* | करोति | क्रियते | अकरोत् | अक्रियत | करिष्यति | करिष्यते | करोतु | क्रियताम् |
| श्रु* | शृणोति | श्रूयते | अशृणोत् | अश्रूयत | श्रोष्यति | श्रोष्यते | शृणोतु | श्रूयताम् |
| दा | ददाति | दीयते | अददात् | अदीयत | दास्यति | दास्यते | ददातु | दीयताम् |
| पत् | पतति | पत्यते | अपतत् | अपत्यत | पतिष्यति | पतिष्यते | पततु | पत्यताम् |
| विश् | उपविशति | उपविश्यते | उपाविशत् | उपाविश्यत | उपवेक्ष्यति | उपवेक्ष्यते | उपविशतु | उपविश्यताम् |
| क्रीञ् | क्रीणाति | क्रीयते | अक्रीणात् | अक्रीयत | क्रेष्यति | क्रेष्यते | क्रीणातु | क्रीयताम् |
| भू | भवति | भूयते | अभवत् | अभूयत | भविष्यति | भविष्यते | भवतु | भूयताम् |
| दृश् | पश्यति | दृश्यते | अपश्यत् | अदृश्यत | द्रक्ष्यति | द्रक्ष्यते | पश्यतु | दृश्यताम् |
| प्रच्छ् | पृच्छति | पृच्छ्यते | अपृच्छत् | अपृच्छ्यत | प्रक्ष्यति | प्रक्ष्यते | पृच्छतु | पृच्छ्यताम् |
| नी | नयति | नीयते | अनयत् | अनीयत | नेष्यति | नेष्यते | नयतु | नीयताम् |
| स्मृ | स्मरति | स्मर्यते | अस्मरत् | अस्मर्यत | स्मरिष्यति | स्मरिष्यते | स्मरतु | स्मर्यताम् |
| प्रेष् | प्रेषयति | प्रेष्यते | प्रैषयत् | प्रैष्यत | प्रेषयिष्यति | प्रेषयिष्यते | प्रेषयतु | प्रेष्यताम् |
| वद् | वदति | उद्यते | अवदत् | औद्यत | वदिष्यति | वदिष्यते | वदतु | उद्यताम् |
| वृध् | वर्धते | वृद्ध्यते | अवर्धत | अवृद्ध्यत | वर्धिष्यते | वर्धिष्यते | वर्धताम् | वृध्यताम् |
| शुभ् | शोभते | शोभ्यते | अशोभत | अशोभ्यत | शोभिष्यते | शोभिष्यते | शोभताम् | शोभ्यताम् |
| वन्द् | वन्दते | वन्द्यते | अवन्दत | अवन्द्यत | वन्दिष्यते | वन्दिष्यते | वन्दताम् | वन्द्यताम् |
| मुद् | मोदति | मुद्यते | अमोदत | अमुद्यत | मोदिष्यते | मोदिष्यते | मोदताम् | मोद्यताम् |
| याच् | याचते | याच्यते | अयाचत | अयाच्यत | याचिष्यते | याचिष्यते | याचताम् | याच्यताम् |
| बाध् | बाधते | बाध्यते | अबाधत | अबाध्यत | बाधिष्यते | बाधिष्यते | बाधताम् | बाध्यताम् |
| कम्प् | कम्पते | कम्प्यते | अकम्पत | अकम्प्यत | कम्पिष्यते | कम्पिष्यते | कम्पताम् | कम्प्यताम् |

| विध्यादौ लिङ् | विध्यादौ | | भूते | | अव्ययम् | | वर्तमाने | | |
|---|---|---|---|---|---|---|---|---|---|
| | तव्यत् | अनीयर् | क्तवतु | क्त | तुमुन् | क्त्वा | शतृ | | शानच् |
| | कर्मणि | कर्मणि | कर्तरि | कर्मणि | | | पुं | स्त्री | |
| गच्छेत् | गन्तव्यम् | गमनीयम् | गतवान् | गतः | गन्तुम् | गत्वा | गच्छन् | गच्छन्ती | - |
| पठेत् | पठितव्यम् | पठनीयम् | पठितवान् | पठितः | पठितुम् | पठित्वा | पठन् | पठन्ती | - |
| लिखेत् | लेखितव्यम् | लेखनीयम् | लिखितवान् | लिखितः | लेखितुम् | लिखित्वा | लिखन् | लिखन्ती | - |
| खादेत् | खादितव्यम् | खादनीयम् | खादितवान् | खादितः | खादितुम् | खादित्वा | खादन् | खादन्ती | - |
| जानीयात् | ज्ञातव्यम् | ज्ञानीयम् | ज्ञातवान् | ज्ञातः | ज्ञातुम् | ज्ञात्वा | ज्ञातुम् | जानती | - |
| क्रीडेत् | क्रीडितव्यम् | क्रीडनीयम् | क्रीडितवान् | क्रीडितः | क्रीडितुम् | क्रीडित्वा | क्रीडन् | क्रीडन्ती | - |
| पिबेत् | पातव्यम् | पानीयम् | पीतवान् | पीतः | पातुम् | पीत्वा | पिबन् | पिबन्ती | - |
| कुर्यात् | कर्तव्यम् | करणीयम् | कृतवान् | कृतः | कर्तुम् | कृत्वा | कुर्वन् | कुर्वती | - |
| शृणुयात् | श्रोतव्यम् | श्रवणीयम् | श्रुतवान् | श्रुतः | श्रोतुम् | श्रुत्वा | शृण्वन् | शृण्वती | - |
| दद्यात् | दातव्यम् | दानीयम् | दत्तवान् | दत्तः | दातुम् | दत्त्वा | ददत् | ददती | - |
| पतेत् | पतितव्यम् | पतनीयम् | पतितवान् | पतितः | पतितुम् | पतित्वा | पतन् | पतन्ती | - |
| उपविशेत् | उपवेष्टव्यम् | उपवेशनीयम् | उपविष्टवान् | उपविष्टः | उपवेष्टुम् | उपविश्य | उपविशन् | उपविशन्ती | - |
| क्रीणीयात् | क्रेतव्यम् | क्रयणीयम् | क्रीतवान् | क्रीतः | क्रेतुम् | क्रीत्वा | क्रीणन् | क्रीणती | - |
| भवेत् | भवितव्यम् | भवनीयम् | भूतवान् | भूतः | भवितुम् | भूत्वा | भवन् | भवन्ती | - |
| पश्येत | द्रष्टव्यम् | दर्शनीयम् | दृष्टवान् | दृष्टः | द्रष्टुम् | दृष्ट्वा | पश्यन् | पश्यन्ती | - |
| पृच्छेत् | प्रष्टव्यम् | प्रच्छनीयम् | पृष्टवान् | पृष्टः | प्रष्टुम् | पृष्ट्वा | पृच्छन् | पृच्छन्ती | - |
| नयेत् | नेतव्यम् | नयनीयम् | नीतवान् | नीतः | नेतुम् | नीत्वा | नयन् | नयन्ती | - |
| स्मरेत् | स्मर्तव्यम् | स्मरणीयम् | स्मृतवान् | स्मृतः | स्मर्तुम् | स्मृत्वा | स्मरन् | स्मरन्ती | - |
| प्रेषयेत् | प्रेषयितव्यं | प्रेषणीयम् | प्रेषितवान् | प्रेषितः | प्रेषयितुम् | प्रेषयित्वा | प्रेषयन् | प्रेषयन्ती | - |
| वदेत् | वक्तव्यम् | वदनीयम् | उक्तवान् | उक्तः | वक्तुम् | उक्त्वा | वदन् | वदन्ती | - |
| वर्धेत | वर्धितव्यम् | वर्धनीयम् | वृध्दवान् | वृध्दः | बर्धितुम् | वर्धित्वा | - | - | वर्धमानः |
| शोभेत | शोभितव्यम् | शोभनीयम् | शोभितवान् | शोभितः | शोभितुम् | शोभित्वा | - | - | शोभमानः |
| वन्देत | वन्दितव्यम् | वन्दनीयम् | वन्दितवान् | वन्दितः | वन्दितुम् | वन्दित्वा | - | - | वन्दमानः |
| मोदेत | मोदितव्यम् | मोदनीयम् | मुदितवान् | मुदितः | मोदितुम् | मुदित्वा | - | - | मोदमानः |
| याचेत | याचितव्यम् | याचनीयम् | याचितवान् | याचितः | याचितुम् | याचित्वा | - | - | याचमानः |
| बाधेत | बाधितव्यम् | बाधनीयम् | बाधितवान् | बाधितः | बाधितुम् | बाधित्वा | - | - | बाधमानः |
| कम्पेत | कम्पितव्यम् | कम्पनीयम् | कम्पितवान् | कम्पितः | कम्पितुम् | कम्पित्वा | - | - | कम्पमानः |

## Ill effects of using tobacco and using alcoholic drinks

Habits help one to scale the pinnacle of glory and at the same time, fall to the nadir of disgrace. As a result of using tobacco and drinking, a death is reported every four seconds.

### Ill effects of use of tobacco on human beings

- Smoking (beedi, cigarette and pipe ) and chewing tobacco causes cancer.
- They cause impotence among men and lack of fertility among women
- They increase blood pressure
- Chewing of tobacco leads to staining of teeth and pigmentation of palms and fingers. Lips turn dark and cause white or red patches in the mouth. This also results in the loss of hair and wrinkling of the skin making one look aged.

### Effects on the environment

- Tobacco cultivation extracts a lot of water content from the atmosphere
- Smoking results in atmospheric pollution

### How to give up smoking

- Practice of yoga and playing games will reduce the tension caused by giving up smoking.
- We have to give up smoking, if not for our sake, at least for the sake of those who love us.

**"The most dangerous of all our ignorance is the love for drinking"- Gandhiji**

Drinking is a terribly dangerous habit. The rich drink for pleasure and it is a symbol of prestige for them. The poor drink to forget difficulties, while the middle class people drink to imitate the rich.

### Ill effects of drinking

- One who drinks endangers his health.
- His physical health deteriorates resulting in mental weakness.
- He gets into a state of helplessness, hopelessness, lack of interest, doubt, despondency, lack of trust, tendency to commit suicide and these destroy his life.
- The person gets into debts and the life of his dependents become miserable.
- Drinking results in divorces, robbery, murder and other anti-social activities.
- It causes terrible diseases such as cancer.
- 50% of the road accidents in our country are due to intoxication caused by drinking.

**Drinking is an invitation to death. Let us not drink for pleasure and turn Demons. Do not invite Hell for a momentary heavenly pleasure.**

# Notes

# Notes